Bill No. 5/07-08

94

2008-9553

लौगाक्षी (or मीमांसा अर्थ संग्रह) of लौगाक्षि भास्कर with the Commentary कौमुदी of रामेश्वर शिवयोगि भिक्षु - Edited and published by बाबू कौलेश्वर सिंह at गणेशप्रभाकर प्रेस - moth eaten pinholes damaging one or two letters in first and last few pages and neatly repaired. Loose leaves litho print edn., Benares, 1945 Vikram era.

(अ)

SANS
181.42
BHA

DATA ENTERED
Date 25/07/08

KALANIDHI
Rare Book Collection
IGNCA
ACC No.: R-553
Date: 26.3.08

# लोगाक्षी

॥श्रीकाशीविश्वनाथपुरी मे महल्लाछोटकी पिअरी परबाबूकवलेश्वरसिंह के मकान में बाबूकिसुनदयालसिं
हकेगणेशप्रभाकर छापाखानेमेंयह मी मांसा लोगाक्षी कोसुदीटीकासंयुक्त छापीगई जिसे लेना होयउसे
नईसडकपरबबूकौलेश्वर सिंघकेदुकानपरमिलेगी॥संम्वत१९४५ भाद्रशुक्ल ॥ ७ ॥ ८ ॥ छ ॥ ॥

Indira Gandhi National Centre for the Arts

लौ·भा·
१

ॐ श्रीगणेशाय नमः आद्यो यो हेतुर्विश्वसर्गे महेशोपन्द्रादीनां कोऽप्यनिक्षेपदेवः। भूतानां भर्ता सर्वभूतान्तरात्मा हृद्यं मे कापि तत्त्वणामन्तरोतु १ श्रीजैमिनिन
ये ग्रंथः प्रवेशाय निरूपितः विदुषा तत्र बालानां कौमुदीयं वितन्यते २ इह खलु परमकारुणिकेन मुनिना जैमिनिना धर्माधर्मविवेकाय द्वादशलक्षणीमी
मांसा प्रणीता तत्र हि प्रवेशाय शिशूनामर्थसंग्रहाख्यं प्रकरणं प्रारभमाणो लौगाक्षिभास्करः शिष्टाचारपरिप्राप्तं प्रचयगमनादिफलकमिष्टदेवतानम
स्काररूपं मंगलमाचरति वासुदेवमित्यादिना वासुदेवं श्रीनारायणं सर्वनिवासाधिष्ठानं प्रकाशात्मकं ब्रह्मेत्यर्थः रमाकान्तं रमा पालस्माःकां
तमित्यर्थः नत्वेश्वरानंगीकारोऽव्यत्याग इष्टविष्णुदेवतायाः स्वीकृतत्वादित्यन्यत् जैमिनिनयइति जैमिनिप्रणीते द्वादशाध्यायात्मके पूर्ववेदभागवि
चारात्मके तंत्रइत्यर्थः प्रवेशाय बालानामिति शेषः अर्थसंग्रहमिति अर्थानां द्वादशाध्यायप्रतिपाद्यप्रमाणादिपदार्थानां संक्षिप्तशब्दरचनयालक्ष
णादिकथनमित्यर्थः तत्र हि प्रथमे लक्षणे विध्यादेः प्रामाण्यं निरूपितं द्वितीये तद्विधेयकर्मभेदो निरूपितः तृतीये विहितानां शेषशेषिभावः चतुर्थे क्र

॥श्रीकृष्णाय नमः वासुदेवं रमाकांतं नत्वा लौगाक्षिभास्करः कुरुते जैमिनिनये प्रवेशायार्थसंग्रहम् १॥ ६॥

तु प्रयुक्ता नुष्ठेयानां पुरुषार्थप्रयुक्तानुष्ठेयानां च पदार्थानां परिमाणं चिंतितं पंचमेऽनुष्ठेयपदार्थानामनुष्ठानक्रमो निरूपितः षष्ठे विहितकर्मफलभोक्तृ
त्वरूपाधिकारनिरूपणं सप्तमे प्रकृतावुपदिष्टांगानां विकृतौ सामान्यातिदेशो निरूपितः अष्टमे आग्नेयोऽष्टाकपाल इत्यादिप्रकृत्यंगानां सौर्यचरुं निर्वपेदित्या
दिविकृतौ सप्तदशद्रव्यदेवतादिद्वारेण विशेषातिदेशः नवमे प्रकृतावुपदिष्टानां मंत्रसामसंस्कारकर्मणां विकृतावतिदेशप्राप्तानां प्रकृतिविकृत्योरग्निसू
र्यादिदेवतादिभेदे प्रकृतिगतदेवतादिवाचकं पदं विहाय विकृतौ देवतादिवाचकस्य पदस्याध्याहार ऊहो निरूपितः यथाऽग्नये जुष्टमिति मंत्रे प्रकृतावुप
दिष्टे विकृतावतिदेशप्राप्तेऽग्निपदपरित्यागेन सूर्यपदाध्याहारः यथा च गिरा गिरा च दक्षस इत्यत्र साम्नि गिरापदस्य परित्यागेनेरापदाध्याहारः साम्नामूहः व्रीह्या
दिद्रव्यान्तरसंबंधिनश्चावघातादेर्नीवारादिद्रव्यान्तरसंबंधसंस्कारकर्मणामूहश्च दशमे विकृतौ चोदकप्राप्तानां प्राकृतानां मानां प्रकृतौ सावकाशानां विकृतौ ह्युपदिष्टैर्व

राम·
१

यथा प्रकृतेः सकाशाद्विकृतावतिदिष्टानां बर्हिषां शरमयं बर्हिरित्युपदिष्टेन शरमयबर्हिषा विकृतौ बाधः एकादशे चानेकांगिविधिप्रयुक्तानामंगानां सकृदनु
ष्ठानात्सर्वांगिनामुपकारसाम्यं तत्र निरूपितं यथाऽग्नेयोष्टाकपालउपांशुयाजमंतरायजत्यग्नीषोमीयमेकादशकपालमित्यादिपौर्णमासादिकर्मप्रयुक्तानां
प्रयाजाद्यंगानां सकृदनुष्ठानात्सर्वांग्युपकारः द्वादशे त्वेकांगिप्रयुक्तस्यांगानुष्ठानस्य तत्प्रयोजकसामर्थ्यरहितेंग्यंतरेप्युपकारः प्रसंगो निरूपितः यथा
ऽग्नीषोमीयं पशुमालभेतेति पशुविधौ प्रयुक्तानां प्रयाजाद्यंगानां पशुपुरोडाशेप्युपकारः इति तथा च तेपदार्थाः केचिदत्रापि संक्षेपेण निरूपिताः के
चित्तु सूचितास्तत्र कांश्चित्पदार्थांस्तत्र तत्र प्रदर्शयिष्यामइत्यर्थसंग्रहमित्यस्योपपत्तिः तथा सति यानि चानुबंधानि जैमिनितंत्रस्य तान्युपस्थापितप्र
करणत्वात् तस्य च धर्म एव विषयः अधर्मस्तु निरसनीयतया विचारितः सोपि अधिकारी अधीतवेदवेदांगो धर्मजिज्ञासुः श्रेयोर्थी प्रयोजनं च वि
चारितधर्मानुष्ठानेन स्वर्गादि संबंधो बोध्यबोधकलक्षणो धर्मतंत्रयोरिति १ तत्र तावत्प्रतिज्ञातमर्थसंग्रहं निरूपयितुं स्वप्रकरणस्य तंत्रारंभाधीना

अथ परमकारुणिको भगवान् जैमिनिर्धर्मविवेकाय द्वादशलक्षणीं प्रणिनीय तत्रादौ धर्मजिज्ञासां सूत्रयामास अथातो धर्मजिज्ञासेति॥

रंभकत्वात् तंत्रारंभार्थकं सूत्रमवतारयति अथेत्यादिना तत्राथशब्दः सौत्राथशब्दसमानार्थकः वेदाध्ययनानंतरं तदर्थविचारः कर्त्त
व्य इति धर्मजिज्ञासा सूत्रयामासेति तदर्थः परमकारुणिकः निरुपाधिककरुणायुक्तः भगवान् कीर्त्यादिमान् भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककी
र्तिष्विति स्मरणात् जैमिनिरादौ धर्मजिज्ञासां सूत्रयामासेत्यन्वयः कस्मादित्यत विवीक्षायामाह॥ द्वादशलक्षणीमिति॥ द्वादशानां लक्षणानामध्यायानां समा
हारो द्वादशलक्षणी तां प्रणिनीय बुद्धौ समारोप्य तत्र तस्यातस्या —— वेत्यर्थः लोकेपि जनः स्वकृत्यं समाकलय्य तत्करणे प्रवर्त्तत इति प्रसिद्धेः प्रणिनीय सू
त्रयामासेति विरोधः प्रणिनाय्येति पाठांतरे तु प्रणयनं कृत्वा इत्यर्थः प्रणिनायेत्युक्ते केन क्रमेणेति वीक्षायां तत्रेत्याद्युत्तरं धर्म[illegible]कायोत्पन्नधर्मस्या
प्युपलक्षणं तयोर्विवेकाय निर्णयत्नानायेत्यर्थः कुत्र धर्मजिज्ञासां सूत्रयामासेति वीक्षायामाह अथेति॥ सूत्रं व्याख्ये १ १ ६ ॥

अत्रेत्यादिना॥ अत्र सूत्रे अस्य च प्रथमसूत्रस्य चोदनालक्षणोऽर्थो धर्म इत्यारभ्यान्वाहार्ये च दर्शनादित्यन्तं जैमिनिप्रणीतं धर्मविचारशास्त्र[illegible] तत्र संशयः कि
मस्य धर्मविचारतन्त्रस्यारंभोऽध्ययनविध्यप्रयोज्यस्तत्प्रयोज्यो वेति तत्र यदि स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिनार्थज्ञानाय दृष्टप्रयोजनाय वेदाध्ययनं विधीयेत न दात
स्य शास्त्रारंभे भवेदपि प्रयोजकत्वं नेनदस्ति अन्यथासिद्धत्वात् तथाहि किमन्यतः प्राप्तार्थज्ञानहेतुमध्ययनं नाहि विधिर्विधत्ते किंवा पक्षेप्राप्तमवघातवन्नियमेना
द्यः। विवादस्यैदं वेदाध्ययनमर्थज्ञानहेतुः अध्ययनत्वाज्झरतोद्यध्ययनवदित्यनुमानेनैवाध्ययनस्यार्थज्ञानहेतुत्वप्राप्तेः नापि द्वितीयः अवघाते वैषम्या
त् यथावघातनिष्पन्नैरेव तण्डुलैरनुष्ठीयमानौ दर्शपूर्णमासावङ्गान्तरापूर्वद्वारेण परमापूर्वं जनयतः तदपूर्वमेवावघातनियमहेतुः तथा लिखितपाठेन
गुरुपूर्वकाध्ययनेनवार्थज्ञानसंभवात्पक्षेऽप्राप्ताध्ययननियमहेतुर्वक्तव्यः स च नास्ति लिखितपाठजन्यार्थज्ञानेनैव क्रत्वनुष्ठानसिद्धेः प्रयोजकाभावात् त
स्मादुक्तविधिद्वयासंभवादर्थज्ञानहेतुविचारशास्त्रारंभस्य न विधिप्रयोज्यत्वमिति प्राप्ते अत्रोच्यते न तूक्तमध्ययनस्यार्थज्ञानहेतुत्वमनुमानसिद्धमिति ना
अत्राथशब्दो वेदाध्ययनानन्तर्यवचनः। अतः शब्दो हि वेदाध्ययनस्य दृष्टार्थत्वं ब्रूते॥ त्यं नाप्राप्तविधिरिति न तथैव नियमविधिस्तु भव
त्येव न च प्रयोजकाभावः सकलक्रत्वपूर्वस्यैव प्रयोजकत्वाद्दर्शपूर्णमासजन्यपरमापूर्वस्यावघातनियमजन्यापूर्वकल्पकत्ववदेव क्रतुजन्यापूर्वजात
स्य क्रतुज्ञानसाधनाध्ययननियमजन्यापूर्वकल्पकस्य सत्वान्नियमादृष्टस्य कल्पनादर्थज्ञानसाधनयोर्लिखितपाठगुरुपूर्वकाध्ययनयोः पक्षे प्राप्तत्वाद्यदा गुरु
पूर्वकाध्ययनं परित्यज्य लिखितपाठादिनार्थज्ञानं संपादयितुमुद्युक्तः पुरुषः प्रवर्तते तदा नियमादृष्टाय गुरुपूर्वकाध्ययनमेवार्थज्ञानसाधनं विधीयते क्रतु
जन्यापूर्वप्रयुक्तनियमादृष्टस्यास्वीकारे च श्रूयमाणो विधिरनर्थकः स्यात् न च नानर्थको लिखितपाठगुरुपूर्वकाध्ययनयोरक्षरग्रहणमात्रेऽपि विशेषसाध
नत्वाद्यदा गुरुपूर्वकाध्ययनं परित्यज्य लिखितपाठेनाक्षरग्रहणाय प्रवर्तते तदा गुरुपूर्वकाध्ययनमेव नियमादृष्टाय विधीयत इति वाच्यम् तत्फलस्य
कल्प्यत्वप्रसंगात्। अर्थज्ञानरूपदृष्टप्रयोजनायाध्ययनस्य विधेयत्वे तु नियमादृष्टस्य क्रतुजन्यापूर्वे श्रुतफले ह्युपयोगो भविष्यति न च यदृचोऽधीते पय
सः कुल्या अस्य पितॄन् स्वधा वहन्तीत्यार्थवादिकं श्रुतमेव फलमिति वाच्यम् तस्य नित्यतयाध्ययनविधिफलत्वेन प्रथमा ॥ ॥

ध्ययनविधिफलत्वाभावात् किंचाध्ययनव्यापारस्यासंभवदर्थज्ञानरूपदृष्टफलकत्वे केवलादृष्टार्थकत्वानुपपत्तेः तथा चोक्तं लभ्यमाने फले दृष्टे नादृष्टपरिकल्पना विधेस्तु नियमार्थत्वान्नानर्थक्यं भविष्यतीति १ किंच विधिविनैव वेदाध्ययनस्य तदर्थज्ञानपर्यवसायित्वं तदर्थनिर्णयहेतुविचारकर्तव्यता चाऽऽक्षिप्यते तथा हि स्वाध्यायोऽध्येतव्य इत्यत्र तव्यप्रत्ययः शाब्दभावनामभिधत्ते सा च स्वभाव्यं विनानुपपद्यमाना किंचिद्भाव्यमाकल्पयति तत्र चैकप्रत्ययोपात्तत्वेनार्थभावनैव भाव्यत्वेन समन्वेति साऽपि स्वभाव्यमन्तरेणानुपपद्यमाना किंचिद्भाव्यमाक्षिपति तत्रापि फलपदस्याश्रवणात् समभिव्याहृतः स्वाध्यायः कर्मभूत एव भाव्यत्वेन संबध्यते तस्य च फलवदर्थावबोधपर्यन्तत्वाभावे भाव्यत्वानुपपत्त्या फलवदर्थावबोधपर्यवसायित्वमापद्यते अर्थनिर्णयमन्तरेण च फलवदर्थावबोधस्यासंभवेनार्थनिर्णयहेतुविचारकर्तव्यतामप्यध्ययनविधिराक्षिपतीति तस्माद्दृष्टार्थज्ञानरूपदृष्टप्रयोजनायैव वेदमध्ययनं विधीयते नाक्षरग्रहणमात्रायेति सिद्धान्तमभिप्रेत्याथशब्दं वेदाध्ययनानंतर्यार्थकत्वेनातःशब्दं च वेदाध्ययनस्य वेदार्थज्ञानरूपदृष्टार्थकत्वपरत्वेन च व्याचष्टे। अथशब्द इत्यादिना। तत्र हेतुमाह स्वाध्याय इत्यादिना। अध्ययनविधाविति अध्यय

स्वाध्यायोऽध्येतव्य इत्यध्ययनविधौ तदध्ययनस्यार्थज्ञानरूपदृष्टार्थकत्वेन व्यवस्थापनात्। तथा च वेदाध्ययनानंतरं यतोऽर्थज्ञानरूपदृष्टार्थकं तदध्ययनमतो हेतोर्धर्मस्य वेदार्थस्य जिज्ञासा कर्तव्येति शेषः। जिज्ञासापदस्य विचारे लक्षणा। अतो धर्मविचारशास्त्रमिदमारंभणीयमिति शास्त्रारंभसूत्रार्थः॥

तद्विध्यनुकूलविचारात्मके प्रमाणलक्षणस्य प्रथमाधिकरण इत्यर्थः। वेदः तच्छब्दार्थः कर्तव्यपदाध्याहारेण सूत्रं योजयति तथा चेत्यादिना तथा चेति वेदाध्ययनस्य दृष्टार्थत्वे च सतीत्यर्थः तस्य वेदस्याध्ययनं यतोऽर्थज्ञानरूपदृष्टार्थकमतो हेतोर्वेदाध्ययनानंतरं वेदार्थस्य धर्मस्य पदार्थनिर्णयहेतुविचारः कर्तव्य इत्यध्ययनविधिप्रयुक्तोऽयं शास्त्रमारंभणीयमिति भावः ननु जिज्ञासा हि ज्ञानेच्छा न च सा कर्तुं शक्यते तस्या व्यापारागोचरत्वात् इच्छामात्रेणानुष्ठानोपयोगिधर्मज्ञानासंभवाच्चेत्यत आह जिज्ञासापदे चेति तथा च जिज्ञासेत्यत्र प्रकृत्या ज्ञानमात्रशक्तिमत्यानुष्ठानोपयोगिज्ञानमजहल्लक्षणया प्रत्ययेन च साध्यसाधनभावसंबन्धेनेच्छासाध्यो विचारोऽजहल्लक्षणया च बोध्यत इत्यर्थः समर्थितं शास्त्रारंभमुपसंहरति अत इति स्वाध्यायाध्ययनविधेः शास्त्रारंभप्रयोजकत्वमतःशब्दार्थः ननु धर्मविचारशास्त्रमारंभणीयमित्युक्तं विचारविषयधर्मस्य निरूपणात् तन्निरूपणं च लक्षणप्रमाणाभावात् लक्षणप्रमाणानामेव हि वस्तुसि

लौ॰ मी॰
३

सिद्धिश्च लक्षणादिति सजातीयविजातीयवस्तुभ्यः स्वलक्ष्यस्य व्यावर्तको लोकप्रसिद्धः कश्चिदाकारविशेषो लक्षणं तेन च लक्षणेन लक्ष्ये भाविते सति तन्मः प्रमाणेन तदवगच्छति यथा सास्नादिमती गौरिति गोलक्षणलक्षितं पदार्थमन्विष्य गौरिति चक्षुरादिना तदवगच्छति तथा धर्मस्य नास्ति लक्षणमलौकिकत्वात् न च विहितक्रियात्वं धर्मत्वमिति वाच्यं विहितद्रव्याव्याप्तिप्रसंगात् न च तस्याऽलक्ष्यत्वं फलार्थगुणानुष्ठातरि धार्मिकोऽयमिति व्यवहारस्याभावप्रसंगात् न चेष्टापत्तिः इन्द्रियकामाद्यधिकरणस्य धर्मविचारात्मकत्वाभावेन शास्त्रसंगत्यभावप्रसंगात् फलार्थविहितस्य दध्यादिगुणस्य धर्मत्वाभावे तज्जन्यादृष्टस्यापि धर्मत्वासंभवेन तस्य धर्मः क्षरति कीर्तनादिति श्रुतकीर्तननाश्यत्वाभावप्रसंगाच्च न च विहितत्वमात्रं लक्षणमिति वाच्यम् विवाहार्थमनृतवदनादेरभ्यनुज्ञाविधिविषयस्य धर्मत्वप्रसंगादित्यभिप्रायेण चोदयति अथ क इति क इति किं यागादिरेव धर्मः किं वा चैत्यवंदनादिकमपीत्यर्थः किमिति धर्मलक्षणस्याक्षेपः स च निर्दिष्टः समाधत्ते उच्यत इत्यादिना यागादिरेवेत्येवकारेण चैत्यवंदनादिधर्मत्वं वारयति न चैत्यवंदनादिधर्मे तत्र प्रमाणाभावादित्यर्थः। धर्मस्य लक्षणमाह तल्लक्षणमिति प्रयोजन इति वेदप्रतिपाद्यः स्वर्गादिफले

अथ को धर्मः किं तस्य लक्षणमिति चेदुच्यते। यागादिरेव धर्मः। तल्लक्षणं वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्म इति। प्रयोजनेऽतिव्याप्तिवारणाय प्रयोजनवदिति। भोजनादावतिव्याप्तिवारणाय वेदप्रतिपाद्य इति॥

((ऽर्थरूप इत्यर्थः प्रयोजनवदिति स्वर्गादिफलस्य सुखादिरूपत्वेन तत्प्रयोजनान्तराभावाद्व्यतिवारणमिति भावः भोजनादाविति तृप्त्यादिप्रयोजनवत्यर्थरूप इत्यर्थः वेदप्रतिपाद्य इतीति भोजनादे रागादिनैव प्राप्तत्वात् अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनो द्वात्रिंशत्तु गृहस्थस्य अपरिमितं ब्रह्मचारिणामित्यादिवचनस्य च ग्रासादिनियमपरत्वाद्भवति तेन न द्वारणमिति भावः श्येनादाविति श्येनेनाभिचरन् यजेतेत्यादिवेदप्रतिपाद्ये वैरिमरणानुकूलशस्त्रघातादिरूपहिंसात्मकाभिचारस्वरूपप्रयोजनवतीत्यर्थः नन्वर्थपदस्य श्येनकर्मणि तद्धर्मलक्षणस्यातिव्याप्तिवारकत्वं श्येनस्यार्थत्वात् न हि श्येनो नरकं जनयति येनानर्थः स्यान्नरकजनकस्यैवानर्थत्वात् श्येनस्य तु शत्रुवधमात्रजनकत्वात् किंच चतुर्थे श्येनस्येष्टसाधनत्वेन वेदबोधितत्वाद्धर्मत्वमेवोक्तं तत्फलस्यैव हिंसात्मकाभिचारस्य नरकरूपानिष्टजनकत्वेनाधर्मत्वमुक्तं तच तत्रैवातिव्याप्तिवारकं भवत्विति सांप्रतम् फले विध्ययोगेन तस्य चोदनागम्यत्वाभावात् ॥ ६ ॥

एम॰
३

अन्यथा विधिस्पृष्टे निषेधानवकाशादिति न्यायेन तस्य न हिंस्यादिति निषेधाविषयत्वेन नरकजनकत्वानापत्तेः निषिद्धस्यैव नरकजनकत्वात् तस्मादर्थपदं व्यर्थमेवेत्यत आह अनर्थफलकत्वादनर्थभूत इति श्येनफलस्य शत्रुवधस्य नरकजनकत्वेनानर्थत्वाच्छ्येनस्यापि तद्द्वारानर्थत्वं तस्यापि शत्रुवधद्वारा नरकजनकत्वादिति भावः नच चतुर्थ्यर्थविरोधः तत्र साक्षादिष्टसाधनत्वेन वेदबोधितत्वमात्रमभिप्रेत्य धर्मत्वस्योक्तत्वात् अन्यथा सौत्रार्थशब्दविरोधापत्तेः व्यावर्त्यान्तराभावात् नहि व्यवधानेन कार्यजनके जनकत्वव्यवहाराभावः व्यवधानेनाप्यनुमित्यादिजनके व्याप्त्यादिज्ञाने तद्दर्शनात् ननु श्येनस्यानर्थरूपत्वसंभवति न तस्य चोदनागम्यत्वात् नच सौत्रार्थशब्दस्य वैयर्थ्यमिति वाच्यम् तत्फलव्यावर्तकत्वेनाप्युपपत्तेः अन्यथा फलस्य वेदप्रतिपाद्यत्वाभावेन तदुद्देशेन यागादिषु प्रवृत्त्यभावप्रसंगः इंद्रियागोचरेर्थे प्रमाणान्तराभावात् तस्माच्छ्येनफलस्यापि वेदप्रतिपाद्यत्वेन शत्रुराज्यादिग्रहणप्रयोजनवत्वेन च ग्रंथकारोक्तधर्मलक्षणलक्षितत्वादर्थपदेन वारणं युक्तमिति चेन्न चोदनालक्षणोऽर्थो धर्म इति सौत्रधर्मलक्षणे चोदनापदेनैव तद्वारणात् वस्तुतस्तु शत्रुवधरूपाभिचारस्य श्येनफलस्य लोकतःप्रा

॥ अनर्थफलकत्वादनर्थभूतेश्येनादावतिव्याप्तिवारणायार्थ इति। नच चोदनालक्षणोऽर्थो धर्म इति॥

प्तत्वात्तत्र रागतः प्रवृत्तं पुरुषं प्रति श्येनस्य तत्साधनत्वमात्रं वेदेन बोध्यत इति न तस्य वेदप्रतिपाद्यत्वं न तन्मात्रं तस्य तेनैव वारणेऽर्थपदस्य श्येनवारकत्वेनैवसार्थक्यमिति ध्येयम् यत्तु श्येनादौ धर्मत्वाभावेनाप्तस्य धर्मत्वकथनानुपपत्तिरिति तत्र तस्याप्तस्य कथनेनैवानर्थकत्वोपपत्तेः प्रसिद्धं हि लोके क्रौर्यादिपुरःसरतामसक्रियाया अनर्थरूपत्वमित्यलं तस्मादर्थवत्वे सति प्रयोजनवत्वे च सति वेदप्रतिपाद्यत्वं धर्मत्वमिति धर्मलक्षणमुपपन्नम् यत्तु विहितद्रव्यादावव्याप्तिरिति तन्न द्रव्यादेरर्थत्वस्येंद्रियादिप्रयोजनत्वस्य वेदप्रतिपाद्यत्वस्य च सत्वात् यत्तु स्त्रीषु नर्मविवाहेषु वृत्त्यर्थे प्राणसंकटे गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितमित्याद्यभ्यनुज्ञाविधिविषयेऽनृतवदनादौ धर्मत्वापत्तिरिति तदपि न तत्र निरुक्तस्य धर्मलक्षणस्यापत्त्यभावात् अभ्यनुज्ञाविधिना हि दोषाभावमात्रस्याक्षेपात् प्रयोजनवत्वस्य चानाक्षेपाद्रागप्राप्तप्रयोजनसाधनत्वस्याप्यनृतवद ॥ ९ ॥ ।

नादेर्वेदबोधितप्रयोजनसाधनताकत्वाभावान्नाधर्मत्वापत्तिः तस्माल्लक्षणेन कोऽपि दोष इति सिद्धम् इदमधर्मस्याप्युपलक्षणम् तस्यापि प्रासंगिकशास्त्रविषय
त्वात् तथा चोक्तं धर्मस्योपक्रान्तत्वेऽपि यथाप्रसंगात् प्रतिषेधचोदनार्थो निरूपित इति तथा खंडदेवेनाप्युक्तं यद्यपि धर्मः स्मरतिकीर्तनादिन्यायेन वैशेषिकतं
त्रे च क्रियाजन्यादृष्टे धर्माधर्मशब्दप्रयोगस्तथापि धर्मः स्वनुष्ठितः पुंसामित्यादौ तज्जनकविहितनिषिद्धक्रियायामपि तच्छब्दप्रयोगात्तद्विह प्राधान्ये
न विचार्येते इति तथा च वेदबोधितानिष्टसाधनताकत्वमधर्मत्वमित्यधर्मलक्षणं सिद्धम् अत्रानिष्टसाधनताकत्वं विषभक्षणादेरप्यस्तीति तद्वारणाय वेदेति ब्र
ह्मयागादेरपि वेदबोधितत्वमस्तीति तद्वारणायानिष्टेति एवं धर्मस्य लक्षणमुक्तं तत्र च सौत्रचोदनापदपरित्यागेन वेदपदप्रदानं सूत्रविरुद्धमित्याशंकां परिहरति
न चेत्यादिना न च वाच्यमित्यत्र हेतुमाह तत्रापीति तत्रापि सूत्रेऽपि वेदमात्रपरत्वादिति चोदनाप्रकरणपठितत्वेन वेदपरत्वादित्यर्थः तेन न ब्रह्ममीमांसाविरो

सौत्रलक्षणविरोधः चोदनापदस्य विधिरूपवेदैकदेशपरत्वादिति वाच्यम्। तत्रापि चोदनाशब्दस्य वेदमात्रपरत्वात्। वेदस्य सर्वस्य
धर्मतात्पर्यवत्त्वेन धर्मप्रतिपादकत्वात्। स च यागादिः यजेत स्वर्गकाम इत्यादिवाक्येन स्वर्गमुद्दिश्य पुरुषं प्रति विधीयते॥

धः नापि सौत्रचो
दनापदविरोधः चोदनाशेषार्थवादादेर्वेदस्य स्वप्रकरणपठितस्य तथागृहीतत्वात्प्रकरणान्तरपठितस्य ब्रह्मवाक्यस्याग्रहीतुमशक्यत्वेऽपि ननु सोऽरोदीद्यदरो
दीत्तद्रुद्रस्य रुद्रत्वं स प्रजापतिरात्मनो वपामुदखिददित्यादिवाक्यानां धर्मप्रतिपादकत्वादर्शनात्कथं चोदनापदस्य यागादिधर्मविधायकस्य वेदपरत्वमि
त्याशंक्य विधिशेषस्य स्तुत्यादेः प्रतिपादकत्वेन सर्वस्यापि तादृशवेदवाक्यस्य धर्मतात्पर्यकत्वान्नैवमित्याह सर्वस्येति ननु चोदनालक्षणोऽर्थो धर्म इत्यत्र सूत्रेऽर्थ
त्वे सति चोदनागम्यत्वं धर्मलक्षणं प्रत्यक्षाद्यगोचरेऽपि धर्मे चोदनागम्ये गमकं चोदनावाक्यमेव प्रमाणमिति प्रतीयते न चायुक्तमेकसूत्रवाक्यस्य स्वरूपप्रमाण
परत्वे वाक्यभेदप्रसंगादिति चेत् सूत्रस्यार्थतो धर्मलक्षणत्वेऽपि मुख्यतः प्रमाणपरत्वात् तथा चोक्तं धर्मलक्षणापरं सूत्रमर्थात्प्रमाणप्रतिज्ञेति प्राभाकराः मुख्यतः प्रति
ज्ञार्थाद्धर्मलक्षणत्वमिति वार्तिककारीया इति ननु पूर्वं प्रयोजनवत्त्वमपि धर्मलक्षणे विशेषणं दत्तं न तच्च किं तत्प्रयोजनं किं च तदुद्देशेन धर्मं विधायकं चोदनावाक्य

सचेत्यादिना यद्यपि यथा प्रत्यक्षादीनां धर्मे न प्रामाण्यं तथा चोदनावाक्यस्यापि न तत्र प्रामाण्यं संभवति यतः शक्तिग्रहणपूर्वकं लोके ह्याप्तवाक्यस्य प्रामा
ण्यं दृष्टं शक्तिश्च लोकप्रसिद्धे गवादौ गृह्यते धर्मस्य चालौकिकत्वात्तत्र शक्तिग्रहणं न संभवति शक्तिग्रहणमन्तरेण च हुंफडादिवच्चोदनावाक्यस्यापि धर्मा
बोधकत्वान्न तत्र प्रामाण्यं तथापि प्रभिन्नकमलोदरे मधूनि मधुकरः पिबतीत्यत्र वाक्ये यथा मधुकरपदस्यार्थमजानन् नूनं तदन्यपदार्थांश्च जानन् तत्समभिव्या
हारात्कमलमध्यगने मधुपानं कुर्वति दृश्यमाने भ्रमरे मधुकरशब्दस्य संगतिं गृहीत्वा वाक्यार्थं प्रतिपद्यते तथा कारीर्य्या वृष्टिकामो यजेतेत्यादौ लोकप्रसिद्धार्थवृष्ट्या
दिपदसमभिव्याहारादलौकिकेऽपि भावनापदार्थे चोदनायाः संगतिं गृहीत्वा चोदनावाक्यार्थं प्रतिपद्यत इति धर्मबोधकत्वाच्चोदनाया धर्मे नाप्रमाण्यमऽस्ति न त
था धर्मस्यालौकिकत्वेन प्रमाणान्तरागोचरत्वाद्बाधकस्य च न तत्र स्वतः प्रामाण्याभ्युपगमाच्च चोदनाया धर्मबोधने मानान्तरसापेक्षत्वमपि तस्मात्प्रामाण्यकारण
योरबाधकत्वसापेक्षत्वयोरसंभवाच्चोदनायाः सिद्धं स्वतः प्रामाण्यं धर्मे न तच्च विधायकत्वमुपपन्नमित्यभिप्रेत्योक्तं स्वर्गमुद्दिश्य पुरुषं प्रति विधीयत इति एतेन

**तथाहि। यजेतेत्यत्रास्त्यंशद्वयं यजिधातुः प्रत्ययश्च। प्रत्ययेऽप्यस्त्यंशद्वयमाख्यातत्वं लिङ्त्वं च। तत्राख्यातत्वं दशलकारसाधारणं लि**
**ङ्त्वं पुनर्लिङ्मात्रे ॥**

विध्यादेर्धर्मे प्रामाण्यं प्रथमाध्यायार्थो ध्वनितः मानसविषयत्वाकारेण स्वर्गं सिद्धवन्निर्दिश्य तत्साधनत्वेनाज्ञातस्य यागस्या
नुष्ठेयत्वं प्रतिपाद्यत इति तदर्थः तथा चोक्तं फलस्योद्देश्यत्वं नाम मानसापेक्षो विषयत्वाकार इति ननु यजेत स्वर्गकाम इत्यादौ साधनत्ववाचकशब्दस्याद
र्शनात्कथं स्वर्गसाधनत्वेन वेदे तु यागस्यानुष्ठेयत्वं प्रतिपाद्यत इत्याशंक्य प्रकृतिप्रत्यययोर्विभागपुरःसरं प्रत्ययस्यांशविवेकेन भावनां प्रतिपादयन्नूतन्स्मि
र्थेन यागस्य स्वर्गसाधनत्वं दर्शयति तथा हीत्यारभ्याथ क इत्यन्तप्राक्तनेन ग्रन्थेन यद्वा ननु यागादीनां स्वर्गसाधनत्वं स्वर्गस्य कालान्तरभावित्वादपूर्वमन्तरेण न
निष्पादकत्वासंभवात् न च यागादीनामपूर्वनिष्पादकत्वं स्यादिति वाच्यम् सिद्धस्यैव लोके साध्यनिष्पादकत्वदर्शनात्साध्यस्वभावस्य यागदानादिरूपस्य भावा
र्थस्यापूर्वनिष्पादकत्वासंभवात् तस्मान्न यागादेः स्वर्गसाधनत्वं न तत्र च तदुद्देशेन यागादिविधिरिति चेन्न क्रियामन्तरेण द्रव्यादिसिद्धस्यापि लोके फलविशेषसा धनत्वादर्शनात् न हि पचिक्रियामन्तरे

णकाष्ठस्थाल्यादीनामोदनसाधनत्वं दृश्यते मा भूत्तर्हि तन्नावत्ता भवदिष्टसिद्धिरिति चेन्न साध्यस्यापि भावार्थस्य यागादेरेकपदोपात्तत्वेन भावनाभाव्यनिर्वृत्तिद्वारे णभावनाकरणस्य स्वसाधननिष्पादितस्य सतोऽपूर्वद्वारा भावनाभाव्यस्वर्गनिष्पादकत्वादित्यभिप्रायेण भावनानि रूपयितुं विधेर्विधायकत्वप्रकारं प्रदर्शयितुं च प्रकृत्यादिकं विभजते तथाहीत्यादिना तत्रेति आख्यातत्वलिङ्त्वयोर्मध्य इत्यर्थः उभाभ्यामिति आख्यातत्वलिङ्त्वाभ्यामित्यर्थः भावनैवेत्येवकारेण कर्त्रादिवाचकत्वमाख्यातस्य वारयति भावनासामान्यं लक्षयति भवितुरिति भवितुरुत्पद्यमानस्योत्पत्त्यनुकूलो भावयितुरुत्पादयितुः प्रयोजकस्य व्यापारविशेषो भावनेत्यर्थः प्रयोजकव्यापारत्वादेव णिजन्तेन भावनाशब्देनोच्यते यथोत्पद्यमानस्यौदनस्योत्पत्त्यनुकूलो देवदत्तस्य व्यापारविशेषो भावनेत्यर्थः यथोत्पद्यमानाया देवदत्तप्रवृत्तेरुत्पत्त्यनुकूलः प्रवर्तकस्य चैत्रस्याभिप्रायविशेषः यथा वा यजेत स्वर्गकाम इत्यत्रोत्पद्यमानस्य धात्वर्थस्य स्वर्गस्य वोत्पत्त्यनुकूलः

उभाभ्यामप्यंशाभ्यां भावनैवोच्यते। भावना नाम भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेषः। सा हि द्विधा शाब्दी भावना आर्थी भावना चेति। तत्र पुरुषप्रवृत्त्यनुकूलो भावयितुर्व्यापारविशेषः शाब्दी भावना। सा च लिङंशेनोच्यते। लिङ्श्रवणे ऽयं मां प्रवर्तयतीति मत्प्रवृत्त्यनुकूलव्यापारवानिति नियमेन प्रतीतेः॥

((स्वर्गकामस्य व्यापार उत्पद्यमानायाश्च स्वर्गकामप्रवृत्तेरुत्पत्त्यनुकूलो लिङो व्यापारविशेषः तथा चान्योत्पादनानुकूलो भावकस्य व्यापारविशेषो धात्वर्थादन्यः सर्वधात्वर्थसंबद्धाकारेण भासमानो भावनासामान्यमिति सिद्धम्। तथा चोक्तं अन्योन्यादानुकूलान्सा भावना साध्यरूपिणीति तथाचार्यैरप्युक्तं धात्वर्थव्यतिरेकेण यद्यप्येषा न लभ्यते तथापि सर्वसामान्यरूपेणैवावगम्यत इति भावनां विभजते सा हि द्वेति तत्र शब्दभावनां लक्षयति तत्रेति तत्र तयोः शब्दभावनार्थभावनयोर्मध्य इत्यर्थः परिस्पंदपरिणामविलक्षणः पुरुषप्रवृत्त्यात्मिकार्थभावनोत्पत्त्यनुकूलो लिङादिशब्दस्य व्यापारविशेषः शब्दभावनेत्यर्थः शब्दभावनैव लिङादिना लिङाद्यर्थ इत्याह सा चेति तस्या लिङाद्यर्थत्वेऽनुभवं प्रमाणयति लिङ्श्रवण इति अनुभवमभिनयति मदिति यद्यप्यानुकूल्यमनुभूयमानत्वाल्लिङादिवाच्यत्वं भावनाया लिङादेः प्रवर्तकत्वेपि तत्र भावनारूपव्यापारस्यानुभवादित्याशंक्यात्तं व्यापारं स्व

प्रवृत्त्युत्पत्त्यनुकूलं व्यापारं लिङादिशब्दनिष्ठतयानुभावयित्वा तस्य लिङादिशब्दान्नियमेन प्रतीयमानत्वाल्लिङादिशब्दवाच्यत्वमित्यनुमानप्रदर्शनाय व्याप्तिं द-
र्शयन् तत्परित्यादिना तत्रोदाहरणमाह यथेत्यादि सा च शब्दभावना लोके वेदे च प्रवर्तनात्वेनैव लिङादिशब्दवाच्या तत्त्वेनैव च पुरुषप्रवृत्तिहेतुरिति स्वीकर्तव्यं अ-
न्यथा प्रेषादेरनेकस्य पुरुषाशयविशेषस्य विधिवाच्यत्वानुपपत्तिः स्यात् आनन्त्यव्यभिचारदोषप्रसंगात् प्रवर्तनात्वं च प्रवृत्त्यनुकूलव्यापारत्वं अनुकूलत्वं च ज-
नकत्वं तच्च लोके पुरुषाशयवृत्ति वेदे तु पुरुषाभावात्पुरुषाशयभिन्ने वैदिकस्य चिल्लिङादिशब्दनिष्ठव्यापारविशेषस्य प्रवर्तनात्वमित्याशयेनाह स चे-
त्यादिना अत्रेदं बोध्यम् तस्य व्यापारविशेषस्य प्रवृत्तिविषयस्येष्टसाधनत्वानुमानद्वारा प्रवृत्तिजनकत्वमंगीकरणीयमन्यथा प्रवृत्तिविषयस्येष्टसाधनत्वा-
नाक्षेपे प्रवृत्त्यनुपपत्तिः स्यात् तथा चानुमानं विमतमिदमिष्टसाधनमप्यत्र प्रवर्तनामित्याकारकाद्यनिष्टव्यापारविशेषविषयत्वाद्यन्नैवं तन्नैवं यथा प्रता-
रकवाक्योपस्थितम् अत्र सुखे सुखं मे जायतामित्युदासीनस्य कस्यचिदिच्छाविषयत्वेपीष्टसाधनत्वाभावात्तत्र व्यभिचारव्यावृत्तये हेतावाकारकान्त-

यद्यस्माच्छब्दान्नियमतः प्रतीयते तत्तस्य वाच्यं। यथा गामानयेत्यस्मिन्वाक्ये गोशब्दस्य गोत्वम्। अस्ति च व्यापारविशेषो लौकिकवाक्ये पुरु-
षनिष्ठोऽभिप्रायविशेषः। वैदिकवाक्ये तु पुरुषाभावाल्लिङादिशब्दनिष्ठ एव॥

एवम् प्रतारकस्य तादृशेच्छाविषये व्यभिचारवारणायाप्तेति आ-
प्तत्वं च लोकवेदसाधारणं प्रतारणाद्यजन्यहिताहितोपदेशकर्तृत्वे सति तद्भिन्नोपदेशाकर्तृत्वम् प्रतारणाया सर्वदा हिताहितोपदेशकर्तर्यतिप्र-
संगवारणायाजन्यान्तम् कदाचित्प्रतारणाद्यजन्यतत्कर्तरि तद्दोषवारणायेतरदलं हितस्योपदेशस्तत्संग्रहाय। अहितस्योपदेशश्च तत्परिहाराय बोध्यः। तत-
श्च तत्कर्तृत्वं लोके पुरुषविशेषे वेदे च यजेत स्वर्गकामो न कलञ्जं भक्षयेदित्यादौ वाक्ये भवति तथा च लौकिकवैदिकव्यापारयोर्व्यापारविशेषत्वेन संग्र-
हाय हेतौ विशेषपदम् वैदिकश्च स व्यापारविशेषः प्रवर्तना प्रेरणा विध्यपरपर्याया भावनैव न तु रहितेवाक्ये लिङाद्यर्थः लौकिकस्तु प्रेषो निसर्गः प्रेक्षणाज्ञा।
याच्ञाध्येषणानुज्ञानमतिरित्यादि बहुविधो भवति प्रमाणान्तरप्रमितेऽर्थे पुरुषनिष्ठाप्रकृष्टप्रवर्तना प्रैषः अतिसर्गः कामचारानुज्ञा उत्कृष्टस्य निकृष्टं प्रति प्रवर्तना॥

समं प्रति समस्य प्रवर्तनोत्कर्षनिष्कर्षौदासीन्येन ज्ञातानुज्ञानुमतिश्चोच्यते तेन च प्रैषादयो ज्ञानविशेषा इच्छाविशेषा वा चेतनधर्माः पुरुषस्याशयविशेषा एवे त्यभिप्रायेण ग्रन्थकारेणाप्युक्तं लौकिकवाक्ये पुरुषनिष्ठोऽभिप्रायविशेष इति तथा च तेन एव लोके लिङाद्यर्थः तस्माल्लोके वेदे च व्यापार एव प्रवर्तनाख्यो लिङादिवाच्योऽर्थ इति फलितम् ननु किमत्र वाच्यताख्यशक्यतावच्छेदकं शक्यतावच्छेदकं चान्यथातिप्रसंगापत्तेरिति चेदत्रोच्यते लौकिके हि प्रैषादौ वैदिके च भावनारूपे व्यापारे साधारणं व्यापारत्वमेव पूर्वोक्तप्रवर्तनात्वरूपं शक्यतावच्छेदकमस्ति च लौकिके लिङादिपदोपस्थाप्ये प्रवृत्तिहेतुभूतेष्टसाधनताया नुमितिजनके पुरुषाशयविशेषे प्रवृत्तिप्रयोजकव्यापारत्वं वेदेऽपि लिङादिशब्दश्रवणादुत्तरकाले यागादिप्रवृत्तिदर्शनेनेयं देवदत्तस्य यागादिप्रवृत्तिः व्यापाराख्यप्रवर्तनाज्ञानपूर्विका अन्यप्रेरितप्रवृत्तित्वात् चैत्राशयज्ञानजन्यमैत्रगवानयनप्रवृत्तिवदित्यलौकिकमेव व्यापारमपौरुषेये वेदे इच्छाद्यबाधाद नुमापयन्प्रतीतेर्लिङादिज्ञानान्वयव्यतिरेकानुविधायित्वेन तत्र लिङा दिवाच्यत्वं च परिकल्प्यतेऽस्य पूर्वोक्तविधया प्रवृत्तिहेतुभूतेष्टसाधनताद्यनुमापक

अत एव शाब्दीभावनेति व्यवह्रियते ॥ ननु तथा बालस्तत्रापि प्रवृत्तिप्रयोजकव्यापारत्वं प्रतिपद्यते कथं तर्हि लोकेऽपि व्यापारप्रतिपत्तिरिति चेदित्थं उत्तमवृद्धस्य सविधिकवाक्यश्रवणोत्तरकालभाविनीं मध्यमवृद्धस्य गवानयनप्रवृत्तिमुपलभ्य बालो लोकेऽपि तत्प्रयोजकव्यापारमनुमिमीते तथा हि गवानयनानुकूलोत्तमवृद्धवाक्यश्रवणोत्तरभाविनी मध्यमवृद्धप्रवृत्तिः प्रवर्तनाज्ञानपूर्विका अन्यप्रेरितप्रवृत्तित्वात् मद्रोदनपूर्वकं मदीयभोजनादौ मदभिप्रायजन्यमन्मातृप्रवृत्तिवत् अत्र स्वतःसिद्धप्रवृत्तौ विष्टसाधनताज्ञानजन्यस्वप्रवृत्तौ च व्यभिचारवारणायान्यप्रेरितेति विशेषणम् किं च प्रवर्तनाज्ञाने उत्तमवृद्धवाक्यजन्यत्वं तदन्वयव्यतिरेकानुविधायित्वाद् दृष्टान्वयव्यतिरेकानुविधायि घटवत् किं च यस्माच्छब्दाद्यत्प्रतीयते तत्तद्वाच्यं घटपदवाच्यघटत्ववदित्युत्तमवृद्धवाक्यस्समुग धाकारांशशक्तिं व्यापाराख्यप्रवर्तनायामवधार्य तत्र चावापोद्वापाभ्यां विधिशक्तिं तस्यामवधारयति एवं सर्वत्रोह्यम् तस्माल्लोकवेदसाधारण्येन व्यापार त्वमेव शक्यतावच्छेदकमिति सिद्धम् शक्यतावच्छेदकं तु लिङ्लेट्लोट्त्वादिकं बोध्यम् किं च यद्यपि निरुक्तविधया व्यापारत्वेनैव सामान्यरूपेण व्यापार ६
ज्ञानं तत्र विशेषज्ञानसापेक्षमिति प्रसंगवारणाय तथापि प्रमाणविशेषेण विशेषबोधः सुलभः यथा घटवद्भूतलमित्यादौ घटपदाद् घटत्वावच्छिन्नघटमात्र एम
प्रतीतावपि तस्य योग्यसंसर्गेण ५० ॥ ६ ॥

भूतलादावन्वये बुद्धे तत्संसर्गस्य तत्त्वेन जिज्ञासायां प्रत्यक्षादिप्रमाणान्तरेणैव संयोगत्वादिना संयोगादिरूपसंसर्गप्रतीतिर्भूतलवृत्तिघटविशेषप्रतीति
श्च भवति तथा लिङादिपदाद्व्यापारत्वावच्छिन्नव्यापारमात्रस्योपस्थितावपि तस्याख्यातोपात्तार्थभावनायां योग्यसंसर्गेणान्वये बुद्धेः पश्चात्तत्संसर्गस्य तत्
त्वेन जिज्ञासायां प्रवृत्तिप्रयोजकत्वानुपपत्त्यादिना प्रमाणेनैव विशेषरूपेण संसर्गविशेषप्रतीतिर्यागादिप्रवृत्तिसंबंधिव्यापारविशेषप्रतीतिश्च भवति संस
र्गविशेषस्तु तत्र प्रवृत्तिप्रागभावकाले यल्लिङादिपदज्ञानं तेनोत्पादितं यत्प्रेरणाज्ञानं तज्जन्येष्टसाधनतानुमितिप्रयोज्यत्वं तेन च व्यापारवतो यागादिप्रवृ
त्तिरिति भवति विशेषनिर्णयः एवं च लोके वेदे च लिङादिश्रवणे प्रेषादिरूपस्य वक्त्रभिप्रायस्य भावनारूपस्य च व्यापारविशेषस्य व्यापारत्वेनैव रूपेण प्रती
तिर्न विशेषरूपेण तथैव शक्तिग्रहात् विशेषरूपेण प्रतीतिस्तु लोकेऽजहल्लक्षणयैव वेदे तु विशेषरूपाकांक्षायां प्रेषादिरूपस्य वक्त्राशयविशेषस्यायोग्ये
येवेदेऽसंभवेन लिङादिशब्दनिष्ठ एव प्रेरणापरपर्यायः कश्चिद्व्यापारो विशेषरूपः इत्युक्तमेव तस्मान्निरुक्तव्यापार एव लिङाद्यर्थो नेष्टसाधनत्वादिरि
तिसिद्धम् नन्विष्टसाधनत्वमेव प्रवर्तनात्वेन रूपेण वेदे लिङाद्यर्थ इति मण्डनमिश्रा वदन्ति अर्थभावनाभिधानानुकूलाया लिङादिनिष्ठशक्तेरेवाभि
धाख्यायाः प्रवर्तनात्वेन रूपेण लिङा दिवाच्यत्वपरिकल्पनं ज्ञानस्य प्रवृत्तिप्रतिकारणत्वमात्रे वेदे कल्प्यत इति तु पार्थसारथिर्वदन्ति लिङश्रव
णोत्तरं प्रवृत्तिदर्शनात् प्रवृत्तिसामग्रीजननद्वारा लिङादिज्ञानस्य प्रवृत्तावुपयोग इति तावदविवादं तत्सामग्री च कृतिसाध्यत्वप्रकारकेच्छारूपा चिकी
श्च र्षा तस्याः स्वरूपसत्याः कारणत्वात्तत्र लिङादिज्ञानस्यानुपयोगेऽपि चिकीर्षाकारणीभूतज्ञाने तदुपयोगः कल्प्यते तच्च बलवदनिष्टाननुबंधित्वकृ
तिसाध्यत्वज्ञानमिष्टसाधनत्वज्ञानं च अन्यतमाभावे इतरद्वयसत्त्वेऽपि मधुविषान्नभोजने चन्द्रस्पर्शे मण्डलीकरणादौ वा प्रवृत्त्यनुत्पत्तेः तस्माल्लिङादेस्तान
न्त्रितयज्ञानजननाल्लिङादेर्बलवदनिष्टाननुबंधित्वे कृतिसाध्यत्वे इष्टसाधनत्वे च शक्तिरिति तार्किकाः तस्मात्कथं व्यापारस्य लोकवेदसाधारणस्य
लिङाद्यर्थत्वमिति चेदुच्यते न तावदिष्टसाधनत्वं लिङाद्यर्थत्वे इष्टसाधनत्वज्ञानादेव प्रवृत्त्युपपत्तौ गुरुप्रेरितोऽहं जलमानयामीत्यादौ गुर्वादेः प्रवर्तक
त्वव्यवहारानुपपत्तेः न च प्रवृत्तिजनकेष्टसाधनताबोधकलिङुच्चारयितृत्वात्तस्य प्रवर्तकत्वव्यवहार इति वाच्यम् राजप्रेरितपदातेस्तादृशलिङुच्चा

रयितृत्वेनप्रवर्तकत्वापत्तौ पदातिप्रेरितोऽहं न गामानयामि किंतु राजप्रेरित इति पदातौ प्रवर्तकत्वाभावव्यवहारानुपपत्तेः न चान्याप्रेरितत्वे सति तादृशलि
ङ्गत्वा रयितृत्वं प्रवर्तकत्वमिति वाच्यं पिशुनप्रेरिते राज्ञि प्रवर्तकत्वानुपपत्तेः ततश्च तादृशव्यवहारबलात्प्रवृत्तिकारणीभूतज्ञानविषयाशयविशेषाश्रयत्वे
नैव राजादेः प्रवर्तकत्वं वाच्यं न चाशयविशेषस्य लिङादिवाच्यत्वाभावेन तत्स्तज्ज्ञानं संभवति तस्माल्लिङादिवाच्यत्वं तस्येति नाप्यर्थभावनाभिधानानुकू
लत्वापाशङ्के लिङाद्यर्थत्वं संख्याभिधानानुकूलशक्त्या लिङादिनैव वा विनिगमनाविरहात् नापि बलवदनिष्टाननुबन्धित्वादेर्लिङाद्यर्थत्वं शक्तित्रयकल्प
नायां गौरवप्रसंगात् बलवदनिष्टाननुबन्धित्वज्ञानाभावेऽपि बलवदनिष्टानुबन्धित्वज्ञानाभावमात्रेणेष्टसाधनत्वज्ञानादिनैव प्रवृत्तेरनुभवसिद्धत्वाच्च
तस्माद्बलवदनिष्टानुबन्धित्वज्ञानं प्रवृत्तिप्रतिबन्धकं तदभावश्च स्वरूपसन्नेव तत्कारणमिति स्वीकर्तव्यम् तस्मान्निरुक्तस्य व्यापारस्यैव लिङाद्यर्थत्वं सर्वत्रेष्ट

सा च भावनांशत्रयमपेक्षते सा ध्यं साधनमितिकर्तव्यतां च किं भावयेत्केन भावयेत्कथं भावयेदिति तत्र साध्याकांक्षायां वक्ष्यमाणां
शत्रयोपेता आर्थी भावना साध्यत्वेनान्वेति एकप्रत्ययगम्यत्वेन समानाभिधानश्रुतेः ॥

((साधनत्वादेरिति सिद्धम् अभिधाभावनामाहुरन्या
मेव लिङादयः इति वार्त्तिकानुरोधेनाह अत एवेति शब्दनिष्ठत्वादेवेत्यर्थः अभिधाशब्देनाभिधीयतेऽनेनेति व्युत्पत्त्या शब्द उच्यते तस्य व्यापारविशेषो भावनां तां
स्वनिष्ठामन्यामर्थभावनाभिन्नां लिङादय आहुरिति वार्त्तिकवचनार्थः सा च निरुक्ता शब्दभावना साध्याद्यंशत्रयापेक्षयाऽतादृशांशत्रयवती भवतीत्याह
सा चेत्यादिना साध्याकांक्षामभिनयति किमित्यादिना तत्रेति साध्यादिभावनांशेष्वपीत्यर्थः वक्ष्यमाणेति वक्ष्यमाणयागादिरूपसाध्याद्यंशत्रयोपेतेत्यर्थः ए
कप्रत्ययगम्यत्वेनेति समानाभिधानश्रुतेः प्रमाणार्थभावनाया एव शब्दभावनासाध्यत्वमनयोरेकलिङादिप्रत्ययगम्यत्वेनैकलिङादिप्रत्ययशब्दात्मि
कायाः समानाभिधानश्रुतेः सत्त्वादित्यर्थः एतेन यागादेः साध्यत्वाशंका निरस्ता तस्यैकपदादिश्रुतिगम्यत्वेनैकप्रत्ययरूपसमानाभिधानश्रुत्यगम्य
त्वात् शब्दार्थभावनयोस्त्वेकाभिधानश्रुतिगम्यत्वेन सन्निकृष्टयोर्भवतीति विवक्षितः संबन्ध इति द्रष्टव्यम् ननु संख्यादीनामपि शब्दभावनाभाव्यत्वं स्यात्तेषामप्ये

संख्यादीनामित्यादिना आदिना कालादिपरिग्रहः संख्यादीनां साध्यत्वेनान्वयाभावे हेतुमाह अयोग्यत्वादिति अपुरुषार्थत्वेन तत्साधनताशून्यत्वेन च संख्या
दीनां साध्यत्वयोग्यतानाश्रयत्वादित्यर्थः शब्दभावनाया भाव्यसाकांक्षत्वाङ्गत्वान्तरस्य चादर्शनादर्थभावनायाश्च विधिप्रयोज्यत्वात्पुरुषार्थानुसंबंधित्वाच्च तस्या
एव समानाभिधानश्रुतेः शब्दभावनाभाव्यत्वमिति संप्रदायतात्पर्यम् तदेवमर्थभावनायाः पुरुषार्थहेतुत्वपाशब्दभावनाभाव्यत्वमुक्तं तत्र च करणाकांक्षायां करणा
न्तरस्यादर्शनात्करणांशे लिङादिविधिशब्दज्ञानमेवाह साधनेत्यादिना यद्यपि लिङादिशब्दव्यापारस्य सर्वदा पुरुषप्रवृत्तिजनकत्वं किं स्यादित्याशंकाकरणारू
पसहकार्यभावात्सैवमित्याशयेनाह साधनेत्यादिना अत एव ग्रंथकारेणाप्युक्तभावनायाकरणत्वेनैवान्वयं लभते न तु शब्दभावनात्वेनापि कल्पनायां गौर
वप्रसंगात् ज्ञानस्य पुरुषनिष्ठत्वेन शब्दनिष्ठत्वाभावाच्छब्दभावनात्वासंभवप्रसंगाज्ज्ञानस्य तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वेन शब्दभावनाया नित्यत्वव्याघा
तप्रसंगाच्च शब्दभावना तु निरुक्त एव व्यापारविशेष इति भावः लिङादिज्ञानमित्यत्र लिङादिधर्मस्य भावनारूपस्य वा ज्ञानं विवक्षितं तदेव च शब्दभावनायाः कर

संख्यादीनामेकप्रत्ययगम्यत्वेऽप्ययोग्यत्वान्न साध्यत्वेनान्वयः। साधनाकांक्षायां लिङादिज्ञानं करणत्वेनान्वेति। तस्य च करणत्वं भा
वनोत्पादकत्वेन तत्पूर्वमपि तस्याः शब्दे सत्त्वात्॥ एणांशम् तथा चोक्तं लिङादिशब्दव्यापारः पुरुषप्रवृत्तिलक्षणार्थभावनालक्षणभाव्यनिष्पत्तौ स
ज्ञानकरणक इति द्रष्टव्यम् ज्ञापकत्वमत्र प्रकाशकत्वमेव तथा चैतादृशधर्मो ज्ञाने सत्येव पुरुषप्रवृत्तिदर्शनेन तत्स्य वक्ष्यमाणपुरुषप्रवृत्तिनिर्वर्तकत्वे
न शब्दभावनाकरणत्वं नानुपपन्नमिति भावः अन्ये त्वाहुः विधिशब्दस्य पुरुषप्रवृत्तिरूपार्थभावनाज्ञानहेतुर्व्यापारस्तद्वाचकशक्तिमत्तया विधिशब्द
ज्ञानस्यैव च तस्य प्रवृत्तिहेतुर्व्यापार इति प्रवर्तनेनाभिनीयकलभते ज्ञानद्वारेणैव शब्दस्य प्रवृत्तिजनकत्वात् ज्ञानजनकव्यापारातिरिक्तव्यापारकल्पने मा
नाभावात् ज्ञानकरणकश्च व्यापारस्तस्य स्वज्ञानं शक्तिज्ञानं शक्तिविशिष्टस्वज्ञानं च तन्मध्ये द्वयोरन्यतरस्य शब्दभावनात्वं तृतीयस्य तु तत्र करणत्वमिति वि
वेक इति तस्य च लिङादिज्ञानस्य शब्दभावनोत्पादकत्वेन तत्करणत्वं संभवति तस्माल्लिङादिज्ञानात्पूर्वमपि तस्याः शब्दभावनायाः शब्दे विद्यमानत्वेन तद्रूपा

लौ० मी० ८

तस्य चेत्यादिना ननु कथं लिङादिज्ञानस्य भावनासाधकत्वेन तत्करणत्वं न स्वीक्रियते चक्षुरादेस्तत्सन्निकर्षस्य वा रूपादिज्ञानसाधकत्वेनैव तत्करणत्वदर्शनादिति चोदयति किंत्विति समाधत्ते भावनेत्यादिना यथा कुठारस्य छिदिक्रियाभाव्यद्वैधीभावनिर्वर्तकत्वेन छिदिभावनाकरणत्वं तथा लिङादिज्ञानस्य शब्दभावनाभाव्यार्थभावनानिर्वर्तकत्वेन शब्दभावनाकरणत्वमिति भावः तथा चोक्तं कुठारादीनामपि छिदिक्रियाभाव्यद्वैधीभावनिर्वर्तनद्वारेण छिदिभावनाकरणत्वप्रदर्शनादिति किं च रूपादिज्ञानस्य चक्षुःसन्निकर्षादेः प्रागसत्त्वेन तस्य तत्साधकत्वेन तत्करणत्वं शब्दभावनायास्तु प्रागपि सत्त्वेन लिङादिज्ञानस्य तत्साधकत्वेन तत्करणत्वासंभवेपि तद्भाव्यार्थभावनानिर्वर्तकत्वेन तस्य शब्दभावनाकरणत्वं कुठारवदुपपद्यते ननु कुठारस्य तु छिदिक्रियानिर्वर्तकत्वं संभवतीति चेत्सत्यम् दृष्टांतस्तु यथा कुठारस्य छेदननिर्वर्तकत्वेपि तस्याः फलत्वेन छिदिक्रियाभाव्यद्वैधीभावफलनिर्वर्तकत्वेनैव तत्करणत्वमिति द्रष्टव्यः ननु पुरुषो लिङादिज्ञानेन स्वप्रवृत्तिं भावयेदित्युक्ते सर्वेषामेव यागादौ प्रवृत्तिः किं न स्यादित्याशंक्य सर्वेषां प्राशस्त्याज्ञानाभावेन न सर्वेषां प्रवृत्त्यापत्तिः किंतु यस्य पुरुषस्य कर्मप्रा

किंतु भावनाज्ञापकत्वेन शब्दभावनाभाव्यनिर्वर्तकत्वेन वा इति कर्तव्यताकांक्षायामर्थवादज्ञाप्यप्राशस्त्यमिति कर्तव्यतात्वेनान्वेति ॥

शस्त्यज्ञानं भवति तस्यैव तत्फलरागादिना तत्र प्रवृत्तिरित्याशयेनाह इतिकर्तव्यमित्यादिना कर्तव्यस्येति प्रकार इतिकर्तव्यताइतिशब्दस्य प्रकारवाचकत्वात् प्रकारश्च सामान्यस्य भेदको विशेष इत्यर्थः तथा च कर्तव्यसामान्यस्य भेदकः कर्तव्यविशेष एव प्राशस्त्यरूपः शब्दभावनायामितिकर्तव्यतात्वेनान्वयं लभते तच्च कर्तव्यसामान्यं लिङादिज्ञानरूपं भावनाकरणमेव करणगतप्रकाराकांक्षापूरकस्येतिकर्तव्यतात्वात् लिङादिज्ञानेन भावयेत्कथमित्याकांक्षायां कर्मप्राशस्त्यविशिष्टेनेति प्रकारान्वयात् तस्य च प्राशस्त्यविशेषस्य ज्ञापकोर्थवादविशेष एवेति भावः स चार्थवादः स प्रजापतिरात्मनो वपामुदखिददित्यादिः तं चार्थवादं च तु विधविभागेन निरूपयिष्यामोर्थवादनिर्णये ननु किं नाम प्राशस्त्यं यच्छब्दभावनायामितिकर्तव्यतात्वेनान्वेतीति चेत् विधेयतावच्छेदकसामानाधिकरण्येन बलवदनिष्टाननुबंधि
त्वे सति क्रियाजन्यदुःखापेक्षयाऽधिकसुखजनकत्वं प्राशस्त्यं तदेव च विध्यर्थवादेषु लक्ष्यते निषेधार्थवादेषु तु निषेध्यतावच्छेदकसामानाधिकरण्येन क्रियाफला राम० ८
पेक्षयाधिकदुःखसाधनत्वमप्राशस्त्यं लक्ष्यत इति बोध्यम् लक्षणा च सर्वत्र वाक्ये लक्षणायां बाधकाभावादर्थवादस्य पदसमु ॥ ६ ॥ ॥ ६ ॥ ६ ॥

त्रायेवैकस्मिन्नेववापदे भवतीतरपदानितान्यर्थग्राहकाणीत्यनाग्रहः तच्च प्राशस्त्यादिकमिति कर्तव्यतात्वसंबंधेन शब्दभावनायामन्वेतीति बहवो वदंतिस्वरूपसंबं
धेनधात्वर्थो दावेवान्वेतीति केचित् वस्तुतस्तु प्राशस्त्यं स्वविषयकज्ञानजन्येष्टविषयकोत्कटरागजन्यत्वसंबंधेन प्रवृत्तावन्वेति अप्राशस्त्यमपि स्वविषयकज्ञानजन्या
निष्टविषयकोत्कटद्वेषप्रयोज्याभावप्रतियोगित्वसंबंधेन प्रवृत्तावेवान्वेतीत्यन्यत्र विस्तरः इत्थं च पुरुषप्रवृत्तिलक्षणार्थभावनाभाव्यको लिङादिज्ञानकरणकः
स्वज्ञानकरणको वास्तुतिनिंदार्थवादबोधितप्राशस्त्यादीतिकर्तव्यताको लिङादिशब्दस्य व्यापारविशेषः शब्दभावना लिङादिशब्देन लिङंशेनोच्यते तत्र चा
र्थवादबोधितप्राशस्त्यादिनोपकारं संपाद्य लिङादिज्ञानेन पुरुषप्रवृत्तिलक्षणामर्थभावनां भावयेद्यागविषयप्रवृत्तिलक्षणां कुर्यादिति फलितम् अर्थभावनालक्ष
यति प्रयोजनेच्छेत्यादिना प्रयोजनस्य स्वर्गादिरूपफलस्य येच्छारागविशेषः फलेच्छासाधनमुपसंक्रामतीति न्यायात्तेन च रागविशेषेण जनितो यो यागादिक्रि
याविषयः पुरुषस्य व्यापारविशेषः सार्थीभावनेत्यर्थः ननु कोयं व्यापारो नाम योर्थभावनात्वेनोच्यते न तावत्प्रयत्नमात्रं रथो गच्छतीत्यत्राव्याप्राप

## प्रयोजनेच्छाजनितक्रियाविषयव्यापारआर्थीभावना॥

तेः स्पन्द इति चेन्न। देवदत्तो ग्रामं गच्छति स्वर्गकामो यागेन स्वर्गं कुर्यादित्यादौ गमनाद्यनुकूलकृतावव्याप्तेः कृतेश्चेन्न नाधर्मत्वेन न तत्र स्पंदत्वाभावा
त् गच्छतीत्यादौ गमनं करोतीति करोति प्रयोगदर्शनात् स्पन्दत इति स्पंदिप्रयोगादर्शनाच्चेति चेत्केतिरत्राहुः स्वर्गादिफलेच्छाजनितो यागादिक्रियाविषयः
प्रयत्न एव सव्यापारोर्थभावनात्वेनोच्यते न च रथो गच्छतीत्यत्राव्याप्तिः रथवोढृणामश्वानां प्रयत्नं रथे समारोप्य रथो गच्छतीति प्रयोगोपपत्तेः येषां मते
ऽन्योन्याद्यनुकूलव्यापारसामान्यमेवार्थभावना तेषामपि रथे गमनव्याप्तिरिक्तस्य व्यापारविशेषस्यानुपलब्धेः रथो गच्छतीति प्रयोगस्योपचारिकत्वमंतरेण निर्वा
हात्तस्यान त्वं स्वीकर्तव्यम् स च प्रयत्न आख्यातसामान्येन कथ्यते यजते पचति गच्छतीत्यादावाख्यातश्रवणे प्रयत्नप्रतीतेः यागं कुर्यात् पाकं करोति गमनं करोतीति
प्रयत्नार्थककरोतिनाऽऽख्यातस्य विवरणदर्शनात् प्रयत्न एवाख्यातसामान्यस्यार्थो न स्पन्दादिः प्रयत्नपूर्वकगमनादिकर्तृ गमनं करोति पाकं करोतीति प्रयत्नार्थे

धी॰ मी॰ ७

क करोति प्रयोगदर्शनात् वायुवेगादिना स्यन्दमानेत्वयं वायुवेगादिना स्यन्दते न किंचित्करोतीति तत्प्रतिषेधदर्शनाच्चेति अन्ये त्वाचार्या आहुः अन्योत्पादना
नुकूलाख्यः स व्यापारो योऽर्थभावनात्वेनोच्यते यस्मिन् व्यापारे कृते करणस्य फलोत्पादनसामर्थ्यं भवति तादृशो व्यापार इति यावत् स एव च व्यापार आख्याता
सामान्यस्यार्थः यजेत स्वर्गकाम इत्याख्यातश्रवणे हि यागेन तथा व्याप्रीयेत यस्मिन् व्यापारे कृते यागः स्वर्गजनने समर्थो भवतीति भवति बोधः कुठारेण छिं
द्यादिति कुठारेण तथा व्याप्रीयेत यस्मिन् व्यापारे कृते कुठारश्छेदने समर्थो भवतीति वक्तृस व्यापारोऽन्योत्पादनानुकूलत्वे च सामान्येन रूपेणाऽऽख्यातादेवावग
म्यते पश्चात्तु कथंभावाकांक्षायां विशेषरूपेण क्वचिदुद्यमननिपतनादिरूपेण क्वचित्त्वभ्यन्त्वाधानादिब्राह्मणतर्पणान प्रवृत्तिरूपेण चावगम्यते न र
थो ग्रामं गच्छतीत्यत्राव्याप्तिरन्योत्पादनानुकूलव्यापारस्य रथगमनव्यतिरिक्तस्याभावादिति वाच्यम् रथस्तथा गमनेन व्याप्रीयते यस्मिन्व्यापारे कृते
गमनेन ग्रामप्राप्तिर्भवतीति प्रतीतेः कोऽसौ व्यापार इत्याकांक्षायां पूर्वोत्तरावान्तरदेशविभजनसंयोजनरूप इति पश्चादवगम्यते उद्यम्य निपात्य
कुठारेण छिनत्तीति वत्पूर्वप्रदेशेन विभज्योत्तरप्रदेशेन च संयोगं लब्ध्वा रथो ग्रामं गच्छतीति प्रत्ययात् न चात्र गमनमात्रमाख्यातार्थ इति वाच्यम् अनन्यल
भ्यो हि शब्दार्थ इति न्यायात्तस्य धातुलभ्यत्वेनाख्यातार्थत्वायोगात् एवं चैत्रः प्रयतत इत्यत्रापि चैत्रस्तथा व्याप्रीयते यथा प्रयत्नो भवतीति प्रयत्नानुकूलव्यापा
र एवाख्यातस्यार्थो न तु प्रयत्न एव प्रयत्नस्य धातुमात्रलभ्यत्वात् कोऽसौ व्यापार इत्याकांक्षायां पश्चाज्ज्ञानेच्छादिकमवगम्यते न च रथो गच्छतीत्यादिप्रयोग
स्यौपचारिकत्वं स्यादिति वाच्यम् मुख्ये संभवत्यौपचारिकत्वस्यान्याय्यत्वात् न च गच्छति गमनं करोति पचति पाकं करोतीति प्रयत्नार्थककरोतिनाख्यातस्य स
मानार्थकत्वदर्शनात्प्रयत्न एवाख्यातस्यार्थ इति वाच्यम् चैत्रः प्रयतत इत्यादौ व्यभिचारेण प्रयत्नस्याऽऽख्यातार्थत्वासंभवात् औपचारिकत्वस्य निरस्त
त्वाच्च करोत्यर्थोऽपि व्यापारविशेष एव न तु प्रयत्नः चैत्रो गच्छति रथो गच्छतीति चेतनाचेतनकर्तृकाख्यातसमानार्थकस्य करोतेः प्रयत्नार्थकत्वासंभवात् तस्मा
दन्योत्पादनानुकूलव्यापार एवाख्यातसामान्यस्यार्थ इति सिद्धमिति ननु प्रयोजनेच्छाजनितक्रियाविषयव्यापार इति मूलग्रन्थे स्वर्गादिप्रयोजनेच्छाजनित राम
स्य यागादिविषयकव्यापारस्य प्रयत्नत्वमेव कल्प्यते चेतनव्यापारत्वात्तत्र प्रयत्न एवाख्यातार्थ इति चेन्मैवं तथापि न सर्वत्र प्रयत्नार्थकत्वमाख्यातस्य संभ ६

ततत्र च यागादिविषयकपुरुषप्रयत्नादेरपि कृतिशब्दाभिधेयस्यान्योत्पादनानुकूलव्यापारत्वेनैव सामान्याकारेणाख्यातार्थत्वं न तु विशेषरूपेण विशेषरूपेणा-
नुपस्थाः स्वर्गकामो भवति कोऽसौ व्यापार इति विवक्षायां तस्मात्सर्वत्रान्योत्पादनानुकूलव्यापारसामान्यमेवाख्यातार्थ इति सिद्धम् किंच यागादिकरणेन धात्वर्थेन स्व-
साधनद्रव्यादिनिष्पादिते न स्वर्गादिफलोत्पत्तौ येयमनुकूलव्यापारस्वरूपा कृतिशब्दाभिधेया फलोत्पादनाऽऽर्थी भावना सेयं यजत्यादिधातूनामन्यतमेनकेन-
चिदप्यभिधीयते सर्वधात्वर्थानुगतरूपत्वात् नापि धात्वर्थसामान्यमेव सा प्रतिधात्वर्थविलक्षणत्वात् तथा हि स्वर्गकामो यजेतेत्यत्र यागेन स्वर्गं भावयेदि-
ति बोधः तत्र च यागविषयकव्यापारस्य स्वर्गं प्रति विलक्षणमानुकूल्यं भवति ओदनकामः पचेदित्यत्र च पाकेनौदनं भावयेदिति बोधः पाकव्यापारस्य चौद-
नं प्रति विलक्षणमेवानुकूल्यं नैरोग्यकामो भेषजपानं कुर्यादित्यत्र भेषजपानेन नैरोग्यं कुर्यादिति बोधः भेषजपानव्यापारस्य च नैरोग्यं प्रति विलक्षणमेव।

सा चाख्याततत्त्वांशेनोच्यते। आख्यातसामान्यस्य व्यापारवाचित्वात्। सा प्यंशत्रयमपेक्षते साध्यं साधनमितिकर्तव्यतां च किं भावयेत्के-
न भावयेत्कथं भावयेत् इति। तत्र साध्याकांक्षायां स्वर्गादिफलसाध्यत्वेनान्वेति। साधनाकांक्षायां यागादिः करणत्वेनान्वेति ॥ ६॥

चानुकूल्यं भवति तथा च विलक्षणानुकूल्यविशिष्टस्य व्यापारविशेषस्य प्रतिधात्वर्थविलक्षणरूपत्वमेवान्यथा फलविभागानुपपत्तिः स्यात् ततश्च भावना-
त्वसामान्यं तु भिन्नासु भावनासु व्यक्तिष्वनुवर्तते नाम नैतावता प्रकृत्यर्थसामान्यं भावना तस्माद्यजत्यादिधात्वर्थाद्विशेषरूपात्सामान्यरूपा च भिन्नैवाख्यातप्र-
त्ययसामान्यार्थभूताऽऽर्थी भावना ततश्च सा तेनैवोच्यत इत्याशयेनाह सा चाख्याततत्त्वांशेनोच्यत इति तत्र हेतुमाह आख्यातेत्यादिना व्यापारवाचित्वादिति
त्र अन्योत्पादनानुकूलव्यापारसामान्यवाचित्वादित्यर्थः सा निरुक्तार्थी भावना व्यापारविशेषात्मिका व्यापारविशेषाणां चाद्धिदिभावनारूपव्यापारस्य हे-
धीभावरूपफलादिसापेक्षत्ववत्फलादिसापेक्षत्वाद्व्याद्यंशत्रयमपेक्षत इत्याशयेनाह सा प्यंशत्रयमपेक्षत इति अपेक्षामभिनयति किं भावयेदि-
त्यादिना तत्रेति साध्यादीनां भावनांशानां त्रयाणां मध्य इत्यर्थः तस्यां च भावनायां स्वर्गादिफलमेव पुरुषविशेषणमपि साध्यत्वेनान्वेति पुरुषार्थत्वात् न तु धात्व-

लौ· समानपदोपात्तोप्यपुरुषार्थत्वात्तत्त्वेनान्वयं लभत इत्याह स्वर्गादिफलमिति किंच तस्यां पुनः फलभावनायां प्रत्ययवाच्यभूतायामेकपदोपात्तः प्रकृत्यर्थ एव
मी· करणत्वेनान्वेति संनिकृष्टत्वात् ननु पदान्तरोपात्तद्रव्यादिविप्रकृष्टत्वात् न च साध्यरूपस्य प्रकृत्यर्थस्य कथं फलसाधकत्वमिति वाच्यम् द्रव्यादिस्वसाधन
१० निष्पादितस्य साध्यस्यापि प्रकृत्यर्थस्य फलं साधयितुं शक्यत्वादित्युक्तमेवेत्याशयेनाह यागादिकरणत्वेनान्वेतीति किंच कुठारेण छिनत्तीत्यादौ कथमिति
कथंभावाकांक्षायामुद्यम्य निपात्येत्युद्यमननिपतनादेरिति कर्तव्यतात्वेनान्वयवद्यागेन स्वर्गं भावयेदित्यत्रापि कथमिति कथंभावाकांक्षायामग्न्यन्वाधा
नप्रयाजावघातादिभिरुपकारं संपाद्येति प्रयाजाद्यंगजातमिति कर्तव्यतात्वेनान्वयं भजत इत्याशयवानाह इतिकर्तव्यताकांक्षायामित्यादिना कथंभावाकां
क्षापूरकत्वमिति कर्तव्यतात्वं निरुक्तं वेति कर्तव्यताशब्दार्थो बोध्यः भवति च प्रयाजादिषु लक्षणसमन्वयः यागेन स्वर्गं कुर्यादिति ततः कथमिति कथंभावा
कांक्षायां प्रयाजादिभिरुपकारं संपाद्येति कथंभावाकांक्षापूरणात् कर्तव्यसामान्यस्य यागादिरूपस्य भेदकविशेषरूपत्वाच्च तत्त्वप्रकरणप्रमाणनिरूपण

इतिकर्तव्यताकांक्षायां प्रयाजाद्यंगजातमिति कर्तव्यतात्वेनान्वेति ॥ ६ ॥

वक्ष्ये प्रदर्शयिष्यामः तथा च यजेत स्वर्गकाम इत्यत्राग्न्यन्वाधानावघातप्रयाजादिभिरुपकारं संपाद्य यागेन स्वर्गं भावयेत् स्वर्गं कुर्यादिति वाक्या
र्थः यथौदनकामः पचेदित्यत्र लिङा भावनाभिधीयते तत्र च किं भावयेत् कथं भावयेदिति भाव्याद्याकांक्षायां तृणफूत्कारादिभिरुपकारं संपा
द्य पाकेन तेजःसंयोगलक्षणेनौदनं भावयेदोदनं कुर्यादिति भाव्याद्यन्वयेन वाक्यार्थः संपद्यत इति ननु पूर्वं साध्यस्यापि यागादेः स्वसाधन
निष्पादितस्य सतोऽपूर्वनिष्पादकत्वसंभवात् तेन द्वारेण च विनश्वरस्याप्यचिरं स्वर्गसाधनत्वमितरस्य संभवतीत्युक्तं तच्च यागेन कथमुत्पाद्यते तत्र वक्ष्य
व यागेन स्वर्गं कुर्यादिति तावत् फलवाक्येन यागस्य फलसाधनत्वं बोध्यते तत्र च कथं विनश्वरेण स्वर्गः कर्तव्यस्तस्य कालांतरभावित्वादित्याकांक्षा
याम पूर्वं निष्पाद्येत्युच्यते पुनः कथमपूर्वं निष्पादनीयमित्याकांक्षायां प्राच्योदीच्यांगविशिष्टस्य यागस्यानुष्ठानप्रकारेणेत्युच्यते तच्चापूर्वं दर्शपू एम·
र्णमासयोरनेकविधं फलापूर्वं समुदायापूर्वमुत्पत्त्यपूर्वमंगापूर्वं चेति तत्र येन स्वर्गः क्रियते तत्फलापूर्वमित्युच्यते ॥ फलजनकत्वात् तच्च समुदाया १०

पूर्वेण जन्यते समुदायश्च द्विविधः अमावास्यायां त्रयाणां यागानामेकः समुदायः पौर्णमास्यां च त्रयाणां यागानामपरः समुदायः ताभ्यां जन्यं यदपू
र्वं तत्समुदायापूर्वमित्युच्यते समुदाययोश्च भिन्नकालवर्तिनोः संहत्य फलापूर्वजननायोगात् तज्जननाय समुदायद्वयजन्यस्यापूर्वद्वयस्यावश्यं कल्पनीय
त्वात् अमावास्यायां समुदायस्तु ऐन्द्रं दध्यमावास्यायाम् ऐन्द्रं पयोमावास्यायामिति वाक्याविहितो सान्नाय्ययागो यदाग्नेयोष्टाकपाल इति वाक्यविहित आग्ने
यश्चेत्येषां त्रयाणां भवति पौर्णमास्यां समुदायस्तु यदाग्नेयोष्टाकपालो मावास्यायां च पौर्णमास्यां चाच्युतो भवतीत्याग्नेययागो विहितः ताभ्यामेतमग्नीषोमी
यमेकादशकपालं पूर्णमासे प्रायच्छदित्यग्नीषोमीययागो विहितः उपांशुयागमन्तरा यजतीत्युपांशुयागः तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्ण
मास्यामिति वाक्येन विहितः तेषां त्रयाणां च भवति तयोस्तु समुदाययोर्मध्ये एकसमुदायवर्तिनां त्रयाणां यागानां भिन्नक्षणवर्तिनां संहत्य समुदायद्वय
जन्ययोरपूर्वयोरेकापूर्वजननायोगात् तज्जननाय यागत्रयजन्यान्युत्पत्त्यपूर्वाणि कल्पनीयानि तेषां चाङ्गोपकारमन्तरमन्तरेणानुत्पत्तेरङ्गानां चा
नेकक्षणवर्तित्वेन संहत्योत्पत्त्यपूर्वारम्भायोगात्तदारम्भायाङ्गापूर्वाणि कल्पनीयानि तत्र चायं विभागः सन्निपत्योपकारकाण्यवघातप्रोक्षणादीनि द्रव्यदे
वतासंस्कारद्वारेण यागस्वरूपस्यैवातिशयजननेन यागोत्पत्त्यपूर्वोत्पत्तौ तद्द्वारेण हि फलापूर्वे च व्याप्रियन्ते सन्निपत्योपकारकाङ्गापूर्वं यागोत्पत्त्यपू
र्वस्य प्रयोजकत्वमिति केचित् फलापूर्वस्यैव तादृशाङ्गापूर्वप्रयोजकत्वं स्वीकर्तव्यं तस्यैव सर्वापूर्वप्रयोजकत्वे लाघवादित्यन्ये आरादुपकारकाणि तु प्र
याजादीनि यागोत्पत्त्यपूर्वेभ्यः सकाशाज्जायमानं फलापूर्वमेव साक्षाज्जनयन्तीति एवंप्रकारभेदेपि सर्वोप्ययमपूर्वोत्पन्नाव दुर्ग्राहकाणां नैकरूपेणै
वेत्थंभावेन गृह्यते इत्थंभाव इतिकर्तव्यता चानर्थान्तरम् तथा च प्रधानानामाग्नेयादीनां स्वरूपेण सर्वाङ्गसाहित्याभावेपि स्वस्वोत्पत्त्यपूर्वद्वारेण
सर्वाङ्गसाहित्यं तेषामङ्गानां प्रयाजानूयाजादीनामपि स्वरूपेण सर्वप्रधानसाहित्याभावेपि स्वस्वोत्पत्त्यपूर्वद्वारा सर्वप्रधानसाहित्यं चोपपन्नमन्तरसा
हित्यविहितमिति वक्ष्यते एवं च यदेव प्रधानोत्पत्त्यपूर्वाणां प्रयाजाद्युत्पत्त्यपूर्वैः साहित्यं तदेव प्रधानानामङ्गैर्विशिष्टरूपं साङ्गत्वमित्युच्यते तस्मात्ताभ्यां समुदा
यापूर्वाभ्यामाग्नेयादिप्रधानोत्पत्त्यपूर्वैस्त्रितयत्रितयजन्याभ्यां प्रयाजाद्यङ्गापूर्वसहिताभ्यां [illegible] जनकीभूतफलापूर्वापरनामकं महापूर्वं जन्यते तेन च फलमिति याग
स्यापूर्वद्वारेण फलसाधनत्वमुक्तमुपपन्नतरं भवतीति सर्वं समञ्जसम् ननु दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत चित्रया यजेत पशुकाम उद्भिदा यजेत पशुकामो ज्यो

सौ॰मी षु सर्व वाक्येषु कस्य पदस्यापूर्वप्रतिपादकत्वमिति वक्तव्यम् नच भावनावाचकस्य यजमिदद्यान्याख्यातस्यापूर्ववाचकत्वं भवतीति वाच्यम् अपूर्वस्य साध्यत्वे
११ न प्रधानत्वात्तेषां सर्वेषां पदानां प्रधानान्वयलाभाय तेषां सर्वेषामेव क्रियाकारकसंबंधमनादृत्य प्रत्येकमपूर्ववाचकत्वात् अन्यथा तेषां प्रधानान्वयित्वं न स्यादिति चेदुच्यते
च्यते अपूर्वस्यान्यनादृष्टरूपत्वादेकापूर्वकल्पनयैव वाक्यस्योपपत्तावनेकापूर्वकल्पना गौरवं प्रसंगः स्यात् सर्वेषां तु पदानां तद्वाचकत्वे पर्यायत्वप्रसक्तेः कस्यै
व पदस्यैकापूर्ववाचकत्वं स्वीकर्तव्यं पदान्तरं तु तद्गुणतयान्वेति तच्चापूर्ववाचकं पदमाख्यातमेव तु कर्मनामधेयादिकं तस्य भावार्थसामानाधिकरण्यादिना गुणप्रद
तेः ननु सोमेन यजेत हिरण्यमात्रेयाय ददाति तस्मात्सुवर्णं हिरण्यं भार्यमिति हि श्रुतम् तत्र च सोम हिरण्य शब्दौ द्रव्यवाचकौ सुवर्णशब्दस्तु शोभनवर्णरू
पगुणवाचकः नैरेवद्रव्यादिशब्दैरपूर्वमवगम्यते द्रव्यादीनां सिद्धस्वरूपाणामेव साध्यापूर्वसाधनत्वादिति चेन्न द्रव्यादिसिद्धस्वरूपाणां यागदानादिरूपभावा
र्थशेषत्वेनापूपपत्तेर्भावार्थस्यैवापूर्वसाधनत्वात् क्रियाविनाद्रव्यादीनां न फलसाधनत्वं संभवति पचिक्रियामन्तरेण काष्ठस्थाल्यादीनामोदनसाधनत्वादर्श
नादित्युक्तमेव तस्माद्भावनावाचकस्यैवाख्यातस्य तत्पदस्यापूर्वगमकत्वं न द्रव्यादिपदस्येति सिद्धम् नन्वेवं भवतु भावनावाचकस्याख्यातपदस्यापूर्वगमकत्वं भव
तु च भावनैवाख्यातसामान्यार्थः तथापि सोमेन यजेत हिरण्यमात्रेयाय ददाति दाक्षिणानि जुहोतीत्यादिषु वाक्येषु भावनावाचकस्याख्यातस्यैकत्वाद्भावना
या अप्येकत्वं युक्तम् न च धातुभेदाद्भावनाया भेद इति वाच्यम् धातोर्भावनावाचकत्वाभावात्तस्य तद्देशप्रयोजकत्वादिति चेदत्राभिधीयते अस्तु नाम दाख्या
तस्यैव भावनावाचकत्वं तच्चाख्यातेन न प्रति धातु व्यक्त्येकव्यक्तिरूपं भवति न हि सर्वासां धातुव्यक्तीनामनुपर्यायेकाख्यातप्रत्ययव्यक्तिः श्रूयते व्याकरणे
नापि न धातुसमूहादेकाख्यातव्यक्तिर्विहिता तस्माद्बहूनामाख्यातव्यक्तीनामेकैकधातुविशेषानुषक्तत्वेनोत्पन्नानां भावनावाचकत्वाद्यागदानहोमभाव
नाः परस्परं भिद्यन्त इति भावनाभेदे तत्करणस्यापि भावार्थस्यापर्यायशब्दान्तराद्भेदः स्पष्ट एवेति सिद्धम् ननु समिधो यजति तनूनपातं यजति इडो यज
तिवर्हिर्यजति स्वाहाकारं यजतीति दर्शपौर्णमासप्रकरणे पंच प्रयाजाः श्रूयन्ते तत्र च पंचकृत्वः श्रुते यजति ददाति जुहोत्यादिषु पूर्वोक्तपदेष्विव धातुभेदाभावात्तदनु राम
षक्ताख्यातस्याप्यभेद एव तन्नश्चाख्यातेकप्रयुक्तभावनैक्यमपि दुर्वारमिति चेन्न यजति पदाभ्यां साङ्गावनाभेदस्य स्वीकर्तव्यत्वात् तस्मात्करणभेदः अन्यथाक ११

तस्मादविशेषपुनः श्रुतिरूपाद्यजतिपदाभ्यासात्कर्मभेदः सिद्ध इत्यन्यत्र विस्तरः ननु तिस्र आहुतीर्जुहोतीत्याख्यातं समिधो यजतीत्यादिवन्नाभ्या
सेनाम्नातं किंतु सकृदेव ननश्च भावनैक्येन कर्मैक्यमेवेति चेदत्र वक्तव्यम् किमिदमाख्यातपदं तत्रान्वयनिरपेक्षस्वरूपं सदेव भावनैक्ये प्रमाणमुत पदा
न्तरान्वयसापेक्षस्वरूपं नाद्यः परमात्रस्य वाक्यांशरूपस्य स्मारकत्वेन वाक्यकार्यरूपप्रमितिजनकत्वासंभवात् न द्वितीयः त्रित्वसंख्यया विशेषितेनाख्याते
न कर्मबहुत्वावगमाद्भावनाबहुत्वावगमे तस्य भावनैक्ये प्रमाणत्वाभावात् तस्मात्पदाभ्यासाभावेपि जुहोत्यर्थे होमे त्रित्वसंख्यान्वयात्परस्परं त्रयो होमा अभिधी
न्ते इति भावनानां त्रित्वमेवेति सिद्धम् नन्वथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योति रेतेन सहस्रदक्षिणेन यजेतेत्यत्र हि प्रकृतं ज्योतिष्टोममेव ज्यो
तिरित्यादिनानूद्य तस्मिन्सहस्रदक्षिणादानलक्षणो गुणो विधीयत इति नात्र कर्मभेदेन भावनाभेद इति चेन्न प्रकृतस्य ज्योतिष्टोमस्याथेत्यनेन विच्छेदात्
ततश्च ज्योतिष्टोमप्रकरणे श्रूयमाणानामपि त्रयाणां यागानां ज्योतिष्टोमसंज्ञापेक्षया पृथक्संज्ञात्रयकरणाज्ज्योतिष्टोमाद्भिन्नसंज्ञावशादेव त्रयाणां
च परस्परं भेद इति भावनानां भिन्नत्वमिति सिद्धम् ननु तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति हि श्रूयते तत्र च घनीभूतः प
यःपिंडः आमिक्षा जलं वाजिनं तयोश्चामिक्षाद्रव्यभाजो ये विश्वेदेवास्तान्वाजिभ्य इत्यनेनानूद्य तत्र वाजिनद्रव्यरूपो गुणो विधीयते वाजोन्नमामिक्षा
रूपमेषामस्तीति तद्व्युत्पत्तेः न च द्रव्यमामिक्षाद्रव्येण सह समुच्चीयतां विकल्पतां वेति चेन्न वैश्वदेवयागस्य पूर्वमेवामिक्षारूपगुणावरुद्धत्वेन तत्र वा
जिनगुणस्य प्रवेशायोगात् न हि व्रीहियवयोरिव वाजिनामिक्षयोर्विकल्पः समशिष्टत्वाभावात् आमिक्षारूपो गुणस्तु वैश्वदेवयागस्योत्पत्तिवाक्य एव
शिष्यते विधीयत इत्युत्पत्तिशिष्टः वाजिनगुणस्य तूत्पन्ने कर्मणि विधिः कल्प्यत इत्युत्पन्नशिष्टः उत्पत्तिशिष्टोत्पन्नशिष्टयोर्मध्ये उत्पत्तिशिष्टः कर्मोत्पत्ति
कालएव तदंगत्वेन प्रमितत्वात्प्रबलः उत्पन्नशिष्टस्तु तदनन्तरं प्रमितोपि विलंबितत्वेन दुर्बलत्वात्तत्र प्रवेशमलभमानो वाजिशब्दार्थस्य देवतान्तरत्वमापाद्य
तद्देवत्यकर्मान्तरे प्रविशति तस्माद्द्रव्यदेवतालक्षणस्य रूपस्य भेदात्कर्मभेदेन भावनाभेद इति सिद्धम् ननूपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोतीत्यत्र हि
न कर्मान्तरभावनाया विधिः किंतु नित्याग्निहोत्रमनूद्य तत्र मासरूपो गुणो विधीयते प्राप्तत्वादिति चेन्न वाक्यभेदप्रसंगात् तथाहि किं तदनुवादेन मास

एवं विधौ यतेकिमुक्तोपसद्दोपि न प्रथमः उपसदामपि नित्याग्निहोत्रे प्राप्तानां त्वत्राने विधेयत्वात् नापि द्वितीयः प्राकृतकर्मणि मासोपसद्रूपानेकगुणविधाने वाक्यभेदस्य
दुर्वारत्वात् स चाष्टदोषदुष्टः दोषांश्चोपरिष्टात्प्रदर्शयिष्यामः तस्मात्पूर्वकर्मविधायकत्वात्कुंडपायिनामयनं रूपान्तरकरणात्तदान्नित्याग्निहोत्रधर्मकं तन्ना
मकं च कर्मान्तरमत्र विधीयत इति कर्मान्तरभावना सिद्धा न तथा च शब्दान्तराभ्याससंख्यासंज्ञागुणभेदप्रकरणान्तरैः कर्मभेदोपि द्वितीयाध्यायस्यार्थो भूदेवमा
वनाप्रदर्शनेन च सूचितो वेदितव्यः अग्रे चोत्पत्तिविधिनिरूपणेन संघनितोस्माभिस्तत्रैव निरूपितः तस्मात्स्वर्गमुद्दिश्य तत्साधनत्वेन स्वर्गकामविधियोगा
दिकं विधत्ते ततश्च नादृशावेदस्य धर्मे प्रामाण्यं निरवग्रहमुपपन्नमिति सर्वं निरवद्यम् तस्य च वेदरूपप्रमाणस्य प्रमेयोर्थस्त्रिविध इति प्रसंगाच्चिंत्यते
क्रत्वर्थः पुरुषार्थ उभयार्थश्चेति तत्र प्रयाजादिप्रोक्षणादिश्च केवलं क्रत्वर्थः फलं यागादिरूपं तत्करणं च पुरुषार्थः यथा स्वर्गादिर्दर्शपूर्णमासादिश्च द
ध्यादिस्तूभयार्थः दध्ना जुहोतीति फलासंयुक्तवाक्येन तस्य क्रत्वर्थत्वावगमात् दध्नेंद्रियकामस्य जुहुयादिति फलसंयोगपरवाक्येन पुरुषार्थत्वावगमाच्च एक
स्यतूभयार्थत्वे विनियोजकप्रमाणाभेदस्य नियामकत्वात् तथा चोक्तं एकस्य तूभयत्वे संयोगपृथक्त्वमिति किंच क्रत्वर्थं प्रयाजादौ क्रतुः प्रयोजकः पुरुषार्थे चद
र्शादौ फलं प्रयोजकं प्रयोजकत्वं चानुष्ठापकत्वं तथा च विधिर्यदर्थं यदनुष्ठापयति स तत्र प्रयोजकः यथा दर्शादिविधिः स्वर्गार्थं दर्शादिकमनुष्ठाप
यति स्वर्गादिर्दर्शादौ प्रयोजकः यथा च प्रयाजादिविधिः प्रयाजादीन् दर्शाद्यर्थमनुष्ठापयति दर्शादिः प्रयाजादिषु प्रयोजकः दध्यानयनविधिश्च दध्यानयनमा
मिक्षार्थमनुष्ठापयत्यामिक्षा दध्यानयने प्रयोजिका वाजिनं तु दध्यानयनानुष्ठानेनामिक्षायां जायमानत्वा मनुनिष्पद्यमानत्वान्मधुररसस्य चामिक्षायामेव विशेषे
णोपलभ्यमानत्वान्न दध्यानयने प्रयोजकमित्यादिका चतुर्थाध्यायार्थस्थितास्वयमूहितव्या न देवं सामान्यतः प्रयोजनवदर्थावबोधकत्वेन वेदस्य धर्मे प्रामाण्ये धर्मे
विधायकत्वप्रदर्शनेन चोपपाद्येदानीं तस्य विध्यादिरूपविभागेन तत्र प्रामाण्यमुपपादयितुं तल्लक्षणं एव इति अथेति उत्तरं प्रतिजानीते उच्यत इति तत्र सा
मान्यलक्षणमाह अपौरुषेयं वाक्यमिति वेद इति लक्ष्यनिर्देशः तत्र भारतादावतिव्याप्तिवारणायापौरुषेयमिति विशेषणम् आत्माद्यैतद्दोषवारणाय वाक्यमिति वि
शेष्यम् प्रमाणान्तरेणार्थमुपलभ्य विनिर्मितत्वं पौरुषेयत्वं तद्भिन्नवाक्यत्वमिति फलितम् नहि वेदं परमेश्वरस्तदर्थं प्रमाणान्तरेणोपलभ्य विनिर्मितत्वं पौरुषेयत्वं

नहि वेदं परमेश्वरस्तदर्थं प्रमाणांतरेणोपलभ्य विरचयति वेदाध्ययनं गुर्वध्ययनपूर्वकं वेदाध्ययनत्वाद्वर्त्तमानवेदाध्ययनवदित्यनुमानेन वेदस्यापौरुषेय
त्वसाधनात् यः कल्पः स कल्पपूर्वक इति न्यायेन संसारस्यानादित्वात् परमेश्वरस्य च सर्वज्ञत्वात्परमेश्वरो गतकल्पीयं वेदमस्मिन्कल्पे स्मृत्वोपदिशतीत्येताव
न्मात्रेणोपपत्तौ वेदपौरुषेयत्वस्यानौचित्याच्चेति भावः । वेदं विभजते स चेत्यादिना । तत्र विधिं लक्षयति तत्रेत्यादिना तत्र पंचविधेषु वेदभागेषु मध्य इत्यर्थः ।
अज्ञातेति अज्ञातस्य प्रयोजनवतोऽर्थस्य ज्ञापकत्वं विधित्वमित्यर्थः । तदेवाह स चेत्यादिना स विधिर्यादृशं प्रमाणांतरेणाप्राप्तं भवति तादृशमर्थं विधत्ते तेन चा
ज्ञातप्रयोजनवदर्थविधानेनार्थवानिति योजना तत्रोदाहरणमाह यथाग्निहोत्रमिति गुणविधिस्तु मानांतरेण प्राप्ते गुणमात्रं विधत्ते प्रधानकर्मणस्तु

अथ को वेद इति चेदुच्यते । अपौरुषेयं वाक्यं वेदः । स च विधिमंत्रनामधेयनिषेधार्थवादभेदात्पंचविधः । तत्राज्ञातार्थज्ञापको वेदभा
गो विधिः । स च तादृशप्रयोजनवदर्थविधानेनार्थवान् यादृशं चार्थं प्रमाणांतरेणाप्राप्तं विधत्ते । यथाऽग्निहोत्रं जुहुया
त्स्वर्गकाम इति विधिर्मानांतरेणाप्राप्तं स्वर्गप्रयोजनवद्धोमं विधत्ते । अग्निहोत्रहोमेन स्वर्गं भावयेदिति वाक्यार्थबोधः । यत्र क
र्म मानांतरेण प्राप्तं तत्र तदुद्देशेन गुणमात्रं विधत्ते । यथा दध्ना जुहोतीत्यत्र होमस्याग्निहोत्रं जुहुयादित्यनेन प्राप्तत्वाद्धोमोद्देशेन दधिमात्र
विधानम् । दध्ना होमं भावयेदिति । यत्रोभयमप्राप्तं तत्र विशिष्टं विधत्ते यथा सोमेन यजेतेत्यत्र सोमयाग योरप्राप्तत्वात्सोमविशिष्ट
यागविधानम् । सोमपदे मत्वर्थलक्षणया सोमवता यागेनेष्टं भावयेदिति वाक्यार्थबोधः ॥

मानांतरेण प्राप्तस्यानुवाद एवेत्याह यत्र कर्मेत्यादिना
उभयमिति विशेषणविशेष्यलक्षणमुभयमित्यर्थः विशिष्टमिति विशेषणविशिष्टं विशेष्यमित्यर्थः तत्रोदाहरणमाह यथा सोमेन यजेतेति ननु सोमरूपस्यैव यागस्यात्र विधि
रस्तु किं विशिष्टविधानेनेत्याशंक्य सोमस्य द्रव्यत्वेन यागत्वासंभवात्सोमपदे मत्वर्थलक्षणया सोमाकारेण विशिष्टस्यैव विधेर्युक्तत्वान्नैवमित्याह सोमपद इत्यादि
ना ननु विशेषणविशेष्यलक्षणस्योभयपदार्थस्य विधाने वाक्यभेदः स्यादेवं न च स इष्ट इति वाच्यम् यत्र वाक्यभेदस्तत्राष्टदोषप्रसंगात् यथा व्रीहिभिर्यजेत यवैर्वेत्य
त्र च प्रथमप्रयोगे व्रीह्यनुष्ठाने यवशास्त्रप्रामाण्यस्य स्वार्थानुज्ञापकत्वरूप ॥

लौ॰
मी॰
१३

स्यपरित्यागः स्वार्थानुष्ठापकत्वरूपस्याप्रामाण्यस्य चास्वीकारो भवति ततो द्वितीयप्रयोगे यवानुष्ठाने तु पूर्वपरित्यक्तस्य यवशास्त्रप्रामाण्यस्य स्वीकारः स्वीकृत
स्य च तदप्रामाण्यस्य परित्यागश्चेति यवशास्त्रे चत्वारो दोषा भवंति तथा प्रथमप्रयोगे यवानुष्ठाने व्रीहिशास्त्रप्रामाण्यस्य स्वार्थानुष्ठापकत्वलक्षणस्य परित्यागः
स्वार्थाननुष्ठापकत्वस्वरूपस्य चाप्रामाण्यस्य स्वीकारः ततो द्वितीयप्रयोगे व्रीह्यनुष्ठाने तु व्रीहिशास्त्रप्रामाण्यस्य पूर्वपरित्यक्तस्य स्वीकारः स्वीकृतस्य च तदप्रामा
ण्यस्य परित्यागश्चेति व्रीहिशास्त्रेपि चत्वारो दोषा भवंतीत्यष्टदोषदुष्टो विकल्पो यथा व्रीहियववाक्ये प्रसिद्धस्तथात्रापि स्यात्॥ ❀॥ न च तद्दृष्टत्रापीष्टएवे
ति वाच्यम् तत्र व्रीहियवयोः पुरोडाशरूपैककार्यकारित्वेन विकल्पस्येष्टत्वाद्गत्यंतराभावाच्च प्रकृते तु गुणविधिमात्रस्वीकारेणाप्युपपत्तौ नोभयविधिः साधुरि

न चोभयविधाने वाक्यभेदः।प्रत्येकमुभयस्याविधानात् किंतु विशिष्टस्यैकस्यैव विधानात्।न च ज्योतिष्टोमेन स्वर्गकामो यजेतेति वि
धिप्राप्तयागोद्देशेन सोमरूपगुणविधानमेवास्तु सोमेन यागं भावयेदिति किं मत्वर्थलक्षणयेति वाच्यम्। तस्याधिकारविधित्वेनोत्पत्ति
विधित्वासंभवात्।न नूद्भिदा यजेत पशुकाम इत्यस्येव ज्योतिष्टोमेनेत्यस्याप्युत्पत्त्यधिकारविधित्वमस्त्विति चेन्न। दृष्टांतउ      त्पत्ति।
वाक्यांतराभावेन अन्यथानुपपत्त्या तथात्वाश्रयणात्।किं च ज्योतिष्टोमेनेत्यस्योभयविधित्वे नेवयागस्य फलसंबंधोपि बोधनीय
इति सुदृढो वाक्यभेदस्तद्वरं सोमपदे मत्वर्थलक्षणया विशिष्टविधानम्॥ नन्वाशंक्य परिहरति न चेत्यादिना यद्यानुयागेनेष्टं भावयेत्सोमेन
च यागं भावयेदित्याद्यत्योभयविधावावृत्तिलक्षणो वाक्यभेदः स्यात् यदा तु युगपत्तंत्रेण यागेनेष्टं भावयेत्सोमेन यागं भावयेदित्युभयविधानं तदा तु विरुद्धत्रिक
द्वयप्रसंग इत्याशंक्य परिहरति न चेत्यादिना एकवाक्यस्य प्रत्येकमुभयपदार्थव्यापारभेदेनोभयविधायकत्वे वाक्यभेदो भवति न यथात्रास्वीकारादित्यर्थः ननु
विधेयस्योभयत्वे तद्विधायकवाक्यस्यापि व्यापारभेदेनैव तद्विधायकत्वं संभवति नान्यथेति शंकृते किं त्विति विशिष्टस्यैकरूपत्वेन विधेयस्योभयत्वासिद्धेर्न
व्यापारभेदेन तद्विधानं ततश्च न वाक्यभेदप्रसंग इति परिहरति विशिष्टस्येति   विशिष्टविधौ विशेषणविधेरार्थिकत्वेन श्रूयमाणविधिना गुणस्य पृथग
विधेयत्वादिति भावः ननु सोमेन यजेतेत्यस्य गुणविधित्वमेवास्तु सोमयागस्वरूपविधिस्तु ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यपमेव भवतु॥ ६ ॥ ॥ राम
१३

ततश्च ज्योतिष्टोमेनेत्यादिना प्राप्ते कर्मणि गुणविधायकत्वेनापि सोमवाक्यस्योपपत्तौ न मत्वर्थलक्षणापत्तिदोषरूपत्वेनान्याय्यास्वीकर्त्तव्येत्याशंकानेन च
ज्योतिष्टोमेनेत्यादिना न च वाच्यमित्यत्र हेतुमाह तस्याधिकारविधित्वेनेति न हि भवतु॥ तस्याधिकारविधित्वमुत्पत्तिविधित्वमपि कुतो न स्यादित्याशंक्याह उत्पत्तिवि
धित्वासंभवादिति कर्मस्वरूपमात्रबोधकस्यैव विधेरुत्पत्तिविधित्वं व्यवह्रियते उत्पत्तिविधिविहितस्य च कर्मणः फलविशेषेण सह संबंधमात्रमधिकारविधिः
करोति यथाऽऽग्नेयोऽष्टाकपालो भवतीत्येतदुत्पत्तिविधिविहितस्य कर्मणः स्वर्गरूपफलविशेषेण संबंधो दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यनेन विधिना
क्रियत इति तस्याधिकारविधित्वमेव नोत्पत्तिविधित्वं तद्वदस्याप्यधिकारविधेर्नोत्पत्तिविधित्वं संभवतीति भावः ननूद्भिदा यजेत पशुकाम इत्यस्य विधिवा
क्यस्य यथोद्भिन्नामककर्मस्वरूपबोधकत्वरूपोत्पत्तिविधित्वेऽपि तस्य कर्मणः पशुकाम इत्यस्य विधिवाक्यस्य यथोद्भिन्नामककर्मस्वरूपबोधकत्वरूपोत्प
त्तिविधित्वेऽपि तस्य कर्मणः पशुरूपफलसंबंधबोधकत्वरूपाधिकारविधित्वमपि भवति तद्वदस्याप्युभयविधित्वमविरुद्धमित्याशंकतेन त्वित्यादि
नाह दृष्टान्ते तु कर्मस्वरूपबोधकोत्पत्तिवाक्यान्तराभावेनैकस्य वाक्यस्योभयविधित्वमाश्रितं कर्मणः स्वरूपबोधनमन्तरेण तस्य फलसंबंधबोधनानुपपत्त्या
तस्यैव वाक्यस्योभयविधित्वाश्रयणादिति परिहरति दृष्टान्त इत्यादिना ननु ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यस्य वाक्यस्योभयविधित्वस्वीकारे सोमेन यजे
तेत्यस्य मत्वर्थलक्षणामन्तरेणैव गुणमात्रविधायकत्वनिर्वाहे को दोषोऽन्यथा मत्वर्थलक्षणाप्रसंगादित्याशंक्य परिहरति किं चेत्यादिना उभयविधित्व इ-
ति सोमयागस्योत्पत्तिविधित्वेऽधिकारविधित्वे चेत्यर्थः ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यनेनैव सोमयागस्वरूपं तस्य स्वर्गरूपफलसंबंधश्च बोधनीय इत्य
र्थः सुदृढो वाक्यभेद इति गौरवलक्षणो वाक्यभेदो दृढतरो भवेदित्यर्थः तथा चोक्तं श्रोतृव्यापारनानात्वे शब्दानामति गौरवं एकोपवसितानां तु नायो
सो विरुध्यत इति ननु सोमेन यजेतेत्यत्रापि गुणस्य कर्मस्वरूपस्य च विधाने वाक्यभेदस्य सुदृढत्वादिति चेन्न विशिष्टविधौ विशेषणविधेरार्थिकत्वेन
श्रूयमाणविधिना गुणस्य पृथग्विधेयत्वादिति निरस्तत्वात् न च तस्योत्पत्तिविधित्वे वाक्यभेदस्याभावेऽपि लक्षणादोषस्तु दुर्वार इति वाच्यम् तस्य वाक्य
भेदाल्पदोषत्वात् लक्षणायाः पददोषत्वाद्वाक्यभेदस्य तु वाक्यदोषत्वात्॥ पदवाक्यदोषयोर्मध्ये पददोषस्यैव कल्पनीयत्वाद्गुणोऽन्याय्यक
ल्पनेति न्यायात् तस्माज्ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यस्योभयविधित्वे वाक्यभेदप्रसंगाद्वरं सोमपदे मत्वर्थलक्षणास्वीकृत्य गुणविशिष्टकर्म

स्वरूपविधानमेवेत्याशयेनोपसंहरति तद्दर्शमित्यादिना विधिं विभजते विधिश्चतुर्विध इति तत्रोत्पत्तिविधिं लक्षयति तत्रेत्यादिना तत्र चतुर्णां विधीनां मध्ये इत्यर्थः कर्मस्वरूपमात्रेत्यत्र मात्रपदेनोत्पत्तिविधेः कर्मणः फलादिना सह संबन्धबोधकत्वं वारयति उद्भिदा यजेत पशुकाम इति विधेस्तु श्रौतमधिकारविधित्वमेवोत्पत्तिविधित्वं तु कर्मस्वरूपबोधकं विध्यन्तराभावेनाऽर्थिकमेवेति न दोषः तत्रोदाहरणमाह यथाग्निहोत्रं जुहोतीति एतदुपलक्षणम् सोमेन यजेत न पूपर्यसिद्ध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनं यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवतीत्यादीनाम् तथा च तत्र द्वितीयाध्याये कर्मोत्पत्तिविधीनामेव भेदो निरूपितः अत्राप्युत्पत्तिविधिलक्षणप्रदर्शनेनैव तेषां भेदोऽपि ध्वनितः स च शब्दान्तरादिभिर्हेतुभिरस्माभिस्तु पूर्वमेव तेषां भेदः संक्षेपेण निरूपित इत्युपरम्यते ननु चात्रोत्पत्तिविधौ कर्मणः साध्यत्वेनान्वयो भवतु अग्निहोत्रहोमं कुर्यादिति अग्नौ हीनप्रोक्षणीतिवदग्निहोत्रं जुहोतीत्यत्रापि द्वितीयापा

विधिश्चतुर्विधः। उत्पत्तिविधिर्विनियोगविधिरधिकारविधिः प्रयोगविधिश्चेति। तत्र कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः। यथाऽग्निहोत्रं जुहोतीति। अत्र विधौ कर्मणः करणत्वेनान्वयः। अग्निहोत्रहोमेनेष्टं भावयेदिति। ननु यागस्य द्रव्यदेवतारूपेण ॥

साध्यत्ववाचकत्वात् तथा च साध्यस्य साध्यत्वस्वभावादेव साध्यान्तरसाधनत्वासंभवेन साध्यान्तरान्वयायोगादधिकारविध्यवगतफलसंबन्धानुपपत्तिः स्यादित्याशंकामाह अत्र चैविधावित्यादिना अग्निहोत्रहोमेनेष्टं भावयेदिति करणत्वेनान्वये तु किं तदिष्टमिति वीक्षायामग्निहोत्रं जुहुयात्स्वर्गकाम इत्यधिकारविध्यवगतफलसंबन्धोपपत्तेः स्वसाधननिष्पादितस्य सिद्धस्वभावस्यैव करणत्वेनान्वयाच्च न कोऽपि दोष इति भावः ननूत्पत्तिविधाविष्टबोधकपदस्याभावादग्निहोत्रहोमेनेष्टं भावयेदिति कथं वाक्यार्थः स्यादिति चेन्न विधेरेवेष्टाक्षेपकत्वात् अन्यथा तस्य पुरुषाऽर्थभूते कर्मणि पुरुषप्रवर्तकत्वानुपपत्तिः स्यात् ननु गुरुमते विधिः स्वसिद्ध्यर्थमेव नित्यादिषु कर्मसु पुरुषं प्रवर्तयति तथा च काम्यकर्मोत्पत्तिविधीनामिष्टान्तराक्षेपकत्वेऽपि न नित्यादिकर्मोत्पत्तिविधीनामिष्टान्तराक्षेपकत्वं संभवति न च लिङादिशब्दव्यापारस्य विधेर्नित्यत्वेन कथं तस्य स्वसिद्ध्याक्षेपकत्वमिति वाच्यम् गुरुमतापरिज्ञानात् तथा हि विधिशब्द

व्यापारविशेषोभावनैवगुरुमतेतुनियोगाख्यमपूर्वमेवलिङादिशब्दार्थभूतोविधिः तस्यचसाध्यस्वभावत्वेनस्वसिद्ध्याक्षेपकत्वमुपपद्यतेतथाच लोके
लिङ्कार्येव्युत्पत्त्यनुरोधेनाग्निहोत्रं जुहुयादित्यादावपिलिङानियोगएवप्रतीयतेनियोगश्चाधिकारिविषयादिसापेक्षस्तत्रकस्यनियोगइत्यधिकाराकांक्षा
यांजीवनादिमतइतिजीवनादिविशिष्टाधिकारित्वेनसंबध्यते कुत्रनियोगइतिविषयाकांक्षायांतुहोमादाविति होमादिर्विषयत्वेनसंबध्यतेहोमादिविषयश्चनि
योगः कृतिसाध्यतयैवप्रतीयतेतस्यचसाक्षात्कृतिसाध्यत्वासंभवेन सस्वस्यकृतिसाध्यत्वनिर्वाहार्थंविषयतयासंबद्धस्यहोमादेः करणत्वमप्याक्षिपतितदुक्तं
शालिकायांकृतिनसाध्यमध्येयोयागादिर्विषयोमतः कार्येऽसंघटितौकारेकरणत्वेनसंमतइतितस्मात्काम्यकर्मोत्पत्तिविधेर्विश्वजितायजेतेत्यादिविधेश्च
स्वप्रवर्तकत्वान्यथानुपपत्त्यासामान्यतः प्रयोजनविशेषाक्षेपकत्वेपिनित्यकर्मोत्पत्तिविधेःस्वसिद्धेरेवप्रयोजनत्वान्नप्रयोजनांतराक्षेपकत्वमितिचेन्ननियोगाख्य

तथाचरूपाश्रवणे अग्निहोत्रंजुहोतीतिकथमुत्पत्तिविधिः। अग्निहोत्रशब्दस्यतुतत्प्रख्यन्यायेननामधेयत्वादितिचेन्नारूपाश्रवणे
ऽप्यस्योत्पत्तिविधित्वात्। अन्य थारूपश्रवणाद्दध्नाजुहोतीत्ययमेवोत्पत्तिविधिःस्यात्। तथाचाग्निहोत्रंजुहोतीतिवाक्यमनर्थकंस्यात्। अं
गप्रधानसंबंधबोधकोविधिर्विनियोगविधिः। यथादध्नाजुहोतीति। सहितृतीययाप्रतिपन्नांगभावस्यदध्नोहोमसंबंधंविधत्ते। दध्नाहोमं

विधेःस्वरूपेणाप्रयत्नत्वेनस्वसिद्धयेपुरुषप्रवर्तकत्वानुपपत्तेः अन्यथाविश्वजितायजेतेत्यादावपिविधेःस्वसिद्ध्यर्थमेवपुरुषप्रवर्तकत्वा ऽभावयेदिति॥
पत्तेः तच्चानिष्टं सस्वर्गःस्यात्सर्वान्प्रत्यविशेषादितिन्यायविरोधात्तस्मान्नित्यादिष्वपिकर्मसुस्वर्गोधर्मेणपापमपनुदतीत्यादिशास्त्रानुरोधेनपापक्षयादिकं
वाप्रयोजनंस्वीकर्तव्यमित्यलमतिप्रसंगेनप्रकृतमनुसरामः तस्मात्साधुकर्मोत्पत्तिविधौकर्मणः करणत्वेनान्वयइति नन्वग्निहोत्रंजुहोतीत्यस्या
नोत्पत्तिविधित्वंद्रव्यदेवतात्मकस्यकर्मरूपस्याश्रवणादित्याशंक्य न न्विति नन्वग्नयेहोत्रमत्रेत्यग्निहोत्रशब्देनाग्निदेवतात्मकस्यकर्मरूप
स्यश्रवणात्कथंरूपाश्रवणमित्याशंक्याह अग्निहोत्रशब्दस्येति अग्निहोत्रशब्दस्यतत्प्रख्यंचान्यशास्त्रमितितत्प्रख्यन्यायेननामधेयत्वस्यव
क्ष्यमाणत्वान्नकस्यापिकर्मरूपस्यश्रवणमत्रेत्यर्थः यद्यप्यत्रकर्मणोरूपंनश्रूयतेतथापिविध्यन्यथानुपपत्त्यातत्कल्प्यतेतच्चसामान्यतः कल्प्य
मानंद्रव्यदेवतात्मकंकर्मणोरूपंविशेषाकांक्षायांगुणविधिमंत्रवर्णाभ्यांविशेषेनचावगम्यमानमत्रसंभवतितथाग्निहोत्रंजुहोतीत्यत्रद्रव्यदे

रूपकर्मस्वरूपमात्रबोधकत्वरूपमुत्पत्तिविधित्वं संभवतीत्याशयेन परिहरति नेति तत्र निरुक्ताशयं हेतुमाह रूपाश्रवण इति विपक्षे बाधकमाह अन्यथेति
अग्निहोत्रं जुहोतीत्यस्य रूपाश्रवणमात्रेणोत्पत्तिविधित्वानंगीकारे दध्ना जुहोतीत्यस्यैवोत्पत्तिविधित्वं स्यात् तत्र कर्मस्वरूपस्य श्रवणादित्यर्थः दध्ना जुहोती
त्यस्याग्निहोत्रकर्मोत्पत्तिविधित्वे वाक्यांतरस्यानर्थकत्वमनिष्टमापादयति तथा चेति न चाग्निरूपगुणविधित्वेनाप्यस्योपपत्तिरिति वाच्यम् अग्निर्ज्योति
रित्यादिमंत्रवर्णेनाग्निरूपगुणस्य प्राप्तत्वात् कर्मनामधेयत्वस्य वक्ष्यमाणत्वात् तस्मादनर्थकमिति साधूक्तम् किंच दध्ना जुहोतीत्यस्योत्पत्तिविधित्वे प
यसा जुहोतीत्यस्यापि वैयर्थ्यं कर्मांतरविधायकत्वं वा स्याद्धोमस्योत्पत्तिशिष्टदध्यवरुद्धत्वेन तत्र पयोरूपगुणविधित्वासंभवात् तथा चानेकादृष्टकल्पनाप·
त्तिः अग्निहोत्रं जुहोतीत्यस्य होमोत्पत्तिविधित्वे तु दध्ना जुहोति पयसा जुहोतीत्यादिवाक्यस्य सर्वस्यापि तत्र खले कपोतन्यायेन युगपद्दध्यादिगुणविधायकत्वेना
प्युपपत्त्या नानेकादृष्टकल्पनाप्रसंग इत्यग्निहोत्रं जुहोतीत्यस्यैवोत्पत्तिविधित्वं न्याय्यमित्यलमतिविस्तरेण तृतीयाध्यायस्यार्थभूतं शेषशेषिभावं निरू
पयितुमिदानीं विनियोगविधिं लक्षयति अंगप्रधानेति अंगानां द्रव्यदेवतादिलक्षणानां प्रधानेन वाक्यांतरविहितेन सह संबंधस्य शेषत्वलक्षणस्य बोधको वि
धिरित्यर्थः तत्रोदाहरणमाह यथा दध्नेति दध्ना जुहोति पयसा जुहोतीत्यादेरुपलक्षणार्थम् स हि विधिस्तृतीयया प्रतिपन्नांगभावस्य दध्नोऽग्निहोत्रं जु
होतीति विहितहोमसंबंधं विधत्त इत्याह स हीत्यादिना ननु दध्ना होमं भावयेद्धोमेनेष्टं भावयेदिति साध्यत्वेन करणत्वेन च होमस्यान्वयः स्यात् तथा च विरुद्धत्रि
कद्वयप्रसंगः तथा हि दध्ना जुहोतीत्यत्र सकृदुच्चरितस्य जुहोतीत्याख्यातस्य दधिरूपगुणे किंचिदिष्टे च तंत्रेण संबंधांगीकारे सत्युपादेयत्वं विधेयत्वं गुणत्वं चेत्येकं
कं त्रिकमुद्देश्यत्वमनुवाद्यत्वं प्राधान्यं चेत्यपरं त्रिकं होमे संपद्यते कथं स्वर्गफलमुद्दिश्य होम उपादीयते होममनूद्य होमो विधीयते फलं प्रधानं होम उपसर्ज
नम् एवं होममुद्दिश्य दध्युपादीयते होममनूद्य दधि विधीयते होमः प्रधानं दध्युपसर्जनम् ततश्च होमे फलापेक्षयोपादेयत्वं विधेयत्वं गुणत्वं दधिरूपगु
णापेक्षया चोद्देश्यत्वमनुवाद्यत्वं प्राधान्यं च संपद्येतेन चात्र तंत्रेण संबंधः किंतु पृथग्घोमात्रस्य संबंधो भवतीति वाच्यम् वाक्यभेदप्रसंगात् दध्ना होमं भावये
द्धोमेन चेष्टं भावयेदिति वाक्यद्वयप्राप्तेः तस्मान्न दधिशब्दो गुणपर इति चेन्न भ्रांतिमत्त्वात् तथा हि यत्र हि साध्यत्वेन करणत्वेन चैकस्य युगपत्तंत्रेण संबं
धआशंक्यते तत्रैव विरुद्धत्रिकद्वयस्य प्रसक्तिर्भवति यथा वाजपेयेन स्वाराज्यकामो यजेतेत्यत्र तत्र च वाजशब्दस्य पेयसुराद्रव्यवाचित्वेन गुणविध्याशं
कायां मत्वर्थलक्षणाप्रसंगादेकेन तंत्रेण युगपत्स्वाराज्यफलवाजपेयगुणसंबंधो यागस्य पूर्वपक्षितः तत्र विरुद्धत्रिकद्वयप्रसंगापादनेन यथोक्तद्रव्यवि

रुद्रत्रिकहृयप्रसंगश्च फलमुद्दिश्य याग उपादीयते फलमनूद्य यागो विधीयते फलं प्रधानं याग उपसर्ज्जनं एवं यागमुद्दिश्य वाजपेय उपादीयते यागमनूद्य वाजपेयो
विधीयते यागः प्रधानं वाजपेय उपसर्ज्जनं फलस्योद्देश्यत्वं च मानसापेक्षो विषयत्वाकारः यागस्योपादेयत्वं त्वनुष्ठीयमानत्वाकारः तौ चोभौ मनःशरीरोपाधिकौ
धर्मौ भवतः अनुवाद्यत्वविधेयत्वे तु शब्दोपाधिकौ धर्मौ स्तः अनुवाद्यत्वं नाम मानान्तरज्ञातस्यानुकथ्यमानत्वं विधेयत्वं चाज्ञातस्यानुष्ठेयत्वेन प्रतिपाद्यमानत्वम् फलस्य
प्राधान्यं नाम साध्यत्वेन यागस्योपसर्ज्जनत्वं च साधनत्वेन बोध्यम् तथा यागस्योद्देश्यत्वं नाम मानान्तरसिद्धस्य विधेयान्वयित्वं यानिर्द्देश्यत्वमन्यद्यथोक्तम् न चैवं होमे
विरुद्धत्रिकहृयप्रसंगः तस्य साध्यत्वेन साधनत्वेन चात्र विधौ युगपत्तन्त्रेणान्वयानंगीकारात् किंतु साध्यत्वेनैव तथा च होमस्योद्देश्यत्वमनुवाद्यत्वं प्रधानत्वमेव न तू
पादेयत्वादिकं तस्मान्न विरुद्धत्रिकहृयापत्तिरित्याशयेनाह गुणविधौ च धात्वर्थस्य साध्यत्वेनैवान्वय इति धात्वर्थस्य यागदानहोमादेः साध्यत्वेनैवोद्देश्यत्वेन साधने
त्वेनान्वयं वास्ति साधनत्वेनान्वयस्तु धात्वर्थस्योत्पत्तिविधावधिकारविधौ च भवति ननु गुणविधावित्यर्थः ननु गुणविधौ धात्वर्थस्य साध्यत्वे नैवान्वये दध्ने
न्द्रियकामस्य जुहुयादित्यत्र दध्ना होमं भावयेदिन्द्रियकाम इति वाक्यार्थः स्यात् तथा चेन्द्रियस्यासाध्यत्वेनानन्वये तस्याफलत्वप्रसंगः न च नात्र गुणविधिः गुणपद

गुणविधौ च धात्वर्थस्य साध्यत्वेनान्वयः । क्वचिदाश्रयत्वेनापि । यथा दध्नेन्द्रियकामस्य जुहुयादित्यत्र दधिकरणत्वेनेन्द्रियं भावयेत् । तच्च किं
निष्ठमित्याकांक्षायां सन्निधिप्राप्तहोम आश्रयत्वेनान्वेति ॥ ९ स्यानर्थकत्वप्रसंगः होमस्योभयरूपेणान्वये तु पूर्वोक्तदोषापत्तिरित्याशंक्याह क्वचिदि

त्यादिना यद्यपि गुणविधौ धात्वर्थसाध्यत्वेनैवान्वयो नान्यथा यत्र तु तृतीययोपात्तेर्दध्यादिगुणकरणत्वं तस्य प्रत्ययार्थत्वेन दध्यादिगुणादपि प्रधानत्वात् फलभाव
नायां करणत्वेन विधीयते तत्र तु धात्वर्थस्याश्रयत्वेनैवान्वय इत्याह क्वचिदित्यादिना क्वचिदिति यत्र दध्यादिगुणकरणत्वस्य फलभावनायां करणत्वेन विधानं त
त्रेत्यर्थो ननु गुणविधावित्यर्थः तच्चेति तृतीययोपात्तदधिकरणत्वं चेत्यर्थः होमाश्रयदधिकरणत्वेनेन्द्रियं भावयेदिति वाक्यार्थः तथा च करणस्य कर्तृव्यापार
व्याप्यत्वनियमात् केवलदध्नः कर्तृव्यापाराविषयस्य करणत्वानुपपत्ते होमस्य च वाक्यान्तरप्राप्तत्वात् नापि विध्यनुपपत्तेः होमस्य गुणसंबंधविधाने फलपद
स्यानर्थकत्वप्रसंगात् तस्याफलसंबंधविधौ च गुणपदस्यानर्थक्यापातात् फलगुणोभयसंबंधविधौ च प्राप्ते कर्मण्यनेकपदार्थविधाने वाक्यभेदप्रसंगात् प्राप्ते
कर्मण्यनेकपदार्थविधानस्य च वाक्यभेदापादकस्य प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः अप्राप्ते तु विधीयन्ते बहवोप्येकयत्नत इति वचनविरोधेन स्वीक
र्त्तुमशक्यत्वात् तृतीययोपात्तस्य दधिकरणत्वस्य होमनिरूपितत्वेन फलभावनायां करणत्वमत्र विधीयत इति भावः प्राप्ते कर्मणीत्यत्र कर्मणो द्रव्याद्युपलक्ष

लौ०
भा०
१६

णत्ववद्गुणस्यापि प्रधानोपलक्षणत्वमेकोद्देशेनानेकविधाने वाक्यभेदात् अत एव ग्रहैकत्वाधिकरणे ग्रहं संमार्ष्टीत्यत्र ग्रहोद्देशेनैकत्वसंमार्जनविधौ वाक्य
भेदान्न ग्रहैकत्वमविवक्षितमित्युक्तम् तेन दध्नेन्द्रियकामस्य जुहुयादित्यत्रेन्द्रियसंबंधस्य प्रधानसंबंधत्वेपि न क्षतिः ननु कर्मणो द्रव्योपलक्षणत्वं भवतु ग्रहस्य
द्रव्यत्वात् गुणस्य प्रधानोपलक्षणत्वं कुत्र चरितार्थमिति चेन्न रेवत्यधिकरणे चरितार्थत्वात् तत्र हि एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेतेति
पशुकामो ह्येतेन यजेतेति तत्र च पशुकामस्य रेवतीनः सधमाद इत्यादिरेवतीष्वृक्षु वारवन्तीयसामगानत्वं न श्रूयते चात्र रेवतीनामृचां वारवन्तीयनामकेन साम्ना यः
संबंधः सोयं पशुफलाय ग्निष्टुति गुणो विधीयते एतस्येत्यनेन प्रकृतपरामर्शकेनैतच्छब्देनान्यव्यावर्तकेन चैवकारेणाग्निष्टुतः समर्प्यमाणत्वादिति चेन्न
रेवत्याधारकवारवन्तीयसाम्नोग्निष्टुत्कर्मसाधनत्वं पशुफलसाधनत्वं चेत्युभयस्य विधाने वाक्यभेदप्रसंगात् ततश्च पशुफलके रेवत्याधारकवारवन्तीयगुण

एतस्य विधेः सहकारिभूतानि षट् प्रमाणानि। श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यारूपाणि। एतत्सहकृतेनानेन विधिनांगत्वं परोद्दे
शप्रवृत्तकृतिसाध्यत्वरूपं पारार्थ्यापरपर्यायं ज्ञाप्यते। तत्र निरपेक्षो रवः श्रुतिः। सा च त्रिविधा। विधात्री अभिधात्री विनियोक्त्री च॥ तत्रो
द्यालिङाद्यात्मिका। द्वितीया व्रीह्यादिश्रुतिः। यस्य च शब्दस्य श्रवणादेव संबंधः प्रतीयते सा विनियोक्त्री॥ ९ विशिष्टकर्मान्तरमत्र विधीयते न

प्रकृते गुणः एतच्छब्दस्य बुद्धिस्थपरामर्शकत्वेनाप्युपपत्तेः एवकारस्य चायोगव्यवच्छेदकत्वमन्ययोगव्यवच्छेदकत्वं वोपपद्यत इत्युक्तत्वान्नाप्यपेक्षोग्निष्टु
त्फलसंबंधोभयविधौ वाक्यभेदो दुष्परिहर इत्यलम् एतस्य विधेरित्युक्तस्य विनियोगविधेरित्यर्थः एतत्सहकृतेनेति एतत्प्रमाणषट्कसहकृतेनेत्यर्थः
विनियोगविधिसहकारित्वं च तेषां विनियोगविधिकृतविनियोगे प्रमाणत्वाद्भवतीति बोध्यम् अनेन विधिनांगत्वं ज्ञाप्यत इत्यन्वयः अंगत्वं लक्षयति परोद्देशेने
त्यादिना यद्यपि ननु शेषत्वापरनामकस्यांगत्वस्य विनियोगविधिबोध्यत्वं संभवति तस्य निरूपणात् तन्निरूपणं च लक्षणप्रमाणाभावात् न तावदविनाभूतत्वं न
त्वं आग्नेयादीनां षण्णामविनाभूतत्वेन परस्परशेषत्वापत्तेः नापि प्रयोज्यत्वं शेषत्वं पुरोडाशकपाले न तुषोपवापप्रयोज्यत्वात् तुषोपवापं प्रति शेषत्वेन श्रुतस्यापि पुरोडा
शकपालस्योपवापाप्रयोज्यत्वात् न च विध्यन्तविहितत्वं शेषत्वमिति वाच्यम् दूषणत्वानिष्ठिनजीत्यत्र पलाशशाखाच्छेदनस्य सत्यपि शेषत्वे विध्यादिविहितत्वेनाव्याप्तिप्र १६

तत्वेपिवेदेनस्यशब्दैकगम्यत्वोपगमात् नापिशब्दः केनापिशब्देनशेषशेषिभावस्याप्रतीयमानत्वात् लोकेक्रियाकारकान्वयस्यैवव्युत्पत्तिप्रयोजक
त्वदर्शनेनतत्रकस्यापिशब्दस्यव्युत्पत्त्यग्रहात् तत्रचनहेतुरप्युपलभ्यतइतिचेदत्रोच्यते नतावदस्यलक्षणासंभवः पारार्थ्यस्यैवनिर्दुष्टशेषत्वलक्षणत्वात्
नापितत्रप्रमाणाभावः शब्दैकगम्यत्वात् नचतत्रव्युत्पत्त्यभावात्कथंशब्दगम्यत्वमितिवाच्यम् शेषशेषिभावस्यान्वयेन्तर्भावात्तत्रव्युत्पत्त्युपपत्तेः नहिगुण
प्रधानभावमंतरेणान्वयः संभवति द्वयोः प्रधानयोर्गुणयोर्वापरस्पराकांक्षारहितत्वेनान्वययोग्यत्वाभावात् ततोयथाक्रियाकारकतदन्वयाः शब्दगम्याः
तथातदन्वयांतर्गतः शेषशेषिभावोपिशब्दगम्यएव नापितत्रहेतोरभावः विवादास्पदः प्रयाजानुयाजप्रोक्षणादिः शेषोभवितुमर्हति पारार्थ्यात् भृत्यादिव
दि त्तिहेतुसत्त्वात् नचपारार्थ्यस्यैवलक्षणत्वेहेतुत्वेचसांकर्यप्रसंगइतिवाच्यम् सेनानीमहारथीवदाकारभेदेनतद्भेदोपपत्तेः दृष्टांतेगृहीतव्याप्तिहिसहायीकृत्य
बोधकत्वाकारोहेतुरितरव्यावृत्त्या बोधकत्वाकारश्चलक्षणमितितद्भेदइत्यभिप्रेत्यागतत्वंलक्षयतिपरोद्देशेनेति परंस्वर्गादिरूपमुत्कृष्टंसाध्यंफलंतदुद्दे
शेनसंकलनयामनसिसिद्धवत्करणेनतत्साधनयागादिषुप्रवृत्तस्यपुरुषस्यकृतिसाध्यत्वरूपंकृतिव्याप्यत्वरूपमित्यर्थः तथाचस्वर्गफलोद्देशेनदर्शादिषुप्र
वृत्तपुरुषकृतिव्याप्यत्वंप्रयाजानुयाजावघातप्रोक्षणादीनांसुप्रसिद्धमितितेषांशेषत्वम् यद्वापरशब्दोदर्शादिपरः तथाचतदुद्देशेनप्रवृत्तपुरुषकृतिव्या
प्यत्वंप्रयाजादीनांभवतीतितेषांतत्त्वं दर्शादेस्तुप्रयाजाद्युद्देशेनप्रवृत्तपुरुषकृतिव्याप्यत्वाभावान्नतत्रातिव्याप्तिः केवलप्रयाजाद्युद्देशेनकस्यचिदपिपु
रुषस्यप्रवृत्त्यभावादितिध्येयम् ननुकर्मण्यपिजैमिनिः फलार्थत्वात् फलंचपुरुषार्थत्वात् पुरुषश्चकर्मार्थत्वादित्यत्रजैमिनिसूत्रत्रयेकर्मफलपुरुषा
णामपिशेषत्वमुक्तं तत्रचकर्मणाफलोद्देशेनप्रवृत्तकृतिसाध्यत्वेपिफलपुरुषयोस्तुपुरुषकर्मोद्देशेनप्रवृत्तपुरुषकृत्यसाध्यत्वात्कथंशेषत्वमितिचेदत्रव
क्तव्यं स्वर्गस्यसाक्षात्कृतिसाध्यत्वाभावेपियदापुरुषः स्वस्वर्गोद्देशेनदर्शादिषुप्रयतनेतदैवकालांतरे ऽपूर्वद्वारेणस्वर्गोजायतेनान्यथेतिभवतिपुरुषकृ
तिव्याप्यत्वंतस्य तथास्वर्गफलोद्देशेनदर्शाद्युद्देशेनवाप्रवृत्तः पुरुषोयदैवतदनुष्ठानानुकूलंस्वप्रयत्नेनसंपादयतितदैवकर्मनिष्पद्यतेनान्यथेतितस्यापि
भवतिपुरुषकृतिव्याप्यत्वमितिसर्वमनवद्यम् तत्रश्रुतिंलक्षयतितत्रनिरपेक्षोरवइतितत्रषट्सुश्रुत्यादिप्रमाणानांमध्येइत्यर्थः स्वकरणीयेशेषत्वबोधेप्रमाणं

श्रुतिरित्यर्थः एवकुत्युक्तेवाक्याद्यावन्तिप्रसंगस्तद्वारणायनिरपेक्षइत्युक्तम् तांचश्रुतिंविभजते साचत्रिविधेतिविधात्रीविधानकर्त्री अभिधात्री अभिधानकर्त्री
विनियोक्त्री विनियोगकर्त्री तत्राद्यामुदाहरतितत्राद्यालिङाद्यात्मिकेतितत्रेतिसूणांश्रुतीनांमध्यइत्यर्थः आदिनालेडादिग्रहः अभिधात्रीमुदाहरतिद्वितीया
याव्रीहीनादीतितृतीयांविनियोक्त्रीलक्षयतियस्यचेत्यादिनासंबंधइतिविनियोज्यवियोजकभावः संबधइत्यर्थः शेषशेषिणोः संबंधइतिवाशेषः विनियोक्त्री
मपिश्रुतिंविभजतेसात्रिविधेतितत्रविभक्तिरूपांविनियोक्त्रीमुदाहरतितत्रेतियद्वेनतुविनियोक्त्र्याः श्रुतेर्लक्षणविभागावनुपपन्नौतस्या अंगत्वावोधकत्वा
दित्याशंक्यातत्रविभक्तिश्रुतेरंगत्वबोधकत्वंदर्शयतितत्रेतितिसूणांविनियोक्त्रीणामध्यइत्यर्थः विभक्तिश्रुत्यांगत्वबोध्यतएवतथोपलब्धेरितिशेषः कुत्रो

सापित्रिविधाविभक्तिरूपाएकाभिधानरूपाएकपदरूपाचेति तत्रविभक्तिश्रुत्या अंगत्वम्।यथाव्रीहिभिर्यजेतेतितृतीयाश्रुत्याव्री
हीणांयागांगत्वम्।तदपिपुरोडाशप्रकृतितया। यथापशोर्हृदयादिरूपहविष्प्रकृतितयायागांगत्वम्। अरुणया एकहायन्या
गवासोमंक्रीणातीत्यस्मिन्वाक्ये आरुण्यस्यापितृतीया ययाश्रुत्याक्रयांगत्वम्।तदपिगोरूपद्रव्यपरिच्छेदद्वारानतुसाक्षात्। अमू
नेत्वात्। व्रीहीन्प्रोक्षतीतिप्रोक्षणस्यव्रीह्यंगत्वंद्वितीयाश्रुत्यात्तच्चप्रोक्षणंनव्रीहिस्वरूपार्थम्।तस्यतेनविनाप्युपपत्तेः।किंत्वपूर्वसाधन
त्वप्रयुक्तम्। व्रीहीनप्रोक्षस्ययागानुष्ठानेऽपूर्वानुपपत्तेः।एवंसर्वेष्वंगेष्वपूर्वप्रयुक्तमंगत्वंबोध्यम्॥ पलंभइतिवीप्सायांतत्रोदाहरणमा
हयथाव्रीहिभिरितितदपीतिव्रीहीणांयागांगत्वमपीत्यर्थः व्रीहीणांपुरोडाशप्रकृतितयायागांगत्वेदृष्टांतमाहयथापशोरितिअथहृदयस्याग्रेवपत्यथ
वक्षसइत्यादिशास्त्रात्पशोर्हृदयादिरूपहविरुपादानतयैवयागांगत्वंनसाक्षात्तद्वत्त्रापीत्यर्थः क्वचित्तुसाक्षात्पशोरेवयागांगत्वंयथापत्नीवंतयागेतत्रहिप
शोरग्नेयस्यजीवतएवोत्सर्गः क्रियतेपर्यग्निकृतंपत्नीवंतमुत्सृजंतीतिवाक्यात् तथाचयत्रपशोर्विशसनंहृदयाद्यवदानंचभवतितत्रहृदयादिप्रकृतिरे
वपशुरितिसिद्धम् तृतीयाविभक्तिरूपायाविनियोक्त्र्याउदाहरणांतरमाह आरुण्यस्यापीत्यादिनाअरुण्यापिंगाक्ष्याएकहायन्यासोमंक्रीणातीतिज्योतिष्टोम

क्वचित्पुस्तके मूलग्रंथ एवेदं वाक्यमुदाहृतम् अत्रारुणाशब्दोरुणिमानं गुणमाचष्टे तस्य गुणविषयतया प्रयुक्तस्यापि नागृहीतविशेषणा विशिष्टबुद्धिरि
तिन्यायेन गुणबोधकत्वादन्वयव्यतिरेकसिद्धगुणमात्रव्युत्पत्तिकत्वाच्च पिंगाक्षीशब्दस्तु पिंगलवर्णविशिष्टास्मिन्द्रव्यवाचको भवति एकहायनीशब्दश्चैक
संवत्सरविशिष्टगोद्रव्यवाचकः तौ च शब्दौ यद्यप्येकगोवाचकौ भवतस्तथापि विशेषणभूतधर्मभेदाच्छब्दद्वयमुपपद्यते तेन युगपत्प्रवृत्तसद्धर्मद्वयविशिष्ट
गोद्रव्यं क्रयसाधनत्वेन विधत्ते अरुणाशब्दस्त्वरुणिमगुणस्य कारकाणां क्रियान्वयनियमेन सोमक्रयणान्वयेपि साक्षात्साधनत्वे नामूर्तमरुणिमानं गुणं न वि
दधात्यमूर्तस्य साक्षात्साधनत्वासंभवात् किंतु सोमक्रयणसाधनीभूतगोद्रव्यपरिच्छेदकत्वेन तत्साधनं तथा च परस्परमनन्वितानामेवारुणपिंगाक्षीत्वा
दीनां कारकाणां क्रियान्वयनियमात्करणविभक्तिभिः सोमक्रयणांगत्वेनान्वये सत्यारुण्यादेश्च गुणत्वेनामूर्तस्य स्वतः सोमक्रयणसाधनत्वायोगात्तत्साधन
गोद्रव्यपरिच्छेदकत्वेन पश्चात्परस्परं पार्ष्णिकान्वयो भवति एकहायनी गोः सा पिंगाक्ष्यरुणा चेत्याशयावानाहत्तदपीति क्रयांगत्वमपीत्यर्थः द्वितीयारूपा
विनियोजकश्रुतिमुदाहरति व्रीहीन्प्रोक्षतीति न चेति प्रोक्षणस्य व्रीह्यंगत्वं चेत्यर्थः तच्चेत्यस्यापूर्वसाधनत्वप्रयुक्तमित्यनेनान्वयः प्रोक्षणं व्रीहिस्वरूपार्थमे
वस्यादिति कुतस्तस्यापूर्वप्रयुक्तं व्रीह्यंगत्वमित्यत आह प्रोक्षणं नेति प्रोक्षणस्य व्रीहिस्वरूपार्थत्वाभावे हेतुमाहनस्येत्यादिना तस्य व्रीहिस्वरूपस्योत्पत्तेन
विना प्रोक्षणेन विनेत्यर्थः ननु प्रागनुष्ठानेनैवापूर्वसिद्धौ किं प्रोक्षणेन व्रीहिस्वरूपानुपयोगिनेत्यत आह व्रीहीन प्रोक्ष्येति अनुपनीतानुष्ठितवैदा
ध्ययनस्यापूर्वजनकत्ववद्व्रीहीणां प्रोक्षणं न कृत्वा तैरनुष्ठितस्य यागस्यापूर्वजनकत्वानुपपत्तेरित्यर्थः प्रोक्षणे सिद्धमपूर्वसंप्रयुक्तं व्रीह्यंगत्वमन्यत्राति
दिशति एवमित्यादिना एवं दर्शपूर्णमासप्रकरणसहकृतया द्वितीयाश्रुत्या प्रोक्षणस्य तंदुलनिष्पत्तिप्रणालिकया व्रीहिद्वारापूर्वसाधनत्वप्रयुक्तांग
त्ववत्सर्वेषामंगानामवघातादीनां तत्तत्प्रमाणवशादपूर्वसाधनत्वप्रयुक्तमेवांगत्वमित्यर्थः द्वितीयारूपाया विनियोक्त्र्याः श्रुतेरुदाहरणांतरमा
ह एवमित्यादिना एवं द्वितीयाश्रुत्या प्रोक्षणस्य व्रीह्यंगत्ववदित्यर्थः कृतस्येति संपन्नफलस्येत्यर्थः तथा च संपन्नफलसंबंधिनीं रशनामिमां गृह्णी
तवंत इति मंत्रार्थः अश्वाभिधान्यंगत्वमिति अश्वाभिधान्या अश्वरशनाया अंगत्वमित्यर्थः केचित्तु वाक्योयमिमं विनियोगमाहुः अन्ये तु वाक्य।

ल्लिंगस्य बलीयस्त्वेन यावद्धाकारस्याभिधानं गत्वं भवति तावद्रशनामात्रांगत्वमेव स्यादिति तत्र दूषणमाहुः वाक्यविनियोगवादिनस्तु मंत्रस्य न र
शनामात्रप्रकाशकत्वं किंतु कृतस्य सत्यफलसाधनभूतस्याश्वस्येमां रशनां गृहीतवंत इत्यश्वरशनाप्रकाशकत्वमेवेति लिंगसहकृतादश्वाभिधानीमादत्त
इति वाक्यान्मंत्रस्याश्वरशनादाने विनियोग इति स्वाशयमाहुः रशनाविशेषस्य न लिंगमिति तु मूलग्रंथतात्पर्यम् सप्तमीविभक्तिरूपां विनियोक्त्रीं श्रुतिमु
दाहरति यदाहवनीय इति एवमन्योपीति दध्ना जुहोतीति पयसा जुहोतीत्यादौ होमानुवादेन दध्यादेस्तदंगत्वेन तृतीयाविभक्तिश्रुत्या विनियोग इत्यर्थः एकाभि
धानरूपामेकपदरूपां च विनियोक्त्रीं श्रुतिमुदाहरति पशुना यजेतेतीति पशुनेत्यत्रैकपदश्रुत्या ह्येकत्वपुंस्त्वयोः पशुद्रव्यांगत्वमेकाभिधानश्रुत्या च कारकां

एवमिमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त इत्यत्र द्वितीयया श्रुत्या मंत्रस्याश्वाभिधान्यंगत्वम्। यदाहवनीये जुहोतीत्याहव
नीयस्य होमांगत्वं सप्तमीश्रुत्या। एवमन्योपि विभक्तिश्रुत्या विनियोगो ज्ञेयः। पशुना यजेतेत्यत्रैकत्वपुंस्त्वयोः समानाभिधानश्रुत्या का
रकांगत्वम्। यजेतेत्याख्याताभिहितसंख्याया आर्थीभावनांगत्वं समानाभिधानश्रुते रेकपदश्रुत्या च यागांगत्वम्। न त्वामूर्ता
यास्तस्याः कथं भावनांगत्वं वाच्यम् कर्तृपरिच्छेदद्वारा तदुपपत्तेः॥ १ गत्वं च भवति यजेतेत्यत्राख्याताभिहितसंख्याया एकाभिधानश्रुत्या

भावनांगत्वमेकपदश्रुत्या च यागांगत्वं च भवतीति भावः यजेतेत्याख्याताभिहितसंख्यायाः समानाभिधानश्रुतेरेव भावनांगत्वमिति संबंधः समा
नाभिधानश्रुतेरेवेति एकशब्दरूपप्रत्ययश्रुतेरेवेत्यर्थः अभिधीयतेनेनेति व्युत्पत्त्याभिधानशब्देन शब्द उच्यते पदश्रुत्या चेति यजेतेत्येकपदश्रुत्या चेत्य
र्थः अत्रेदं बोध्यम् यथा दशापवित्रेण ग्रहं संमार्ष्टीत्यत्रैकत्वमुद्देश्यगतत्वेनाविवक्षितं तथा प्रकृते नोद्देश्यगतमेकत्वं किंतु विधेयगतत्वेन विवक्षितमेव
न च ग्रहं संमार्ष्टीत्यत्र नोद्देश्यगतमेकत्वं किंतु स्वयं विधेयमिति वाच्यम् ग्रहं संमृज्याद्ग्रहं संमृज्यात्तं चैकमिति वाक्यभेदप्रसंगात् तथा च ग्रहमिति द्वितीया। राम
याग्रहस्येप्सिततमत्वेनोद्देश्यत्वात्प्रयोजनवत्त्वात्प्राधान्यं गम्यते संमार्गस्तु ग्रहं प्रति गुणभूत एव न तत्र प्रतिप्रधानं गुण आवर्तनीय इति न्यायाद्यावंतो ग्रहा

स्तावतां सर्वेषां संमार्ग इति निश्चये सति कतिग्रहाः संमार्जनीया इति बुभुत्साया अभावादुद्देश्यगतमेकत्वं श्रूयमाणमपि न विवक्ष्यते यस्य च विशेषणस्य विव
क्षामंतरेणोद्देश्यप्रत्ययो न पर्यवस्यति तादृशं विशेषणमुद्देश्यगतमपि विवक्ष्यत एव यथा तत्रैव ग्रहत्वं न हि विवक्षामंतरेणोद्देश्यस्वरूपं ज्ञातुमशक्यमेवमु
द्देश्यतावच्छेदकनिर्णयमंतरेण चमसेष्वपि संमार्गप्रसंगात् तेन च न तत्र तद्द्वारेण फलम् पशुना यजेतेत्यत्र तु यागं प्रति पशोर्विधेयत्वेन गुणभूतत्वात्प्रति प्रधानं
गुणा आवर्तनीया इति न्यायप्रवेशो नास्ति यागस्य च प्रधानत्वादिति किंपता पशुना यागः कर्तव्य इति बुभुत्सायाः सत्त्वादेकवचनेन प्रतीयमानं विधेयगतमेकत्वं
विवक्षितमेव किंच लिंगसंख्याविशेषितस्यैकपदोपात्तस्य पशुद्रव्यरूपकारकस्य विधेयपशुद्वारा तत्तल्लिंगसंख्यादेरपि क्रियागत्वादेकत्वादिकं विवक्षित
म् किंच तृतीयया विभक्त्याऽभिहितयोर्लिंगसंख्ययोर्विभक्त्यभिहिततया करणकारकशक्त्यात्मसात्कृतयोः प्रातिपदिकार्थपशुद्रव्येण सह संबंधमनादृत्य
पशुवदेव साक्षाद्यागक्रियागत्वेन विधोपपत्त्या द्वारुणैकहायनीन्यायेन वा परस्परमन्वयोऽपि भवति यो यागांगत्वेन विहितः पशुः स एकः पुमांश्चेति तस्मात्स
र्वथा पश्वेकत्वादिकं विवक्षितमेवेति ननु संख्याया न यागांगत्वं भावनांगत्वं च भवति गुणत्वेनामूर्तत्वात् न ह्यमूर्तस्य रूपादेः कुत्रचिदंगत्वं दृश्यते व्री॥
ह्यादिद्रव्यस्यैव मूर्तिभूतस्य ह्यंगत्वमित्याशंक्य परिहरति नचेत्यादिना भावनाया यागस्य चोपलक्षणत्वम् न चेति प्रतिषेधे हेतुमाह कर्त्रिति कर्तुरर्थे भाव
नारूपव्यापारवतो यागकर्तुः परिच्छेदद्वारा संख्याया भावनाद्यंगत्वोपपत्तेरित्यर्थः नन्वेवं समानाभिधानश्रुत्यापासा स्यादेव कर्तरि संख्याख्यातार्थभूतान्वेतु त
स्यैवाख्यातार्थत्वात् भावनानुकर्तृव्यापारभूता धातुनापि लभ्यते तथा चोक्तं फलव्यापारयोर्धातुराश्रये तु तिङः स्मृता इति फले विक्लित्त्यादि व्यापारस्तु
भावनाभिधा तत्र धातुः स्मृतः आश्रये तु फलाश्रये कर्मणि व्यापाराश्रये कर्तरि च तिङः स्मृता इति वैयाकरणा इह वचनपदार्थः न च कर्तुराख्यातवाच्यत्वम
प्रामाणिकमिति वाच्यम् लः कर्मणि च भावे चाकर्मकेभ्य इति मुनिप्रणीतसूत्रस्यैव चकारात्कर्तरि कृदिति सूत्रोक्तकर्तरीत्यनुकर्षणेन लकाराणां सकर्म
केभ्यो धातुभ्यः कर्मणि कर्तरि चाकर्मकेभ्यश्च भावे कर्तरि च विधायकस्य प्रमाणत्वात् तस्मात्कर्तर्येव समानाभिधानश्रुत्याऽऽख्यातार्थसंख्या संबध्यते न
भावनायामित्याशंक्याह कर्तेति चाक्षेपलभ्य इति आक्षेपोऽनुमानमर्थापत्तिर्वा तादृशाक्षेपेण लभ्योऽनुमेयः कस्मैवेत्यर्थः तस्याश्च भावनासाम्य ॥

सौ० मी० १९

यागुणत्वाद्यापारविशेषत्वाच्च संप्रतिपन्नगुणवतादृशव्यापारविशेषवच्चतथा लोके व्यापारविशेषस्य निराश्रयस्यादर्शनाद्भावनारूपो व्यापारविशेषोप्यमथा
नुपपद्यमानः स्वाश्रयमाक्षिपतीत्यर्थापत्तिः नचाचेतनस्यैव कस्यचिदाश्रयस्य लाभ इति वाच्यम् कृतिशब्दाभिधेयस्य भावनारूपव्यापारविशेषस्याचेतनाश्रयत्वा
नुपपत्तेः किंच भावनाक्षिप्तेच कर्तर्याख्यातस्य लक्षणास्वीकारेण शाब्द्याः संख्याया अशाब्दे न कर्त्रान्वयानुपपत्तिः तस्यापि लक्षणया शाब्दत्वात् शब्दगम्यत्व
स्य हि शाब्दत्वात् नच कर्तुरेवाख्यातवाच्यत्वेन भावनाया आक्षेपलभ्यत्वं स्यादिति वाच्यम् कृतिमत एव कर्तृत्वेन कृतेरेव भावनापरनामधेयाया आक्षेपाधिक
रणन्यायेनाख्यातवाच्यत्वसंभवे तत इतः कर्तुराख्यातवाच्यत्वकल्पनायां गौरवात् किंच यस्य हि प्रकारान्तरेणालाभः स एव शब्दस्यार्थो भवति नतु तदन्यः शब्दवाच्या
र्थः अनन्यलभ्यः शब्दार्थ इति न्यायात् अत एव नतीरंगापदार्थः तस्य लक्षणयैव प्रतिपन्नत्वात् एवं चोक्तन्यायेन भावनाया आख्यातवाच्यत्वे संप्रतिपन्ने तया
कर्तुराक्षेपेण लाभे पुनरपि तस्याख्यातवाच्यत्वकल्पनं न्यायविदां शोभते नच लः कर्मणि च भावे चाकर्मकेभ्य इति मुनिस्मरणबलादेव कर्तुराख्यातवाच्यत्वं

## कर्ताक्षेपलभ्य आख्यातेन हि भावनोच्यते ॥

न स्वयं कल्पितमिति युक्तम् वाच्यवाचकभावस्योक्तन्यायसहकृतान्वयव्यतिरेकगम्यत्वेन तत्स्मृतिस्मरणाप्रयोज्यत्वात् तत्र कर्तृकर्मपदयोः कर्तृत्वकर्मत्वपरत्वे
न तस्य कृतिकर्मत्वयोर्लकारविधायकत्वसंभवाच्च किंच नासस्याक्षणस्य कर्तुराख्यातवाच्यत्वे प्रमाणत्वं संभवति द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवचनमित्य
नेन सूत्रेण तस्य सूत्रणस्यैकवाक्यत्वेन कर्तुरेकत्वे एकवचनात्मको लकारो द्वित्वे द्विवचनात्मको बहुत्वे बहुवचनात्मको लकारो भवेदित्यस्मिन्नेवार्थे प्रमाणत्वात् नच
कर्तुराख्यातानभिधेयत्वे देवदत्तेन पचतीति प्रयोगापत्तिरनभिहितयोः कर्तृकरणयोस्तृतीयाया एव विहितत्वादिति वाच्यम् उक्तन्यायेन कर्तुर्भावनयैवाक्षेपा
त्तद्गतसंख्यायाश्चाख्यातेनैव प्रतीतेस्तृतीयायाः कर्तृप्रतिपत्त्यर्थत्वं तद्गतसंख्याप्रतिपत्त्यर्थत्वयोरसंभवात् तथाचोक्तं वृद्धैः संख्यायां कारके बाधो विभक्त्या एम० १९
हि प्रवर्तते उभयं चात्र तात्सिद्धं भावनातिङ्भिः कृतम् इति नच कृतामपि खलर्थजादीनां कर्तृवाचकत्वं न स्यात्तत्र मानस्य वक्तव्यत्वादिति वाच्यम् कर्तरि कृ
दिति मुनिप्रणीतसूत्रस्यैव तेषां तत्र शक्तिग्राहकत्वात् ॥ ॥

ननु तर्हि कर्तरि कृदिति सूत्राद् अवलः कर्मणीत्यत्र कर्तृपदमनुवर्त्यते तथा च तत्र तस्य धर्मिपरत्वेऽवाधितत्परत्वाप्यत्र धर्मपरतायां तु तत्रापि धर्मपरत्वैवस्या
दिति चेन्न शब्दाधिकाराश्रयणात् तु वर्तिनस्य कर्तृपदस्य धर्मपरतायां बाधकाभावात् न च शब्दाधिकाराश्रयस्य गमकमन्तरेणासंभवात् कृता मिवाख्या
तस्यापि कर्तृवाचित्वमेवास्त्विति वाच्यम् कृतिमत इत्यादिना तत्र गमकस्य दर्शितत्वात् तथा च कृतिशब्दाभिधेयस्य कर्तृधर्मस्याख्यातवाच्यत्वे सिद्धे तु
वर्तिनस्य कर्तृपदस्य धर्मपरत्वमेव व्या ख्येयम् समुच्चयार्थकेन लः कर्मणि चेति सूत्रस्य चकारेणैव चाकर्तृधर्मस्यैव लाभो भवति न कर्तृपदानुवृत्तिः कर्त
व्या कल्पनालाघवात् पूर्वोक्तन्यायेन कर्तृधर्मस्य भावनारूपस्याख्यातवाच्यत्वसिद्धेश्चेत्यलमतिविस्तरेण तस्माद्भावनैवाख्यातवाच्या न कर्तेति द्योत्य
इत्यभिप्रेत्याह आख्यातेन हि भावनोच्यत इत्यादिना सा कर्तृव्यापाररूपा भावना कर्तारं विना पूर्वोक्तप्रकारेण कर्तारमाक्षिपतीत्यर्थः एवं श्रुतेः प्रमाणां

नुपपद्यमाना[1]

सा च कर्तारं विनानुपपन्नेति तमाक्षिपति। सेयं श्रुतिर्लिंगादिभ्यः प्रबला। लिंगादिषु न प्रत्यक्षो नियोजकः शब्दोऽस्ति किंतु कल्प्यो पावच्चैते
विनियोजकः कल्प्यते तावत्प्रत्यक्षया श्रुत्या विनियोगस्य कृतत्वेन तेषां कल्पकत्वशक्तेर्व्याहतत्वात्॥ ((तरनिरपेक्षविनियोजकत्वं
निरूप्य तस्या लिंगादिभ्यः पंचभ्यः प्रमाणेभ्यः प्राबल्यमाह सेयं श्रुतिर्लिंगादिभ्यः प्रबलेति कुत इत्याकांक्षायां तत्र हेतुमाह लिंगादिषु न प्रत्यक्ष इत्या
दिना यावच्च लिंगादिभिर्विनियोजकः शब्दोऽर्थप्रकाशनादिना कल्प्यते तावत्प्रत्यक्षोपलब्धया श्रुत्या शेषिणा शेषसंबंधबोधस्य कृतत्वेन लिंगादीनां
विनियोजकश्रुतिकल्पनद्वारेण विनियोगशक्तेः प्रतिबद्धत्वादित्यर्थः तत्र लिंगाच्छ्रुतेः प्राबल्यसिद्धौ वत तस्मादपि दुर्बलेभ्यो वाक्यादिभ्यस्तस्याः प्राब
ल्यसिद्धये ताबल्लिंगात्प्राबल्यमुदाहरणप्रदर्शनेन साधयति अत एवेत्यादिना अत एव लिङ्गादिभ्यः श्रुतेः प्रबलत्वादेव ऐन्द्र्या इति षष्ठी ऐन्द्रस्य सा तीन्द्रप्रका
शनसमर्था या अस्या ऋचो न लिंगादिन्द्रोपस्थानाङ्गत्वमित्यर्थः ननु यदीन्द्रप्रकाशनसामर्थ्यरूपाल्लिंगादैन्द्र्या ऋच इन्द्रोपस्थानार्थत्वं न भवति तर्हि तत्रान्यप्रकाश
नसामर्थ्यादर्शनेन तस्याः कस्यचिदप्युपस्थानार्थत्वासंभवाद् व्यर्थमेवस्यादित्याशंकते किं त्विति यद्यपीन्द्रशब्दस्य गार्हपत्ये गौणरूढिर्नास्ति तथापि तस्य ग

लौ० न यागसाधनत्वं न वा मुख्येंद्रसदृशत्वाद्गुणाद्वृत्तिरस्ति तथा चैंद्र्याः स्वप्रकाशनसामर्थ्यस्यापि सत्वेन द्वितीयाश्रुत्या तदुपस्थापनार्थत्वं निर्विघ्नमुपपद्यत इति स
मी० मा धने ऐंद्र्या गार्हपत्यमित्यादिनाऽन्वायमाशयः ऐंद्र्या गार्हपत्यमुपतिष्ठत इति श्रूयते न त्वत्र च काशाचिन स्तीरीरसि नेंद्र सख्या स्तिराश्रुषे इत्यस्याद्दे गौर्द्री तत्रेंद्र
२० स्वप्रकाशनात् भोइंद्र कदाचिदपि घातको न भवसि किं त्वाहुतिं दत्तवते यजमानाय प्रीयस इति तस्या अर्थः तत्रेंद्रप्रकाशनसामर्थ्यरूपाल्लिंगान्मंत्रस्येंद्रविषय
क्रियासाधनत्वं गम्यते यद्यसौ मंत्रः इंद्रप्रधानक्रियायाः साधको न भवेत्तदानीमनेन मंत्रेणेंद्रप्रकाशनं व्यर्थं स्यात् तस्मादेतन्मंत्रकरणकक्रियां प्रति इंद्रः प्रधान
मित्येतादृशबुद्ध्युत्पादनं लिंगविनियोगः कासौ क्रियेति विशेषजिज्ञासायामैंद्र्योपतिष्ठत इत्यनेनाविरुद्धपदद्वयरूपेण वाक्येनोपस्थापितक्रियायां पर्यवसानं क्रिय
ते तथा सत्यैंद्रमंत्रेणेंद्रमुपतिष्ठेतेत्ययमर्थः पर्यवस्यति तथा गार्हपत्यमित्यनया द्वितीयांतपदरूपया श्रुत्या गार्हपत्यस्य प्राधान्यं गम्यते तेन त्वगुणभूतां यत्कि
चित्करणकक्रियामंतरेणानसंभवतीति तस्मादृशीं कांचित्क्रियां प्रति गार्हपत्यः प्रधानमित्येतादृशबुद्ध्युत्पादनं श्रुतिविनियोगः ऐंद्र्योपतिष्ठत इति पदद्वयेन मंत्रवि

अत एवैंद्र्या लिंगान्नेंद्रोपस्थानार्थत्वम्। किंतु ऐंद्र्या गार्हपत्यमुपतिष्ठत इत्यत्र गार्हपत्यमिति द्वितीयाश्रुत्या गार्हपत्योपस्थानार्थत्वम्।

शेषक्रियाविशेषयोः पर्यवसानं भवति तथा सत्यैंद्रमंत्रेण गार्हपत्यमुपतिष्ठत इत्यर्थो भवति यद्यपि प्रमाणत्वाविशेषाच्छ्रुतिलिंगयोर्विरोधे प्राप्ते व्रीहियवव
द्विकल्पः स्यात् इंद्रगार्हपत्ययोः प्रधानत्वाविशेषादुपस्थानस्य च गुणत्वात्प्रतिप्रधानगुणावृत्तिरिति न्यायेनोपस्थानावृत्त्या श्रुतिलिंगयोः समुच्चयो वा स्या
त् श्रुतिर्विनियुंजाना वस्तुसामर्थ्यमनपेक्ष्यैव विनियुंक्ते अन्यथा वह्निना सिंचेद्वारिणा दहेदित्यपि विनियुज्येत तस्मात्तदुपजीव्यत्वेन लिंगस्य प्रबलत्वा
दिंद्रस्यैव मंत्रेणोपस्थापयो वा स्यात् तथाप्यैंद्रमंत्रस्य गार्हपत्येऽन्यो मुख्यवृत्त्या सामर्थ्याभावेऽपि गुणवृत्त्या सामर्थ्यस्योक्तत्वात्सामर्थ्याभावकृतप्रतिबंधाभा
वान्निर्विघ्ना श्रुतिरेव विनियुंक्ते लिंगं तु विलंबेन विनियुंक्ते तथा हि तत्र प्रथमं मंत्रपदानि स्वाभिधेयार्थं प्रतिपादयंति ततऊर्ध्वं मंत्रस्य वस्तुप्रकाशनसामर्थ्यं राम०
निरूप्यते ततऊर्ध्वं च तत्सामर्थ्यवशात्साधनत्ववाचिनी प्रधानत्ववाचिनी च श्रुतिः कल्प्यते कल्पिता च श्रुतिः पश्चादैंद्रमंत्रेणेंद्रमुपतिष्ठेतेति विनियुंक्त इति मंत्र २०

पदाभिधेयप्रतिपादनविनियोगयोर्मध्यवर्तिनौ सामर्थ्यनिरूपणश्रुतिकल्पनव्यापारौ भवतः प्रत्यक्षश्रुतिविनियोगपक्षे तु मंत्रपदाभिधेयप्रतिपादनमात्रे णात्तस्या विनियोजकत्वसंभवात्तौ मध्यवर्तिनौ व्यापारौ भवत इति श्रुतेः प्राबल्यात्तया लिंगबाध्यत्वेन च प्रत्यक्षश्रुतिविनियोगवेलायामलब्धात्मकत्वेन प्राप्तेर्लिंगश्रुत्या कथं बाध्यत इति वाच्यम् तार्तीयबाधत्वेन भविष्यत्प्राप्तिप्रतिबंधस्यैवात्र बाधत्वात् बाधश्च द्विविधः प्राप्तबाधोऽप्राप्तबाधश्च तत्र दशमे प्राकृतानामंगानां चोदकेन विकृतौ प्राप्तानां प्रत्याम्नानादर्थलोपान्निषेधाद्वा यो बाधः स प्राप्तबाधः यथा चोदकप्राप्तानां प्राकृतानां कुशानां शरमयं बर्हिरिति प्रतिकूलशराम्नानाद्बाधः यथा वावघातप्रयोजनस्य वैतुष्यरूपस्य लोपात्कृष्णलेष्ववघातबाधः यथा च पित्र्येष्टौ न होतारं वृणीत इति प्रतिषेधाद्धोतृवरणस्य बाधः अप्राप्तबाधस्तु तृतीयाध्याये यो बाधः तत्र हि यावद्दुर्बलप्रमाणेन विनियोगः कर्तुमारभ्यते तावत्प्रबलप्रमाणेन विनियोगस्य कृतत्वादेवानेन वा तद्बोधितेन वेन बाधोऽप्राप्तबाध एव दुर्बलप्रमाणस्याप्रवृत्तत्वादेव न तत्र कथंचित् प्राप्तभाविप्रवृत्तिप्रतिबंधस्यैवात्र बाधत्वमिति सिद्धम् तस्माद्द्वितीयया श्रुत्या विनियुक्तस्यैव मंत्रस्य पुनर्विनियोगाकांक्षाया अनुदयाद्विनियोजकं तस्यैव लिंगं न प्राप्नोतीति तस्माद्गार्हपत्योपस्थान एव मंत्रः प्रत्यक्षश्रुत्यैव विनियुज्यत इति सिद्धम् एवम ग्निचयने समाम्नाता निवेशनः संगमन इत्यादिका पि काचिदृगैंद्री भवति तस्या उत्तरार्द्धे इंद्रेण तस्या वितिपतनात् सापि निवेशनः संगमनो वसूनामित्यैंद्र्या गार्हपत्यमुपतिष्ठत इति ब्राह्मणे तृतीययैंद्र्येति श्रुत्या गार्हपत्योपस्थाने विनियुज्यते तेन तस्या अपि पूर्वोक्तन्यायेन गार्हपत्यप्रकाशनसामर्थ्यस्य सत्त्वात् न च मंत्रस्यैंद्रपदस्य गुणवृत्त्या गार्हपत्ये स्नेहनत्वेपि रूढ्या तु स्वर्गाधिपतौ सहस्राक्षे इंद्रे तत्त्वान्मंत्रेण प्रकाशिते मुख्ये इंद्रे मंत्रब्राह्मणयोर्विवादपरिहाराय ब्राह्मणस्य गार्हपत्यशब्देन निरूढगुणसंबंधद्वारेणैंद्री लक्षणीयेति वाच्यम् इंद्रगार्हपत्यशब्दयोरन्यतरस्य गौणत्वेऽवश्यंभाविनि सति मंत्रस्य प्राप्तार्थत्वेनानुवादकत्वसंभवान्मंत्रस्थेंद्रपदस्यैव गौणत्वसत्त्वात् ब्राह्मणवाक्यस्याप्राप्तार्थत्वेन विधायकत्वाद्धि तल्लक्षणाया अन्याय्यत्वाच्च तस्माद्गार्हपत्यप्रकाशने समर्थमेव मंत्रमैंद्रीति तृतीयाश्रुतिर्गार्हपत्योपस्थाने विनियुंक्त इति सिद्धम् एवं श्रुतेर्लिंगस्य दौर्बल्यवल्लिंगादेः पूर्वस्मात्पूर्वस्मात्परस्य परस्य वा क्यादेरेकविनियोज्यविषयत्वेन विरोधे दौर्बल्यं स्वार्थाविबोधने परस्य पूर्वव्यवधानेन प्रवृत्तेः ॥

तथा च सूत्रं श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति एवं श्रुतिं निरूप्य लिंगं लक्षयति शब्दसामर्थ्यमिति लिंगमिति लक्ष्यनिर्देशः सामर्थ्यं लिंगमित्युक्ते अंकुरादिजननानुकूलबीजादिसामर्थ्येऽतिप्रसंगः स्यात्तद्वारणाय शब्देति विशेषणम् सामर्थ्यं हि द्विविधं शब्दगतमर्थगतं चेति तत्राद्यस्य लक्षणमत्रोक्तं तत्रैव वृद्धसंमतिं प्रदर्शयन्नर्थमाह यथाहुरित्यादिना अंत्यं तु यथा स्रुवेणावद्यतीत्यवदानसामान्यशेषत्वावगमेऽपि स्रुवस्य लिंगात्सामर्थ्यरूपादाज्यसान्नाय्यादिद्रवद्रव्यावदानविशेषांगत्वं स्रुवेण मांसादिद्रव्यावदानस्य कर्तुमशक्यत्वादिति ननु रूढिरूपस्य सामर्थ्यस्य समाख्यातो न भेदः स्यात् तथा च बर्हिर्देवसदनं दामीति मंत्रस्योलपादिलवनांगत्वमपि स्यादित्याशंक्याह समाख्यातो भेद इति रूढिरूपस्य सामर्थ्यस्येति शेषः यौगि

शब्दसामर्थ्यं लिंगम्। यदाहुः। सामर्थ्यं सर्वशब्दानां लिंगमित्यभिधीयते। सामर्थ्यं रूढिरेव। तेन समाख्यातो नाभेदः। यौगिकशब्दसमाख्यातो रूढ्यात्मकलिंगशब्दस्य भिन्नत्वात्। तेन बर्हिर्देवसदनं दामीति मन्त्रस्य कुशलवनांगत्वं न तूलपादिलवनांगत्वं। तस्य बर्हिर्दामीति लिंगात् तल्लवने प्रकाशयितुं समर्थत्वात्। एवमन्यत्रापि लिंगाद्विनियोगो द्रष्टव्यः। तदिदं लिंगं वाक्यादिभ्यो बल

कशब्दरूपसमाख्यातो रूढ्यात्मकस्य लिंगशब्दस्य भेद एव प्रसिद्धेः तथा च न तयोरभेद इत्यर्थः समाख्यातो नाभेद इति पाठेऽपि स एवार्थः रूपस्य सामर्थ्यस्य समाख्यातो भेदे फलितमाह तेनेति रूढिसमाख्ययोर्मिथो भेदेन पुरोडाशसदनभूतं बर्हिः खंडयामीति श्रुतपदसामर्थ्याद्बर्हिर्देवसदनं दामीति मंत्रस्य कुशकाशादिरूपाणां मुख्यबर्हिषां लवनांगत्वं न तु समाख्यातो दर्भसदृशानामल्पादिरूपतृणविशेषाणां गौणबर्हिषां लवनांगत्वमित्यर्थः उक्तेर्थे हेतुमाह तस्येत्यादिना तस्येति बर्हिर्देवेत्यादिमंत्रस्येत्यर्थः तल्लवनमिति कुशलवनमित्यर्थः एवमन्यत्रापीति बर्हिर्देवसदनं दामीति मंत्रस्य कुशलवनांगत्ववदग्नये जुष्टं निर्वपामीत्यादिमंत्रस्यापि निर्वापादिप्रकाशनसामर्थ्यरूपाल्लिंगान्निर्वापादौ विनियोग इत्यर्थः अत्रेदं बोध्यम् तस्य हि मंत्रस्य निर्वापांगत्वं संभवति यस्य यस्य यत्प्रकाशनसामर्थ्यं तस्य मंत्रस्य तदंगत्वमिति न्यायात् तच्च लिंगं द्विविधं सामान्यसंबंधबोधकप्रमाणांतरानपेक्षं तत्सापेक्षं चेति तत्र यद्विनायत्न

तस्य तदंगत्वं सामान्यसंबंधबोधकप्रमाणांतरानपेक्षं केवललिंगाद्भवति यथार्थज्ञानस्य कर्मानुष्ठानांगत्वं अर्थज्ञानं विना तदनुष्ठानासंभवात् यद्विना यत्संभवति तस्य तदंगत्वं तत्सापेक्षलिंगाद्भवति यथोक्तमंत्रस्य निर्वापांगत्वं निर्वापस्य हि विनापि मंत्रमुपायांतरेण स्मृत्वा कर्तुं शक्यत्वान्न मंत्री निर्वापस्वरूपार्थः संभवति किंतु पूर्वसाधनीभूतनिर्वापप्रकाशनार्थ एव तादृशनिर्वापप्रकाशनार्थत्वं च न सामर्थ्यमात्राल्लभ्यते सामर्थ्यस्य निर्वापप्रकाशनमात्रे सत्त्वात् ततस्तस्यावश्यं प्रकरणादिसामान्यसंबंधबोधकप्रमाणस्वीकर्तव्यम् तथा च दर्शपूर्णमासप्रकरणे तस्य मंत्रस्य पाठादेवानेन मंत्रेण दर्शपूर्णमासापूर्वसंबंधिकिंचित्प्रकाश्यत इत्यवगम्यते अन्यथा दर्शादिप्रकरणपाठस्य वैयर्थ्यापत्तेः किं तद्दर्शपूर्णमासापूर्वसंबंधिप्रकाश्यमित्याकांक्षायां निर्वापे प्रकाशनसामर्थ्यात्पुरो

अत एव स्योनं ते सदनं कृणोमीति मंत्रस्य पुरोडाशसदनकरणांगत्वम् सदनं कृणोमीति लिंगात् न तु वाक्यात्। समभिव्याहारो वाक्यम्। समभिव्याहारश्च साध्यत्वादिवाचकद्वितीयाद्यभावेपि वस्तुतः शेषशेषिवाचकपदयोः सहोच्चारणम्। यथा यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीति अत्र पर्णताजुह्वोः समभिव्याहारादेव पर्णताया जुह्वंगत्वम्। न चानर्थकाम् अन्यथापि जुह्वाः सिद्धत्वादिति वाच्यम्। जुहूशब्देन तत्साध्यापूर्वलक्षणात्॥ ९ डाशनिर्वाप इत्यवगम्यते निर्वापश्च पुरोडाशसंस्कारद्वाराऽपूर्वसंबंधीति लिंगान्मंत्रस्य निर्वापार्थत्वे सति न तस्यानर्थक्यापत्तिः तस्मादग्नये जुष्टं निर्वपामीति मंत्रस्य प्रकरणाद्दर्शपूर्णमाससंबंधित्वावगतस्य निर्वापप्रकाशनसामर्थ्य रूपाल्लिंगान्निर्वापांगत्वमिति तदिदं निरुक्तं सामर्थ्यरूपं लिंगं वाक्यप्रकरणादिभ्यः प्रबलमित्याह तदिदमित्यादिना अत एवेति लिंगस्य वाक्यादिभ्यो बलवत्त्वादेवेत्यर्थः स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इति वाक्यशेषः भो पुरोडाश तेन त्वत् स्योनं समीचीनं सदनं स्थानं कृणोमि करोमि तच्च स्थानं घृतस्य धारया सुशेवं सुष्ठु सेवितुं योग्यं कल्पयामि भो व्रीहीणां मेध व्रीहिसारभूत त्वं सुमनस्यमानः समाहितमनस्कः सन् तस्मिन्नमृते समीचीने स्थाने सीद उपविश प्रतितिष्ठ तत्र स्थिरो भवेत्यर्थः तत्र च तस्मिन्नित्यनेन

प्रकृते वाच्यकेन पूर्वोत्तराहूयोरेकवाक्यत्वे सिद्धे मंत्रद्वयस्याभावात् सर्वोप्ययं मंत्रः स्यानकरणस्यांगं पुरोडाशस्थापनस्य चांगं भवति तत्र विनियोजिका श्रुति
श्चैवं कल्पनीया सर्वेणानेन मंत्रेण स्थानं कर्तव्यमिति तथा सर्वेणानेन मंत्रेण तत्र पुरोडाशः स्थापनीय इति च तथा च सदनकरणपुरोडाशस्थापनयोरस्य मंत्र
स्य विकल्पः समुच्चयो वा स्वेच्छया भविष्यतीति पूर्वपक्षः तत्र हि यदेतत्पूर्वोत्तराहूयोः परस्पराऽन्वयेनैकवाक्यं संपन्नं तदेतदुत्तरार्द्धस्य सदनकरणे शक्तिम
कल्पयित्वा सकलमंत्रस्य सदने विनियोक्तुं नार्हतीति स्यानदेव वाक्यं पूर्वार्द्धस्य पुरोडाशस्थापने शक्तिमकल्पयित्वा न पुरोडाशस्थापने कृत्स्नमंत्रं विनियोक्तुं प्रभवति
तत्र श्च लिंगकल्पनव्यवधानेन वाक्यं श्रुतिप्रतिविप्रकृष्यते प्रत्यक्षं तु लिंगं द्वयोः श्रुतिं प्रतिनविप्रकृष्यते तथा सति लिंगेन वाक्यस्य बाधान्मंत्रस्यार्द्धद्वयं सदन
करणस्थापनयोर्व्यवस्थितमिति सिद्धान्तः तमेतमभिप्रेत्याह मंत्रस्येत्यादिना लिंगादिति सदनकरणप्रकाशनसामर्थ्यरूपादित्यर्थः ननु वाक्यादिति मंत्र

तथा च वाक्यार्थः पर्णतयाऽऽवर्तन हविर्धारणद्वारा जुहू पूर्वं भावयेदिति। एवं च पर्णतया यदि जुहूः क्रियते तदेव तत्साध्यमपूर्वं भवति
नान्यथेति गम्यत इति न पर्णतायां वैयर्थ्यम्। अवर्तन हविर्धारणद्वारेति चावश्यं वक्तव्यम्॥

॥ स्य पुरोडाशसदनसादनरूपार्थकरणांगत्वं ननु
सदनसादनलक्षणशेषशेषिरूपार्थप्रतिपादकात्सदनं करोमि तस्मिन्सीदेत्येवं सहोच्चारणरूपात्तद्वाक्यादित्यर्थः वाक्यं लक्षयति समभिव्याहार इति।
वाक्यमिति लक्ष्यनिर्देशः समभिव्याहारशब्दं व्याचष्टे समभिव्याहारश्चेत्यादिना तत्रोदाहरणमाह यथेत्यादिना पर्णता जुह्वा इति शेषशेषिलक्षणयोरिति
शेषः ननु कार्यान्तरेणावर्जुह्वाः सिद्धत्वात्पर्णताया आनर्थक्यं स्यादित्याशंक्य परिहरति न चेत्यादिना न च वाच्यमित्यत्र हेतुमाह जुहूशब्देनेत्यादिना यदि जुहूः पर्ण
तयैव क्रियते तदेव जुह्वाः पूर्वजन्यतेनान्यथेति भावः फलितं वाक्यार्थमाह तथा चेत्यादिना क्वचित्पुस्तकेऽवर्तनेत्यतः प्रागितितः परत्रैवं च पर्णतया यदि जुहूः राम
क्रियते तदेव तत्साध्यमपूर्वं भवति नान्यथेति गम्यत इति न पर्णतायां वैयर्थ्यमिति पाठः अवद्यत इत्यवत्तं अवत्तं च तद्धविश्च तस्य धारणद्वारेत्यर्थः अवत्तेत्यादे २२

अन्यथेत्यादिना अन्यथाऽवनेत्यादेरनुपादानइत्यर्थः स्रुक्स्रुवादिभिराज्यहविर्धारणद्वारैवोपक्रियतइतिभावः ननु पर्णताया अनारभ्याधीनत्वादना
रभ्यविधेश्च सामान्यविधित्वात्पर्णता सर्वेषु प्रकृतिविकृतियागेषु समन्वेतीत्याशंक्याह सेयमित्यादिना एवकारव्यावर्त्यमाह नविकृतिष्विति तत्रेति विकृतिष्वि
त्यर्थः चोदकेनेति प्रकृतिवद्विकृतिः कर्तव्येति चोदकशब्दितातिदेशवाक्येनेत्यर्थः तत्प्राप्तिसंभवादिति पर्णताप्राप्तिसंभवादित्यर्थः पौनरुक्त्यापत्तेरिति प्रकृ
तौवाहिरुक्तत्वादितिन्यायविरोधेन पौनरुक्त्यरूपदोषापत्तेरित्यर्थः केयं प्रकृतिर्विकृतिश्चेत्याकांक्षायां तल्लक्षणमाह यत्रेत्यादिना अतिदेशेनेति उक्तचोदक
शब्दितातिदेशवाक्येनेत्यर्थः किंच यत्र चोदकेनांगप्राप्तिस्तत्रानारभ्याधीनानां सन्निवेशः दर्शपूर्णमासयोरपि चोदकप्रमाणेनांगानामप्राप्तेः प्रकरणप
ठितैरेवांगैर्नैराकांक्ष्यात्तत्र पर्णतायाः सन्निवेशो न्याय्य एव गृहमेधीययागाद्यपि कुत्रापि विकृतौ नांगानामतिदेशेन प्राप्तिस्तथापि तस्य क्लृप्तोपकारैरा

अन्यथा स्रुवादिष्वपि पर्णतापत्तेः। सेयं पर्णता अनारभ्याधीनापि सर्वप्रकृतिष्वेवान्वेति न विकृतिषु। तत्र चोदकेनापि तत्प्राप्तिसंभवात्पौनरुक्त्यापत्तेः। यत्र समग्रांगोपदेशः सा प्रकृतिः। यथा दर्शपूर्णमासादिः। तत्प्रकरणे सर्वांगपाठात्। यत्र न सर्वांगोपदेशः सा विकृतिः। यथा सौर्यादिः। तत्र कतिपयांगानामतिदेशेन प्राप्तत्वात्॥

ज्यभागादिभिरेव नैराकांक्ष्येण तत्रापि चोदकांगाप्राप्तेः सत्वात्तत्रापि
पर्णतासन्निवेशो भवत्येव किंच योऽनारभ्यविधिः स सामान्यविधिरित्युच्यते सामान्यविधेश्चास्पष्टत्वात्सविशेषेणोपसंहारो भवति तथा चोक्तं सामा
न्यविधिरस्पष्टः संह्रियेत विशेषतइति तथा च सामिधेन्यश्चासाप्तदश्यस्यानारभ्याधीनत्वेपि न प्रकृतिषु गमनं तस्य प्रकृतियागानां सामिधेन्यक्लृपांच
दश्यावरोधात् नापि विकृतिमात्रे तद्गमनं तत्र चोदकप्राप्तपांचदश्यबाधप्रसंगात् किंतु प्रत्यक्षश्रुतसाप्तदश्या सुमित्रविंदादिष्वेव विकृतिषु त
स्य साप्तदश्यस्य गमनं भवति तथा चोक्तं एवं च प्रकृतावेतत्पांचदश्यं प्रतिष्ठितं विकृतौ चैव यत्रास्ति साप्तदश्यं पुनःश्रुतिरिति न च वाक्यवैयर्थ्यमना
रभ्याधीनस्यैव कर्मसाप्तदश्यस्य मित्रविंदादिप्रकरणस्थवाक्येनोपसंहारात् उपसंहारश्च नाम सामान्यप्राप्तस्य विशेषे नियमनं ततश्च साप्तदश्यस्यानारभ्यवि

र्मित्रविंदादिप्रकरणस्यश्च विशेषविधिरिति सर्वमभिप्रेत्याह अनारभ्यविधिः सामान्यविधिरिति किं च तद्धि वाक्यं प्रकरणाद्बलीयो भवति स्थानादिनस्तु सुन
रांनस्य प्रकरणादपि दुर्बलत्वात् वाक्यस्य प्रकरणादिभ्यो बलवत्त्वादेवेंद्राग्नी इदं हविरित्यादिमंत्रस्य दर्शनाकान्त्वाद्दर्शांगत्वं न तु दर्शपूर्णमासप्रकरणाद्द क
र्शपूर्णमासोभयांगत्वमित्याह न त्विदमित्यादिना अत्र चेदं बोध्यम् अग्नीषोमाविदं हविरजुषेतामवीवृधेतां महो ज्यायोऽक्रातां इंद्राग्नी इदं हविरजुषेतामवी
वृधेतां महो ज्यायोऽक्रातामिति सूक्तवाके श्रूयते तत्र च देवतावाचकं पदमग्नीषोमादिरूपं पौर्णमास्यादिकाले यथादेवतं विभज्य प्रयोक्तव्यमिति नीतीयस्थि
तम् इदं हविरित्यादिपदमवशिष्टं तु यथोक्ताग्नीषोमेंद्राग्निमंत्रद्वयगतमपि यथाक्रममममावास्यायामग्नीषोमपदपरित्यागेन पौर्णमास्यामिंद्राग्निपदपरित्यागे

अनारभ्यविधिः सामान्यविधिः। तदिदं वाक्यं प्रकरणादिभ्यो बलवत्। अत एवेंद्राग्नी इदं हविरित्यादेरेकवाक्यत्वाद्दर्शांगत्वं न तु प्रकरणात् दर्शपूर्णमासांगत्वम्। उभया कांक्षा प्रकरणम्। यथा प्रयाजादिषु समिधो यजतीत्यादौ वाक्ये फलविशेषस्यानिर्देशात् समिद्यागेन भावयेदिति बोधानंतरं किमिति उपकार्याकांक्षा। दर्शपूर्णमासवाक्येपि दर्शपूर्णमासाभ्यां स्वर्गं भावयेदिति बोधानंतरं कथमित्युपकारकाकांक्षा। इत्थं चोभयथा प्रयाजादीनां दर्शपूर्णमासांगत्वम्॥

((न च पठनीयं तथा च सति तेषां मंत्रभागानां सर्वशेषत्व
बोधको दर्शपूर्णमासप्रकरणपाठोऽनुगृहीतो भवतीति प्राप्तेऽभिधीयते अग्नीषोममंत्रशेषस्येदं हविरित्यादिरूपस्येंद्राग्निपदान्वयाश्रवणात्प्रकरणेन प्र
थमं तदन्वयरूपं वाक्यं कल्पनीयं तेन च वाक्येनेंद्राग्निप्रकाशनसामर्थ्यरूपं लिंगं कल्पनीयं तच्च लिंगमनेन मंत्रभागेनेंद्राग्निविषया काचित्क्रियानुष्ठेये
ति विनियोजिकां तृतीयां श्रुतिं कल्पयति ततः प्रकरणाद्विनियोगपर्यंते त्रिभिर्व्यवधानं भवति अग्नीषोमपदान्वयरूपं वाक्यं तु श्रूयमाणत्वाल्लिंगश्रुतिभ्या
मेव व्यवधीयते एवमिंद्राग्नीमंत्रशेषस्याप्यग्नीषोमपदान्वयाश्रवणात्प्रकरणेन प्रथमं तदन्वयरूपं वाक्यं कल्पनीयमित्यादि स्वयमूह्यम् तस्माद्व्यवधानस्व २३
स्माद्दुर्बलस्य प्रकरणस्य बाधितत्वात् तत्तन्मंत्रशेषस्तत्तत्रैव व्यवतिष्ठत इति प्रकरणं लक्षयति उभयेत्यादिना आकांक्षात्वं चेल्लक्षणं शब्दबोधकारणीभूताकां

संगस्तद्वारणायोभयेति विशेषणम् उभयत्वंचेतद्दोभयत्वावच्छिन्नेघटपरादावतिव्याप्तिस्तद्वारणायोत्तरंदलम् परस्परमुभयाकांक्षेत्यर्थः प्रकरणमि
तिलक्ष्यनिर्देशः तत्रोदाहरणद्वारोभयाकांक्षांप्रदर्शयन्लक्षणसमन्वयंकरोतियथेत्यादिना इत्थंचेति अनेनप्रकारेणचेत्यर्थः तच्चप्रकरणंविभजतेत
च्चप्रकरणमित्यादिना तच्चेति उक्तलक्षणलक्षितंचेत्यर्थः तत्रेति महाप्रकरणावांतरप्रकरणयोर्मध्य इत्यर्थः मुख्यभावनेतिफलभावनेत्यर्थः तेनचेति
महाप्रकरणेनचेत्यर्थः अंगत्वंबोध्यत इति विशेषः तद्धिमहाप्रकरणंप्रयाजादीन्यंगानिदर्शपूर्णमासयोर्विनियुंक्तइत्यर्थः एतच्चेतिमहाप्रकरणंचेत्य
र्थः तत्र हेतुमाह उभयेति प्रकृतावेवेत्यनुषंगः एवकारव्यावर्त्यमाह नत्विति विकृतावुभयाकांक्षाया असंभवादितिभावः तत्रेति विकृतावित्यर्थः
अतिदेशेनेति अतिदेशवाक्यप्राप्तप्राकृतांगजातेनेत्यर्थः कथंभावाकांक्षायाइतिकर्तव्यताकांक्षायाइत्यर्थः तथाचयद्यप्युपहोमादीनामपूर्वा

तच्चप्रकरणंद्विविधम्। महाप्रकरणमवांतरप्रकरणंचेति। मुख्यभावनासंबंधिप्रकरणंमहाप्रकरणम्। तेनच प्रयाजादीनांदर्शपूर्ण
मासांगत्वम्। एतच्च प्रकृतावेव उभयाकांक्षायाः संभवान्नतु विकृतौ। तत्र प्रकृतिवद्विकृतिः कर्तव्येत्यतिदेशेन कथंभावाकां
क्षाया उपशमेनापूर्वांगानामप्युभयाकांक्षयाविनियोगासंभवात्। तस्मादपूर्वांगानांस्थानादेव विकृत्यर्थत्वमिति॥ गानामुपहोमा

दिभिर्भावयेत्किंभावयेदित्य स्त्याकांक्षा तथापि सोर्यादिविकृतियागस्यातिदेशवाक्यप्राप्तप्राकृतांगैरेवनैराकांक्ष्येणनापूर्वांगानामप्युपहोमादीनामुभ
याकांक्षयाविकृतौविनियोगः संभवतीतिभावः ननुप्राकृतांगानां विकृतावपठितत्वात्प्रत्यक्षाणांकथंविकृत्याकांक्षोपशमहेतुत्वंवैकृतांगानां तूप
होमादीनामत्रपठितत्वेनप्रत्यक्षाणांसंभवत्याकांक्षोपशांतिहेतुत्वमितिचेन्न तेषांविकृतौपठितत्वेनप्रत्यक्षत्वेप्यन्यत्राङ्कप्तोपकारकत्वाच्छीघ्रंविकृ
त्याकांक्षोपशांतावसामर्थ्यात् अतिदिष्टानांतुप्रकृतौक्लृप्तोपकारकत्वेनसंभवतितद्राकांक्षोपशमनसामर्थ्यम् नचतेषामेवप्राकृतांगानांविकृतौप्रकरण
ग्रहणंस्यादितिवाच्यम् तेषामपिप्रकृतावुपकारकत्वेनोपक्षीणाकांक्षत्वात् नचप्राकृतांगानामत्रोपस्थापकाभावेनानुपस्थितत्वमितिवाच्यम् उपमानप्रमाणसो

लौ॰ मी॰ २४ सत्वेन तेषामत्रोपस्थितत्वात् तथा हि सौर्यवाक्यीयमिन्यागे यवाकुमुपनीयते गवयदर्शनाद्नेन सदृशी मदीया गौरिति गोरूपमानवत् आग्नेयवाक्ये चोप
मितेते नन्तरश्रोत्तापन्ने सचत्र्यंशभावनारूपस्तस्मिंश्चत्तातेसौर्यवाक्ये भावनाया भाव्यस्य करणस्य च विद्यमानत्वेन तत्राकांक्षाभावे पीति कर्तव्यताकांक्षायां प्रा
कृतोपकारएव भावेनाग्नेयेति कर्तव्यतामतिदिश्य सौर्ययागेन ब्रह्मवर्चसं भावयेदाग्नेयवदिति सिद्ध्यतीति तस्मादाग्नेयेतिकर्तव्यतयैव विकृत्याकांक्षोपशमने सौ
र्यादौ विकृतावुभयाकांक्षारूपस्य प्रकरणस्याभावाद्न्यतराकांक्षारूपात्स्थानादेवोपहोमादीनामपूर्वांगानां विकृतिशेषत्वमित्युपसंहरतीति तस्मादिति अवांतर
प्रकरणं लक्षयति अंगभावेनेति तेन चेति अवांतरप्रकरणेन चेत्यर्थः अत्रापि बोध्यत इति शेषः तच्चेति तेन तेषां तदंगत्वं चेत्यर्थः संदंशेनेति संदंशो लोहकंटक

अंगभावनासंबंधिप्रकरणमवांतरप्रकरणम्। तेन चाभिक्रमणादीनां प्रयाजाद्यंगत्वम्। तच्च संदंशेनैव ज्ञायते। तदभावे चाविशेषात्स
र्वेषां फलभावना कथंभावेन ग्रहणप्रसंगेन प्रधानांगत्वापत्तेः। एकांगानुवादेन विधीयमानयोरप्यंगयोरंतराले विहितत्वं
संदंशः। यथाऽभिक्रमणे। तत्र हि समानयत उपभृतस्तेजो वाज्यमित्यादिना प्रयाजानुवादेन किंचिदंगं विधाय तदनंतरमपि प्रयाजानु
वादेन प्रयाजांगत्वस्यैव विदुषः प्रयाजा इज्यन्ते प्रेभ्यो लोकेभ्यो भ्रातृव्यान्नुदतेऽभिक्रामं जुहोत्यभिजित्यै इत्यनंतरं यो वै प्रयाजा
नां मिथुनं वेदेत्यादि किंचिदंगं विधीयते॥

॥ विद्धलोहशलाकाद्वयरूपस्तेनेत्यर्थः तन्न्यायेनेति यावत् तदनंगीकारे दोषमाह तदभावइ
ति संदंशाभाव इत्यर्थः अविशेषात् प्रकरणाविशेषात् सर्वेषां प्रयाजादीनामभिक्रमणादीनां च कथंभावेनेतिकर्तव्यतारूपेण प्रधानांगत्वापत्तेः दर्शा
दिप्रधानांगत्वापत्तेः तथा चाभिक्रमणादीनां प्रयाजाद्यंगत्वग्रहे संदंशस्याभावे सति दर्शादिप्रधानयागप्रकरणपाठाविशेषात् प्रयाजादिवदभिक्र
मणादीनामपि दर्शादिफलभावनाया इतिकर्तव्यताकांक्षया ग्रहणप्रसंगेन दर्शादिप्रधानयागांगत्वापत्तेस्तत्संदंशेनैव तत्तानुष्ठापन इति समुदायार्थः
संदंशं लक्षयति एकांगानुवादेनेति तत्रोदाहरणमाह यथाभिक्रमण इति अभिक्रमणे ह्येकस्य प्रयाजरूपस्यांगस्यानुवादेन विधीयमानयोः प्रयाजांगयोः।

विहितं भवत्येवं तदेवाह।

राम॰ २४

तद्धीत्यादिना नहि अभिक्रमणं हीत्यर्थः समानयते जुह्वामुपभृत इति उपभृतो घृतपात्रविशेषाज्जुह्वां जुह्वारूपपात्रविशेषे घृतं समानयत इति मंत्रार्थः किंचिदंगमिति उपभृतः पात्राज्जुह्वां प्रयाजार्थघृतानयनरूपमंगमित्यर्थः तदनंतरमपीति अभिक्रमणानंतरमपीत्यर्थः तदनंतरमपीत्यस्य किंचिदंग विधीयत इत्युत्तरेणान्वयः प्रयाजेन्वमिति पाठे तु नस्यापि किंचिदंगमित्यनेनोत्तरेणैवान्वयः भ्रातृव्यानिति शत्रूनित्यर्थः तुदत इति व्यथयति अपतुदतीतिवार्थः यजतीति यावत् अभिक्रमणं जुहोत्यभिजित्या इति विजयायाहवनीयसर्वतः संचरणं कृत्वा जुहुयादित्यर्थः मिथुनं वै देतीति युगलं जानातीत्यर्थः अत इति प्रयाजानुवादेन विहितत्तदंगमध्ये विहितत्वादित्यर्थः ननु प्रयाजानामितिकर्त्तव्यताकांक्षाभावान्न तत्र संदंशेनाप्यभिक्रमणस्यांगत्वेनान्वयः साकांक्षस्यैव गुणोन्वेषणेति न्यायादित्यत आह प्रयाजैरित्यादिना सा च प्रयाजानामितिकर्त्तव्यताकांक्षा संदंशलब्धैरेवाभिक्रमणादिभिः शाम्यतीत्याह

अतः प्रयाजांगमध्येऽभिहितमभिक्रमणं तदंगम्। प्रयाजैरपूर्वं कृत्वा यागोपकारं भावयेदिति ज्ञाने कथमेभिरपूर्वं कर्त्तव्यमिति कथंभावाकांक्षायाः सत्वात्। सा च संदंशपतितैरभिक्रमणादिभिः शाम्यति। न चांगभावनायाः कथंभावाकांक्षाऽभावः। भावनासामान्येन तत्रापि तत्संभवात्। तदिदं प्रकरणं क्रियाया एव साक्षाद्धि नियोजकं द्रव्यगुणयोस्तु तद्द्वारा॥

॥सा चेत्यादिना तथा चोक्तं परप्रकरणस्थानामंगेष्वित्यादिभिस्त्रिभिः ज्ञाने पुनश्चैतैरेव संदंशेन नदिष्यत इति ननु प्रयाजभावनाया अंगभावनात्वेन कथंभावाकांक्षाभावात्प्रयाजभावनाकथंभावेनाभिक्रमणं गृह्यत इत्याशंकापरिहरति न चेत्यादिना प्रयाजादिभावनाकथंभावाकांक्षाशून्या अंगभावनात्वादित्यत्र हेतोरसाधारणानैकांतिकत्वात्साकांक्षत्वसाधने हेतुसत्वाच्च न प्रयाजाद्यंगभावनायाः कथंभावाकांक्षाशून्यत्वमित्याह भावनासामान्येनेति प्रयाजाद्यंगभावनाकथंभावनासाकांक्षा भावनात्वाद्दर्शादिभावनावदिति प्रयोगोत्र बोध्यः न चावहननादिभावनायां व्यभिचारः तस्याः पक्षसमत्वात् तत्रापि तत्संभवादिति प्रयाजाद्यंगभावनायामपि कथंभावाकांक्षासंभवादित्यर्थः निरूपितप्रकरणस्य साक्षाद्धि नियोज्यविषयमुपन्यस्यति तदिदमित्यादिना तस्यैव व्यव

तितद्द्वारेतिक्रियाद्वारेत्यर्थः अत्र च द्रव्यस्य क्रियाद्वारैव प्रकरणं विनियोजकं गुणस्य तु द्रव्यक्रियोभयद्वारा विनियोजकमिति विभागः फलभावनाया मिति फलभावनायां क्रियाजातमिति कर्त्तव्यतात्वेनान्वेतीति संबंधः भिन्नप्रकरणस्थक्रियाया अन्यत्र क्रियायामन्वयापत्तिवारणाय सन्निधिपठित मित्युक्तम् अश्रूयमाणफलस्य क्रियाजातस्येतिकर्त्तव्यतात्ववारणायाश्रूयमाणफलकमित्युक्तम् प्रधानस्योपकाराकांक्षाऽभावेन तत्र तदन्वयादर्शनात्कथं भावाकांक्षायामित्युक्तम् गुणस्याप्युपकार्य्याकांक्षाऽभावे ह्युपकारकत्वेनान्वयादर्शनादुपकार्याकांक्षायेत्युक्तम् इति कर्त्तव्यताकांक्षायां क्रियाया एवसा सादन्वये लोकप्रसिद्धिहेतुत्वेन दर्शयति क्रियाया एवेत्यादिना क्रियाया एवान्वयदर्शनादित्यन्वयः कुठारेण छिंद्यादित्यत्र कथमिति कथंभावाकांक्षा

तथाहि। यजेत स्वर्गकाम इत्यत्र फलभावनायां कथंभावाकांक्षायां सन्निधिपठिताऽश्रूयमाणफलकं क्रियाजातमुपकार्याकांक्षायेतिकर्त्तव्यतात्वेनान्वेति। क्रियाया एव लोके कथंभावाकांक्षायामन्वयदर्शनात्। न हि हस्तकुठारेण छिंद्यादित्यत्र कथंभावाकांक्षायामुच्चार्यमाणोपि हस्तोऽन्वेति। किं तु हस्तेनोद्यम्य निपात्येति उद्यमननिपातने एव। हस्तस्तु तद्द्वारैवान्वेतीति सार्वजनीनमेतत्। इदं च स्थानादिभ्यो बलवत्। अत एवाक्षैर्दीव्यति राजन्यमिति देवनादयो धर्मा अभिषेचनीयसन्निधौ पठिता अपि स्थानान्न तदंग किंतु प्रकरणाद्राजसूयागमिति॥

॥ याहस्तेनेत्युच्चार्यमाणोपि हस्तो न हि छिद्भावनायां साकांक्षास्त्वन्वेतीत्यभिप्रेत्याह न हीत्यादिना उद्यमननिपातन एवान्वित इति शेषः उद्यमनं च निपातनं चोद्यमननिपातने इति द्विवचनं संधिस्तु लेखकप्रमादतः यद्वा उद्यमनेन निपातन उद्यमननिपातन इति व्याख्येयम् अत्र चान्वेतीत्यनुषंगः तद्द्वारैवेति उद्यमननिपातनद्वारैवेत्यर्थः सार्वजनीनमिति सर्वेषु जनेषु भवमित्यर्थः सर्वजनप्रसिद्धमिति यावत्। किंच कथंभावाकांक्षा नाम करणगतप्रकाराकांक्षा थभुजः प्रकारवाचित्वात् सामान्यस्य भेदको विशेषः प्रकारः सामान्यं च क्रियारूपमेवाख्यातेनोच्यते यजेत स्वर्गकाम इत्यस्यायमर्थः यागेन तथा कर्त्तव्यं यथा स्वर्गो भवतीति क्रियासामान्यस्य च विशेषः क्रियैव भवति न हि ब्राह्मणविशेषः परिव्राजका

दिरब्राह्मणोभवतिएवंचकरणगतक्रियाविशेषाकांक्षापरनामधेयंकथंभावाकांक्षायांक्रियैवान्वेतीतियुक्तंस्वचकरणगतःक्रियाविशेषोन्वाधा नादिब्राह्मणान्तर्पणान्तःक्रियारूपएवेतियुक्तंतस्यप्रकरणेनैवग्रहणंतस्यचकरणगतत्वंतदुपकारकत्वमेवतेनविनायागेनापूर्वाजननात्तद्धु द्यमननिपतनव्यतिरेकेणकुठारेणद्वैधीभावोजन्यतेतत्सिद्धंकथंभावाकांक्षायांक्रियैवान्वेतीतितदिदंप्रकरणंस्थानादितोबलीयोभवतितथाहिराज सूयप्रकरणेपश्विष्टिसोमयागाबहवःसमप्रधानभूताःपठ्यंतेतत्रचकश्चिदभिषेचनीयसंज्ञकःसोमयागःपठितःतस्यहिसन्निधौविदेवनादयोधर्माःअक्षैर्दी व्यतिराजन्यंजिनातिशौनःशेपमाख्यापयतीतिश्रूयन्तेजिनातिजयतीत्यर्थःबह्वृचब्राह्मणेसमाम्नातेशुनःशेपविषयमुपाख्यानंशौनःशेपंतदाख्यापयती त्यर्थःतत्रचविदेवनादीनांसन्निधिबलादभिषेचनीयांगत्वमितिप्राप्तेराद्धांतःराजसूयैरितिकर्तव्यताकांक्षायामनुष्ठातायाविहिताविदेवनादयःप्रकरणेनराजसू

देशसामान्यंस्थानं।तद्द्विविधम्।पाठसादेश्यमनुष्ठानसादेश्यंचेति।स्थानंक्रमश्चेत्यनर्थान्तरम्।पाठसादेश्यमपिद्विविधम्॥य थासंख्यपाठःसंनिधिपाठश्चेति॥

यशेषाएवभवंतिराजसूयश्चबहुयागात्मकोभवतितत्तश्चतत्रह्यसर्वयागशेषत्वंविदेवनादीनांसिद्ध्यतिकिंचाभिषेच नीयस्यकाचिदप्याकांक्षाविदेवनादिषुनास्त्येवतस्यज्योतिष्टोमविकृतित्वेनातिदिष्टैरेवप्राकृतांगैस्तदाकांक्षानिवृत्तेःननुसन्निहितविधिबलादाकांक्षा स्थाप्यतइतिचतर्ह्याकांक्षारूपमंतरालप्रकरणमादौपरिकल्प्यतद्द्वारावाक्यलिंगश्रुतिकल्पनयासन्निधिर्विप्रकृष्यतेराजसूयाकांक्षारूपंमहाप्र करणंतुक्लृप्तत्वादेकयाऽऽकांक्षयासंन्निकृष्यतेततश्चप्रकरणेनसन्निधेर्बाधात्सर्वयागशेषाविदेवनादयोधर्माइत्यभिप्रेत्यप्रकरणस्यस्थानादिभ्यो बलवत्त्वमाहइदंचेत्यादिनास्थानंलक्षयतिदेशसामान्यमितिसन्निधिविशेषत्वमितिलक्षणान्तरम् स्थानंक्रमश्चेतिलक्ष्यत्वेननिर्दिश्यतेपाठसमान देशत्वेनानुष्ठानसमानदेशत्वेनचस्थानंविभजतेतद्द्विविधमित्यादिनायथासंख्यपाठत्वेनसन्निधिपाठत्वेनचपाठसमानदेशत्वमपिविभजतेपा ठसादेश्यमित्यादिनातत्रयथासंख्यपाठत्वेनसमानदेशत्वंसमुदाहरति॥

SANS
181.42
BHA

IGNCA RAR
ACC. No. R-553

तत्रैन्द्राग्नमित्यादिना प्रथमस्य प्रथममिति प्रथमस्यैन्द्राग्नमित्यैन्द्राग्नेष्टियागस्येन्द्राग्नी रोचना दिव इति प्रथमं याज्यानुवाक्यायुगलमंगं द्वितीयस्य वैश्वानरमिति वैश्वानरेष्टियागस्य वैश्वानरो जीजनदित्यादि द्वितीयमंगमित्यर्थः एवंरूपे विनियोगे हेतुमाह प्रथमपठितमंत्रस्येत्यादिना कैमर्थ्याकांक्षायामिति किमर्थोयं मंत्र इति कैमर्थ्याकांक्षायामित्यर्थः एवं द्वितीयमंत्रस्यापीति किमर्थोयं मंत्र इति द्वितीयमंत्रस्यापि कैमर्थ्याकांक्षायां द्वितीयस्थाने विहितमेव कर्मोपतिष्ठते समानदेशत्वादित्यर्थः कोर्थो यस्य स किमर्थः तस्य भावः कैमर्थ्यं तस्याकांक्षायामिति निरुक्ता किमनेन मंत्रेण भाव्यमिति सिद्धांति अत्र च क्रमस्योदाहरणान्तरमपि वर्ण्यते तथाहि दर्शपूर्णमासयोराध्वर्यवे कांडे आग्नेयोपांशुयाजाग्नीषोमीययागाः क्रमेणाम्नाताः याजमाने च कांड आग्नेय्यादिविषयास्तेनैव क्रमेण मंत्रा आम्नाताः अ

तत्रैंद्राग्नमेकादशकपालं निर्वपेत् वैश्वानरं द्वादशकपालं निर्वपेदित्येवंक्रमविहितेषु इंद्राग्नी रोचना दिव इत्यादीनां याज्यानुवाक्यामंत्राणां यथासंख्यं प्रथमस्य प्रथमं द्वितीयस्य द्वितीयमित्येवंरूपो विनियोगो यथासंख्यपाठात् । प्रथमपठितमंत्रस्य हि कैमर्थ्याकांक्षायां प्रथमतो विहितं कर्मैव प्रथममुपतिष्ठते समानदेशत्वात् । एवं द्वितीयमंत्रस्यापि वैकृतांगानां प्राकृतांगानुवादेन विहितानां संदंशपतितानां विकृत्यर्थत्वं सन्निधिपाठात् ॥

॥अग्नेरहं देवयज्ययान्नादो भूयासं दब्धिरस्यदब्धो भूयासममुं दभेयमग्नीषोमयोरहं देवयज्यया वृत्रहा भूयासमिति तत्राद्यं तयोराग्नेयाग्नीषोमीययोः कर्मणोरेवतौ मंत्रौ मध्यमस्य चोपांशुयाजस्य कर्मणो मध्यमो दब्धिरस्यदब्धो भूयासममुं दभेयमिति मंत्रोंगं तस्य च मंत्रस्य च ब्राह्मणवाक्यमेवमाम्नायते एतया वै दब्ध्या देवा असुरानदभुवन् तयैव भ्रातृव्यं दभ्नोतीति दब्धिर्घातक आयुधमित्यर्थः न चाग्नेयाग्नीषोमीययोरप्यनिष्टनिवारकत्वेन साधारणालिंगेन दब्धिमंत्रस्यांगत्वं किं न स्यादिति वाच्यम् यथा वाक्यद्वयानुसंधानेन संपन्नं प्रकरणं पृथक् प्रमाणं तथा प्रकरणद्वयानुसंधानसंपन्नेन क्रमप्रमाणेनोपांशुयाजे तस्य मंत्रस्य विनियोगात् न च क्रमस्य प्रकरणांतर्भाव इति वाच्यम् द्वयोर्वाक्ययोरिव प्रकरणयोरेकवाक्यत्वाभावात् तस्मात् क्रमप्रमाणेन मध्यवर्तिन उपांशुयाजस्य मध्यवर्ती मंत्रोंगं समानदेश ॥ ६ ॥ ६ ॥

त्वादितिपथासंख्यपाठाद्धि नियोगउक्तः सन्निधिपाठात्तुयानि वैकृतान्यंगानि प्राकृतांगानुवादेन विहितानि संदंशपतितानि तेषां विकृतौ विनियोग इत्याह वै
कृतांगानामित्यादिना तत्रोदाहरणमाह यथाऽमनो होमानामिति अमनसे स्वाहा रेतस्विने स्वाहेत्याद्योमनोहोमाः यद्वा अमनोहोमानामितिपाठः प्रामादिक एव
किंत्वामनहोमानामिति सकार रहित आपूर्व एव पाठः साधुः तत्र च वैश्वदेवीं सांग्रहणीं निर्वपेत् ग्रामकाम इत्यस्य काम्येष्टियागस्य सन्निधौ श्रूयंत आमनहोमा
आमनदेवा इति तिस्र आहुतीर्जुहोतीति तेन त्वामनहोमानां फलाकांक्षायां फलवद्विकृत्यपूर्वमेव भाव्यत्वेन संबध्यत इत्यसत्तेषां मुख्ययागत्वे विरोधाभावात् तद्वा
ग्नेयादीनां षण्णामनुमित्यादीनां च बहूनां मुख्यविरुद्धमित्याशंक्य यथा दर्शपूर्णमासाभ्यां स्वर्गकाम इति वाक्येनाऽग्नेयादीनां फलसंबन्धावगमस्तथाऽमनहोमा
नां फलसंबन्धावगमाभावात्तत्प्राधान्यमुपपत्ते सांग्रहणीं निर्वपेद्ग्रामकाम इति वाक्यस्य तु सांग्रहण्या एव फलसंबंधबोधकत्वेनाऽमनहोमानां तत्संबन्धबोधक

यथा आमनहोमानां तेषां हि कैमर्थ्याकांक्षायां फलवद्विकृत्यपूर्वमेव भाव्यत्वेन संबध्यते उपस्थितत्वात् स्वतंत्रफलकत्वे विकृतिस
न्निधिपाठानर्थक्यापत्तेः पशुधर्माणामग्नीषोमीयार्थत्वमनुष्ठानसादेश्यात् औपवसथ्ये ह्यग्नीषोमीयः पशुरनुष्ठीयते तत्सं
न्निवदिनेते धर्माः पठ्यंते अतस्तेषां कैमर्थ्याकांक्षायामनुष्ठेयत्वेनोपस्थितं पशुपूर्वमेव भाव्यत्वेन संबध्यते तच्च स्थानं स
माख्यातः प्रबलम्॥

त्वाभावात् तस्मात्फलवत्सन्निधावफलं तदंगमिति न्यायात् फलवत्याः सांग्रहण्याः सन्निधावाम्नाताः अफला आमनहोमास्त
दंगमिति त्वभिप्रेत्य किमर्था इमे किलेति कैमर्थ्याकांक्षायां फलवतो विकृत्यपूर्वस्यैव भाव्यत्वेन संबन्धे हेतुमाह उपस्थितत्वादिति सन्निधिप्रमाणेनो
पस्थितत्वादित्यर्थः न त्वामनहोमानां सांग्रहणीसन्निधिपाठेपि विश्वजिन्न्याये न स्वतन्त्रफलकत्वमेव किन्न स्यादित्यत आह स्वतंत्रफलकत्व इ
त्यादिना फलवत्कर्मसन्निधौ पठितस्यैवाश्रूयमाण फलस्य विश्वजिन्न्याये न स्वतंत्रफलं कल्प्यते अन्यथा प्रयाजादीनामपि तन्न्यायेन स्वतन्त्रफलक
त्वापत्तिः स्यात् अफलस्य फलवत्सन्निधौ पाठस्तु तदंगत्वायैव तदभावेऽनर्थकत्वमेव तस्यापद्येतेति भावः॥ ६ ॥ ६॥ ६॥ ॥

सन्निधिपाठसादेश्येन विनियोगं निरूप्यानुष्ठानसादेश्येन विनियोगं निरूपयति पशुधर्माणामित्यादिना पशुधर्मा ह्युपाकरणपर्य्यग्निकरणादयस्तत्र प्र
जाप्यनेर्जायमानाः इदं पशुमित्याभ्यां मृगाभ्यां पशोरूपस्पर्शनमुपाकरणं दर्भज्वालयाऽर्चिः प्रदक्षिणीकरणमूपर्य्यग्निकरणम् यूपेरज्ज्वा बंधनं यूपनि
योजनमित्यादयो बोध्यास्तेषामनुष्ठानसमानदेशत्वादग्नीषोमीयपशुशेषत्वमेव न तु सवनीयादिशेषत्वमित्यर्थः किंच ज्योतिष्टोमप्रकरणे त्रयः पशवः
समाम्नाता अग्नीषोमीयः सवनीयोनुबंध्यश्चेति तत्राग्नीषोमीयः पशुः सोत्यनामकादन्हः प्राचीने औपवसथ्यनामके न्हि विधेयनिर्माणाद्दूर्ध्वं समनु
ष्ठीयते तत्रैव चाह्नि तद्धर्माः समाम्नाताः ततश्च तेषां शेषाकांक्षायां मनुष्ठेयतयोपस्थितमग्नीषोमीयपश्वपूर्वमेव सन्निधितो भाव्यत्वेन संबध्य
ते न तु सवनीयानुबंध्यापूर्वं तत्सन्निधिविरहात् अथ कथमिति चेत् सवनीयपशोः सोत्यनामके न्हि समाम्नानात्तदाश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं प
रिवीयाग्नेयं पशुमुपाकरोतीति अनुबंध्यस्य त्ववभृथांते श्रूयमाणत्वात्तस्माद् उपपद्यते ह्येतेषां धर्माणां सन्निधिनाऽग्नीषोमीयार्थत्वं सवनीयानुबन्ध्ययो
स्तु चोदकान्तेऽतिदिश्यंते न च पाठसादेश्यादेव तेषां तदर्थत्वं किं न स्यादिति वाच्यम् अग्नीषोमीयपशोः सोमक्रयसमीपे पाठात्तेन तत्त्वासंभवात् न च क्रयस
न्निधावेव तस्यानुष्ठानमपि किं न स्यादिति वाच्यम् स एष द्विदेवत्यः पशुरौपवसथ्येहनि आलब्धव्य इति वाक्यात्तस्य तत्रानुष्ठानानुपपत्तेः न च स्थाना
त्प्रकरणस्य बलीयस्त्वात्तेन तद्धर्माणां ज्योतिष्टोमार्थत्वमेव किं न स्यादिति वाच्यम् तस्य सोमयागत्वात् तद्धर्मग्रहणायोगात् सोमो ह्यभिषवादीन् धर्मानाकां
क्षति न तु यूपनियोजनविशसनादीन् तस्मादानर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायेन प्रकरणं प्रधानात्प्रच्याव्य स्थानात् पशुयागार्थत्वमेव प
शुधर्माणां युक्तं भवति न चांगिन्यनर्थकाः संतस्ते धर्मा अंगेषु त्रिष्वपि पशुयागेष्वविशेषेणावतिष्ठंत्विति वाच्यम् सन्निधिरूपस्य विशेषस्य दर्शितत्वात् न चा
ग्नीषोमीयस्यापि तद्धर्माणां प्रकरणादेव विनियोगः किं न स्यादिति वाच्यम् क्लृप्तोपकारैरेव प्राकृतधर्मैरग्नीषोमीयस्येतिकर्तव्यताकांक्षायाः उपशांतत्वा
त् अग्नीषोमीयो हि सान्नाय्ययागप्रकृतिको भवति तयोरुभयोरपि पशुप्र भवद्रव्यकत्वाविशेषात् सान्नाय्यं दधिपयसी तत्र पशुयागः पयोयागप्र
कृतिकः सा साम्यपशुप्रभवद्रव्यकत्वात् तच्चोक्तं सान्नाय्यं वा तत्प्रभवत्वादिति तस्माच्चोदकप्राप्तैस्तद्धर्मैर्निराकांक्षत्वान्न पशुयागे तद्ध ॥ ६ ॥

र्माणां प्रकरणं विनियोजकं किंतु स्थानमेवेत्यभिप्रेत्याह औपवसथ्ये ह्नीत्यादिना एवं स्थानेन निरूप्यतस्य समाख्यातः प्राबल्यमाह तच्च स्थानमित्यादिना तच्चेति उ
त्कलक्षणलक्षितं चेत्यर्थः तत्र तृतीये चेदं स्थितम् शुंधध्वं दैव्याय कर्मण इत्ययं मंत्रः पौरोडाशिकमिति याज्ञिकैः समाख्याते काण्डे पठितस्तस्य च समाख्य
या पुरोडाशकपालोलूखलमुसलजुह्वादीनामपि शोधनेंगत्वमिति प्राप्ते राद्धांतः न समाख्यया मंत्रस्य पुरोडाशपात्रांगत्वं पदार्थयोर्भिन्नदेशस्थत्वेन सम्ब
न्धस्याप्रत्यक्षत्वात् स्थानं विनियोगे तु पदार्थयोरेकदेशसामान्यलक्षणः सम्बन्धः प्रत्यक्ष एव न च सा पदार्थयोः सम्बन्धवाचिका भवति यौगिकशब्दानां द्रव्यवा
चकत्वेन पदार्थसम्बन्धावाचकत्वात्तथात्वे वा तस्याः सा सम्बन्धमात्रवाचिका न हि विशेषवाचिका वा स्यात् नाद्यः तन्मात्रोक्तौ प्रयोजनाभावात् सर्वेषां यौगिक
वचसां पर्यायतापत्तेश्च द्वितीये तु सम्बन्धि विशेषत्वस्य संबंधिविशेषनिरूप्यत्वादवश्यं संबन्धिनोर्वक्तव्यौ न थाचससंबंधिप्रतिपत्त्यैव वाक्यार्थप्रतिपत्तिन्यायेन

अत एव शुंधन मंत्रः सान्नाय्यपात्रांगं पाठसादेश्यात् । न तु पौरोडाशिकमिति समाख्यया पुरोडाशमात्रांगम् । समाख्या यौगिकः शब्दः सा
च द्विविधा वैदिकी लौकिकी च । तत्र होतुश्चमसभक्षणांगत्वम् होतृचमस इति वैदिकसमाख्यया । अध्वर्योस्तत्तत्पदार्थांगत्व
म् लौकिक्या आध्वर्यवमिति समाख्ययेति संक्षेपः ॥ ७ ॥ संबन्धप्रतिपत्तिसंभवे तत्रापि शक्तिकल्पने गौरवान्न समाख्यायाः सम्बन्धवाचित्वं त
थाचोक्तं सर्वत्र यौगिकैः शब्दैर्द्रव्यमेवाभिधीयते न हि सम्बन्धवाचित्वं संभवत्यतिगौरवात् तथान्यच्च पाकं तु पचिरेवाह कर्तारं प्रत्ययोऽथ कः पाकयुक्तः पु
नः कर्ता वाच्यो नैकस्य कस्य चिदिति किंच पौरोडाशिकमिति समाख्यायां प्रकृतिः पुरोडाशमात्रमभिधत्ते तद्धितप्रत्ययस्तु पुरोडाशस्येदमिति व्युत्प
त्त्या कांडं न वैतावता कृत्स्नापुरोडाशपात्राणां मंत्रसन्निधिः प्रत्यक्षो भवति किंत्वर्थापत्त्या स कल्प्यते कथं शृणु यद्युक्तः सन्निधिर्नस्यात्तदा मंत्रप्रतिपाद
कथस्य पौरोडाशिकसमाख्या न स्यात् न ह्यन्यसन्निहितानामिषे त्वेत्यादिमंत्राणामाग्नेयकांडसमाख्या भवति भवति च सा सन्निहितानामुज्जा
नः प्रथमं मन इत्यादिमंत्राणां ततश्च कांडसमाख्यया सान्निधिं परिकल्प्य कल्पितकाण्डसन्निध्यन्यथा ॥ ६ ॥ ८ ॥ . ॥

मी॰ मी॰ २८

नुपपत्त्या परस्पराकांक्षारूपं हेत्वन्तरं पात्रप्रकरणं कल्पयित्वा ततद्द्वारा वाक्यलिंगश्रुतीश्च कल्पयित्वा तया श्रुत्या विनियोग इति स्थानापेक्षया विनियोगे समा
ख्यायाविप्रकर्षः सान्नाय्यपात्राणां तु कुंभीशाखापवित्रादीनां शोधनमंत्रसन्निधिः प्रत्यक्षो भवति कथं शृणु इध्माबर्हिः संपादनस्य मुष्टिनिर्वापस्य चं
तेपलं सान्नाय्यपात्राणां देश उक्तः शोधनमंत्रश्चायमिध्माबर्हिर्निर्वापविषययोर्मंत्रानुवाकयोर्मध्यमेनुवाके पठितस्तेन च प्रत्यक्षसन्निधिना प्रकरणा
दीनां चतुर्णामेव कल्पना सन्निधिः समाख्यापेक्षया सन्निकृष्यते तस्मात्क्रमेण समाख्यां बाधित्वा सान्नाय्यपात्राणां शोधने शेषोयं मंत्रो भवतीत्यभिप्रेत्या
ह अत एवेत्यादिना अत एव स्थानस्य समाख्यातः प्रबलत्वादेव शुंधध्वं दैव्याय कर्मण इति मंत्रः सान्नाय्यपात्रांगमिति सान्नाय्ययागयोरै
न्द्रदध्यैन्द्रपयसोः पात्राणां कुंभीशाखापवित्रादीनामंगमित्यर्थः पाठसादेश्यादिति सन्निधिपाठादित्यर्थः पुरोडाशपात्रांगमिति पुरोडाशपात्राणा
मुलूखलादीनामंगमित्यर्थः एवं स्थानं निरूप्य समाख्यां लक्षयति समाख्या यौगिकः शब्द इति अत्र यौगिकशब्दत्वं लक्षणं समाख्येति लक्ष्यम् शब्द
श्चतुर्धा यौगिको रूढो योगरूढो यौगिकरूढश्चेति तत्राध्वर्यवं पाचक इत्यादिर्यौगिकः स एव समाख्येति चोच्यते यत्रावयवार्थ एव ज्ञायते स यौगि
क इति तन्निर्वचनम् योवयवशक्तिनिरपेक्षया समुदायशक्त्यैवार्थं बोधयति स रूढो यथा गवादिशब्दः यस्त्ववयवशक्तिविषये समुदायशक्त्यापि प्रवर्त्त
ते स योगरूढः यथा पंकजादिशब्दः पंकजादिशब्दस्यैवावयवशक्त्या पंकजनिकर्तृत्वेन समुदायशक्त्या च पद्मत्वेन रूपेण पद्मबोधकत्वात् यस्त्ववयव
शक्तिसमुदायशक्तिभ्यां रूढार्थं यौगिकार्थं च स्वातंत्र्येण बोधयति स यौगिकरूढः यथोद्भिदादिशब्दः स चोर्ध्वभेदनकर्तृतरुगुल्मादिकं बोधयति या
गविशेषमपि चेति सा यौगिकशब्दात्मिका समाख्या तत्र तयोः समाख्ययोर्मध्य इत्यर्थः होतुरिति भक्षणस्य क्रियात्मकत्वेन प्राधान्यात्तत्कर्तुर्होतुर्भ
वतीति तदंगत्वमित्यर्थः तत्तत्पदार्थांगत्वमिति पुरोध्वर्युर्विदाजनीत्यादिना यजुर्वेदेन च विहितानां पदार्थानामंगत्वमित्यर्थः लौकिकेति याज्ञिकैः प
रिकल्पितयेत्यर्थः तृतीये स्थिते प्रैतु होतुश्चमस इत्यत्र समाख्या भक्षहेतुः हरिरसि हारियोजन इत्यनेन मंत्रेण गृह्यमाणो ग्रहो हारियोजनः त राम॰
त्र वाक्यवषट्कर्तुः प्रथमभक्ष इत्यत्र वषट्कार इत्येवमुक्तत्वात्तत्र य एव भक्षहेतुत्वमिति प्राप्ते राद्धान्तः हविर्धा ॥ छ ॥ छ ॥ २८

नेष्ट्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यंचः परेत्य सदसि भक्षान् भक्षयन्तीति श्रूयते उत्तरवेद्याः प्रतीचीनेन सदसः प्राचीनेन महद्रूपे अभिषवः उत्तरवेद्यां हो
मः सदसि भक्षणं तत्राभिषवहोमयोर्वचनांतरप्राप्तयोरविधेयतयानो निमित्तत्वेनानूपभक्षणविधीयते तस्मात्समाख्यादिवदेवतयोरपि हेतुत्वम
स्तीत्यभिप्रेत्याह संक्षेपइति श्रुत्यादिप्रमाणस्य विनियोगविधिसहकारिणो निरूपणमुपसंहरति तदेवमिति एतैः षड्भिः प्रमाणैः सहकृतेन विनियोग
विधिना यान्यंगानि विनियोज्यन्ते ऽनो निविनियोगविधेः स्वरूपमनुवदन्नं विभजते एतदित्यादिना तत्र सिद्धरूपाणि निर्दिशति तत्रेति सिद्धरूपक्रिया
रूपाणामध्ये इत्यर्थः जातिः पशुत्वादिद्रव्यं व्रीह्यादि संख्या एकत्वादि तेषां यागस्वरूपोपकारत्वेन दृष्टार्थत्वमेवेत्याह तानि चेति क्रियारूपाणि वि

तदेवं निरूपितानि संक्षेपतः श्रुत्यादीनि षट् प्रमाणानि एतत्सहकृतेन विनियोगविधिना समिदादिभिरुपकृत्य दर्शपूर्णमासाभ्यां य
जेतेत्येवंरूपेण यानि नियोज्यन्ते तान्यंगानि द्विविधानि सिद्धरूपाणि क्रियारूपाणि चेति। तत्र सिद्धानि जातिद्रव्यसंख्यादीनि तानि
च दृष्टार्थान्येव। क्रियारूपाणि च द्विविधानि गुणकर्माणि प्रधानकर्माणि च एतान्येव सन्निपत्योपकारकाणि आरादुपकारकाणि
चोच्यन्ते। कर्मांगद्रव्याद्युद्देशेन विधीयमानं कर्म सन्निपत्योपकारकम्॥

भागद्वारा लक्षणमाह क्रियारूपाणीत्यादिना गुणस्य कर्मांगस्य द्रव्यादेः संस्कारकराणि क्रियाविशेषरूपाणि गुणकर्माणि यथावघातादीनि प्रधानस्य फ
लापूर्वस्योपकारकाणि तानि प्रधानकर्माणि यथा प्रयाजादीनि तेषामेव लक्षणांतरमाह एतान्येवेत्यादिना सन्निपत्योपकारकाणां लक्षणमाह कर्मां
गेत्यादिना यानि चांगानि साक्षात्परंपरया वा विहितफलसाधनयागशरीरं निष्पादयन्ति द्वारानुत्पन्नापूर्वोपयोगीनि तानि सन्निपत्योपकारकाणीति फलि
तम् द्रव्यादीत्यादिना देवतादिपरिग्रहः क्रियारूपत्वं सर्वेषां कर्मणां गुणकर्मत्वमवघातादीनां प्रधानकर्मत्वं प्रयाजादीनां सन्निपत्योपकारकत्वम
वघातादीनामारादुपकारकत्वं प्रयाजादीनां च लक्षणमिति समुदायतात्पर्यं मूलन्त्रोदाहरणमाह॥ श्री ॥६॥ श्रीग ॥१॥ ॥

लौ॰ यथावघातेतिसन्निपत्योपकारकाणांपुनरपित्रिविधंविभंगंकरोतिनचेत्यादिनातच्चसन्निपत्योपकारकंचेत्यर्थः दृष्टार्थमुदाहरतिदृष्टार्थमवघाता
मी॰ दीतिअवघातादेस्तुषविमोकादिरूपदृष्टद्वारायागस्वरूपनिष्पत्त्यपूर्वहेतुत्वात्संभवतितस्यदृष्टार्थत्वमित्यर्थः अदृष्टार्थमुदाहरति अदृष्टार्थमितिप्रोक्ष
२९ णादेर्व्रीहिगतसंस्काररूपातिशयदृष्टद्वाराप्रधानयागोत्पत्त्यपूर्वहेतुत्वात्संभवतिकेवलादृष्टार्थत्वंप्रोक्षणमंतरेणापियागस्वरूपानुपपत्त्यभावात्दृष्टोप
कारासंभवात् दृष्टादृष्टोभयार्थमुदाहरतिदृष्टादृष्टार्थमिति पशुपुरोडाशादीत्यादिनायागादिसंग्रहः तद्धि पशुपुरोडाशादिहीत्यर्थः अदृष्टमितियागो
त्पत्त्यपूर्वद्वाराफलापूर्वमित्यर्थः आराडुपकारकाणांलक्षणमाह द्रव्याद्यनुद्दिश्येतिआत्मसमवेतापूर्वजनकान्याराडुपकारकाणीत्यपिवदंतितत्रोदा

यथाऽवघातप्रोक्षणादिनत्वदृष्टार्थमदृष्टार्थंदृष्टादृष्टार्थंचेति। तत्रदृष्टार्थमवघातादि। अदृष्टार्थंप्रोक्षणादि। दृष्टादृष्टार्थंपशुपुरोडा
शादि। तद्धिद्रव्यत्यागांशेनैवअदृष्टंदेवतोद्देशेनचदेवतास्मरणंदृष्टंकरोति। द्रव्याद्यनुद्दिश्यकेवलंविधीयमानंकर्म आराडुपकारकम्
। यथाप्रयाजादि। आराडुपकारकंच परमापूर्वोत्पत्तावेवोपयुज्यते। सन्निपत्योपकारकंतु द्रव्यदेवतासंस्कारद्वारायागस्वरूपेप्यु
पयुज्यते। इदमेवचाश्रयिकर्मेत्युच्यते। तदेवंनिरूपितः संक्षेपतोविनियोगविधिः॥ हरणमाहयथेतिप्रयाजादीत्यादिनाज्यभा

गानुयाजादिपरिग्रहः अत्रपरमापूर्वोत्पत्तावेवेत्येवकारेण. द्रव्यदेवतागतसंस्कारजननद्वारायागस्वरूपोपयोगित्वमाराडुपकारका
णांनिरस्यतेयागस्वरूपेपीत्यपिनासन्निपत्योपकारकाणांद्रव्यदेवतासंस्कारद्वारायागोत्पत्त्यपूर्वेप्युपकारकत्वंसमुच्चीयतेअत्रचव्रीह्यादीनामपि
सद्द्वारापुरोडाशनिर्वर्तकत्वंतद्द्वारायागशरीरतदुत्पत्त्यपूर्वजनकत्वंचभवतियाज्यानुवाक्यादेर्देवतासंस्कारद्वारायागोत्पत्त्यपूर्वादावुपयोगित्वंदेवता
याश्चसाक्षाद्यागशरीरनिर्वर्तकत्वंतद्द्वारातदुत्पत्त्यपूर्वनिष्पादकत्वंचभवतियागस्यदेवतोद्देशेनद्रव्यत्यागस्वरूपत्वात्द्रव्यदेवतेखलुयागस्वरूप राम
मित्यभ्युपगमाच्चेतिध्येयम् इदमेवचेतिसन्निपत्योपकारकमेवचेत्ताराडुपकारकमित्यर्थः आश्रयिद्रव्यदेवतादिरूपआश्रयोऽस्यास्तीत्याश्र २९

यिपारिभाषिकी वाश्रयिकर्मेति संज्ञा इदमेव सामवायिकर्मेत्यपि वदन्ति किंच सामान्यतः कर्म द्विविधमर्थकर्म गुणकर्म चेति तत्रात्मसमवेतापूर्व जनकं कर्मार्थकर्म यथाऽग्निहोत्रदर्शपूर्णमासप्रयाजानुयाजादिकं तस्यात्मगतफलापूर्वजनकत्वात् द्रव्यादिसंस्कारजनकं द्वितीयमुक्तदेव सन्निपत्योपकारकमित्युक्तम् तदपि द्विविधम् उपयोक्ष्यमाणसंस्कारकमुपयुक्तसंस्कारकं चेति तत्रावघातप्रोक्षणादिकमुपयोक्ष्यमाणसंस्कारकं यागे व्रीहीणामुपयोक्ष्यमाणत्वात् प्रतिपत्तिकर्म चात्वाले कृष्णविषाणप्रासनेडाभक्षणादिकमुपयुक्तकृष्णविषाणपुरोडाशादिसंस्कारकं द्वितीयम् उपयुक्तस्याऽऽकीर्णकरस्यावशिष्यमाणद्रव्यादेर्विहितदेशे संस्कारविशेषहेतुः प्रक्षेपः प्रतिपत्तिकर्म उपयोक्ष्यमाणसंस्कारभिन्नसंस्कारकर्मत्वं प्रतिपत्तिकर्मत्वमित्यपि वदन्ति ननु भवतु कथं विदिडाभक्षणस्य प्रधानयागोपयुक्ताकीर्णकरपुरोडाशद्रव्यप्रक्षेपात्मकत्वात्प्रतिपत्तिकर्मत्वं चात्वाले कृष्णविषाणप्रासनस्याग्निहोत्रादिकर्मवद्विहितबहिर्देशविशेषप्रक्षेपक्रियात्मकत्वात्कथं प्रतिपत्तिकर्मत्वं तथा च तद्वदर्थकर्मत्वमेव तस्य तदित्थं श्रूयते ज्योतिष्टोमे नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यतीति यजमानेन दक्षिणा स्नात्वा ऋत्विग्भ्यो यदा नीतास्तदा यजमानः स्वहस्तेधृतं कृष्णमृगस्य शृङ्गं चात्वालनामकगर्ते परित्यजेत् सोयं परित्यागोऽर्थकर्म कुतः सप्रयोजनत्वलाभात् प्रतिपत्तिकर्मत्वेऽपूर्वाभावे निरर्थकः स्यात् तस्मादपूर्वलाभायार्थकर्मत्वमेव न तु प्रतिपत्तिकर्मत्वमिति चेन्न कृष्णविषाणया कण्डूयतीति तृतीयाश्रुत्या यजमानशिरःकण्डूयनादावुपयुक्तस्य कृष्णविषाणस्य प्रतिपत्त्यपेक्षत्वात् न च प्रतिपत्तिकर्मत्वेऽत्यन्तमपूर्वाभावः चात्वाल एव प्रासनमित्येवंविधस्य नियमस्यावैधत्वेन प्रासनाख्यक्रियाप्रयुक्तापूर्वाभावेऽपि नियमापूर्वसद्भावात् तस्मात्प्रासनं प्रतिपत्तिकर्मेति तमेतं सर्वमभिप्रेत्य विनियोगविधिनिरूपणमुपसंहरन्निति देवमिति इदानीं प्रयोगविधिं निरूपयति॥

लौ॰भी ३० प्रयोगे इत्यादि ना सांगप्रधान कर्म प्रयोग प्राशुभाव बोधक इत्यर्थः स च प्रयोगविधि· प्रयाजाद्यंगजातवाक्यैकवाक्यतामापन्नो दर्शपूर्णमासाभ्यां स्वर्गकामो
यजेतेत्यादि प्रधानविधिरेवोक्तवक्ष्यमाण विधित्रयमेलनरूपश्चतुर्थोयं विधिर्नतु विध्यंतरमित्याह स चेति तत्र हेतु प्रदर्शयन प्रयोगप्राशुभावशब्द व्या
चष्टे सहीत्यादिना प्रयोगविधिः सांगप्रधानकर्म प्रयोगाविलंबं विधत्तेन हि लंबे प्रमाणाभावात् संप्रतिपन्नवत् तत्र प्रयोगविधिः तत्र प्रयोगाविलंबं विधत्ते
तद्विलंबे प्रमाणाभावादिति सं प्रति साधनतामाशंक्य समाधत्ते न चेत्यादिना अंग प्रधान विध्योरेकवाक्यतयावगतस्सांगप्रधानयोः साहित्यस्यानुपपत्तेरे
वतद्विलंबे प्रमाणत्वात्तत्र प्रमाणाभाववचनं शोभतेतरामिति तत्रार्थापत्तिं प्रमाणं दर्शयति विलम्ब इत्यादिना हि शब्देन तत्साहित्यनिश्चयं द्योतयति प्र

प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः। स चांगवाक्यैकवाक्यतापन्नः प्रधानविधिरेव। स हि सांगं प्रधानमनुष्ठापयन्नविलंबेन प्रमा
णाभावाद्विलंबापरपर्यायं प्रयोगप्राशुभावं विधत्ते। न च तद्विलंबेपि प्रमाणाभाव इति वाच्यम्। विलंबेन्वंगप्रधानविध्येकवाक्य
तावगतत्साहित्यानुपपत्तिः। विलंबेन क्रियमाणयोः पदार्थयोरिदमनेन सह कृतमिति साहित्यव्यवहाराभावात्। स चाविलंबो
॥ नियतेक्रमे आश्रीयमाणे भवति ॥

याजाद्यंगजातमंगशब्दार्थः प्रधानशब्देन च दर्शादिः प्रधानयागो ह्युच्यते ताविव तच्छब्दार्थः न च तत्सा
हित्यमेव नास्तीति वाच्यम् अंगप्रधानविध्येकवाक्यत्वानुपपत्तेः तस्य प्रयोजनांतरानुपलब्धेश्च न न्वविलंबमंतरेणनांगप्रधानयोः साहित्यानुपपत्तिः
तेन विनापि तथाव्यवहारादित्याशंक्यमेवमित्याह विलंबेनेत्यादिना पूर्वेद्यु परेद्यु च क्रियमाणयोर्भोजनयोरिदमनेन भोजनेन सह कृतमिति व्यवहारादर्शनान्नवि
लम्बेन क्रियमाणयोरंगप्रधानयोः साहित्यव्यवहारो ऽभ्रांतस्योपपद्यते नेतनश्च सा तद्वस्थेत्यर्थः सोप्यंगप्रधानयोरविलंबस्तु नियतेक्रमे समाश्रयणे संभवति एम
यथाऽग्नेयहविरभिचारणं तत ऐन्द्राग्नदधिहविरभिघारणं तत आग्नेययागानुष्ठानं तदनंतरमैन्द्रदधियागानुष्ठानमिति नियतः क्रमः तत्रैकांत॥ ६ ॥ ३०

व्यवधानेनाविलम्बइति सर्वमुपरिष्टात्स्पष्टीभविष्यतीत्यभिप्रेत्याह स चेत्यादिना नियतेक्रमे नंगीकारे दोषमाह अन्यथेत्यादिना प्रयोगविक्षेपापत्तेरिति कि
माग्नेयहविषोधारणमैन्द्रदधिहविरभिधारणानन्तरं कर्तव्यं किं चेन्द्रदधिहविषोभिधारणमाग्नेयहविरभिधारणानन्तरमित्येवं सर्वत्र संदेहे न सर्वानुष्ठाने
च्छेदापत्तेरित्यर्थः संशयात्मा विनश्यतीत्यादिना भगवद्वचनेन संशयात्मनो हि कभोगसाधनेपि प्रवृत्त्यभावोपलम्भात्तसंदिहानस्यामुत्रभोगसाधने प्रवृत्ति
रुपपद्यत इति भावः ननु गाङ्गप्रधानयोर्नियमेऽक्रमउपपद्यते न तद्विधायकाभावात् न च प्रयोगविधिरेव तद्विधायको वाक्यभेदापात्तो न कथं न प्रयोगविधे
रेव प्रयोगप्राशुभावविधायकत्वे गुणप्रधानयोर्नियतक्रमविधायकत्वे च वाक्यभेदापात्त इति चेन्मैवमित्याह अतइत्यादिना यतोंगप्रधानयोर्नियत

अन्यथा हि किमेतदनन्तरमेतत्कर्तव्यमेतदनन्तरं वेति प्रयोगविक्षेपापत्तेः। अतः प्रयोगविधिरेव स्वविधेयप्रयोगप्राशुभावसिद्ध्यर्थं निय
तं क्रममपि पदार्थविशेषणतया विधत्ते अत एवाङ्गानां क्रमबोधको विधिः प्रयोगविधिरित्यपि लक्षणम्। तत्र क्रमो नाम वि(द्ध)
ततिविशेषः। पौर्वापर्यरूपो वा। तत्र षट्प्रमाणानि श्रुत्यर्थपाठस्थानमुख्यप्रवृत्त्याख्यानि॥

१ क्रममन्तरेणाविलम्बापरनामधेयप्र
योगप्राशुभावो नोपपद्यतेऽतः स्वविधेयप्रयोगप्राशुभावसिद्ध्यर्थं नियतं क्रममपि प्रयोगविधिरेव विधत्त इत्यर्थः वाक्यभेदनिरासाय पदार्थविशे
षणतयेत्युक्तं व्यापारभेदे न हि विधाने वाक्यभेदो भवति न तु विशिष्टविधान इत्यवोचामेति भावः पदार्थश्चात्र क्रियारूपो ग्राह्यः अन्यथा क्रमविधानानु
पपत्तेः तदुक्तं माधवेन यद्यपि क्रमस्य क्रियात्वाभावात्स्वरूपेण न विधियोग्यता तथापि दध्ना जुहोतीत्यादाविव क्रियारूपे पदार्थे द्रव्यं यथा क्रियाविशेषणं
सद्विधीयते दधिसाधनकं होमं कुर्यादिति एवमनेन क्रमेण कर्तव्यमिति क्रियाविशेषणतया क्रमो विधीयतामिति यतः प्रयोगविधिरेव पदार्थविशेष
णतयेतन्नियतक्रममपि विधत्तेऽत एवकारणात्तस्य लक्षणान्तरमपीत्याह अत एवेति ननु क्रमबोधक इत्यत्र किंलक्षणः क्रमोभिमत इत्याकाङ्क्षायां क्रमं लक्षय

रुणं होतुस्ततस्तं नेष्टा दीक्षयित्वा तृतीयिनो दीक्षयति आग्नीध्रं ब्रह्मणः प्रतिहर्तारमुद्गातुरच्छावाकं होतुस्ततस्तमुन्नेता दीक्षयित्वा पादिनो दीक्षयति पोतारं ब्रह्मणः सुब्रह्मण्यमुद्गातुर्ग्रावस्तुतं होतुस्ततस्तमन्यो ब्राह्मणो दीक्षयति ब्रह्मचारी वाऽऽचार्यप्रेषित इति श्रुते न वाक्येऽत्र हि न दीक्षायाः स्वरूपेण तत्तत्संस्कारकत्वेन वा विधिरतिदेशप्राप्तत्वात् प्रकृतौ हि यजमानसंस्कारार्था दीक्षा निर्देशेनैव सत्त्रे प्राप्यते सत्त्रे च ये यजमानास्त ऋत्विज इति वचनेन ऋत्विक्कार्योद्देशेन यजमानविधानाद् ब्रह्मादीनां यजमानत्वेनैव प्रतिप्रधानगुणावृत्तिन्यायेन तत्तत्संस्कारकत्वप्राप्तेः ततश्च दीक्षास्वरूपं धात्वर्थमनूद्याख्यातेन क्त्वाप्रत्ययोक्तस्ततः शब्दोक्तश्च क्रमो विधीयते अत्र चायमर्थः अध्वर्युर्यजुर्वेदोक्तं करोति तस्य पुरुषास्त्रयः प्रतिप्रस्थाता नेष्टोन्नेता चेति एते चत्वारो दीक्षयितारः ब्रह्मा वेदत्रयोक्तस्य प्रत्यवेक्षणं करोति तस्य पुरुषास्त्रयः ब्राह्मणाच्छंसी अग्नीत् पोता चेति उद्गाता उद्गानं करोति तस्य पुरुषास्त्रयः प्रस्तोता प्रतिहर्ता सुब्रह्मण्यश्चेति होता शंसनं करोति तस्य पुरुषास्त्रयः मैत्रावरुणोऽच्छावाग्ग्रावस्तुच्चेति चतुर्षु वर्गेषु ये प्रथमास्ते दक्षिणां संपूर्णां प्राप्नुवन्ति ये द्वितीयास्ते तदर्धं प्राप्नुवन्तीत्यतोऽर्द्धिन इत्युच्यन्ते ये तृतीयास्ते तृतीयांशं प्राप्नुवन्तीति तृतीयिनः ये चतुर्थास्ते चतुर्थांशं प्राप्नुवन्तीति पादिनः तानेतानुक्तक्रमेण तत्तत्पुरुषः करोतीति किं चेतरमन्यस्तेषां यतो विशेषः स्यादिति न्यायेनाध्वर्युपुरुषाणामाद्यः प्रतिप्रस्थातैवाध्वर्युदीक्षायां प्राप्नोति ब्राह्मणाच्छंस्यादिदीक्षासु त्वध्वर्योर्नेपूतः पावयेदिति वचनेन सत्त्रप्रकरणे पठितेन दीक्षासु दीक्षाख्यसंस्काररहितपुरुषकर्तृविधायकेन पर्युदासात् प्रतिप्रस्थातृप्राप्तिः सुलभैव एवं प्रतिप्रस्थात्रादिदीक्षासु नेष्टुः प्रतिप्रस्थात्रनन्तरस्य नेष्ट्रादिदीक्षासु चोन्नेतुर्नेष्ट्रनन्तरस्य प्राप्तिर्न्यायादेवेति न विधेयानरशंका अतः क्रम एवात्राप्राप्तः स एव तत्तद्दीक्षोद्देशेन विधीयते अत एव चैतानि द्वादश वाक्यानि श्रौतक्रमविधायकानि अर्द्धित्वाद्युद्देश्यतावच्छेदकमंगीकृत्य षडेव वा उन्नेतृदीक्षावाक्ये तु वैकल्पिकब्रह्मचारिविधानात् हृदयादिन्यायेन पाठादेव क्रमसिद्धेस्तत इत्यनुवादः निपातत्वाच्च वाशब्दस्य ब्रह्मचारिविशेषणत्वे न न वाक्यभेदः ब्राह्मणानामेवार्त्विज्यविधानाद्ब्राह्मण इति चानुवादः ब्रह्मचारिणश्चाचार्याधीनत्वस्मृतेराचार्यप्रेषित इत्यप्यनुवादः यत्तु यद्यप्यत्र क्रमस्य वाचकः शब्दो नास्ति

तथापि वाक्येन प्रतीयते स च प्रतीयमानः क्रमो मानान्तरेण कर्तव्यतया प्राप्त्यभावाद्धविर्धीयत इति तत्कालप्रत्ययादेः क्रमवाचकस्योक्तत्वात् अतः क्रम
एवात्राप्राप्तस्तत्तद्दीक्षोद्देशेन विधीयते क्त्वाप्रत्ययोक्तस्ततः यदोक्तश्चेति भाट्टदीपिकाविरोधश्चेति इदानीमुक्तश्रुतेरर्थपाठादिप्रमाणापेक्षया प्राबल्यमा
ह सेयं श्रुतिरिति अर्थादिप्रमाणानां श्रुतिकल्पनद्वारा क्रमे प्रामाण्यादिति तत्र हेतुमाह तेषामित्यादिना ज्योतिष्टोमे ऐन्द्रवायवादिग्रहेष्वाश्विननामकग्रह
स्तृतीयस्थाने पठितः अतश्च तृतीयस्थाने ग्रहणप्रसक्तावपि तस्य दशमस्थानत्वमाश्विनो दशमो गृह्यत इति शब्देनैवाम्नायत इति तत्र गमकमप्याह।
अत एवेत्यादिना अत एव इतरप्रमाणापेक्षया श्रुतेः प्राबल्यादेवेत्यर्थः इत्युक्तमिति पञ्चमाध्याये चतुर्थपादस्य प्रथमाधिकरण इति शेषः पाठो हि
न क्रमस्याभिधायकः किन्त्वन्यथानुपपत्त्या क्रमं कल्पयति दशम इत्येषा श्रुतिस्तु साक्षादेव क्रममभिधत्ते नतः पाठादपि श्रुतिः प्रबलेति भावः इदानीम

अत एवाश्विनग्रहणस्य पाठक्रमात्तृतीयस्थाने ग्रहणप्रसक्तावाश्विनो दशमो गृह्यत इति वचनात् दशमस्थाने ग्रहणमित्युक्तम्। यत्र प्र
योजनवशेन क्रमनिर्णयः सोऽर्थक्रमः। यथाऽग्निहोत्रं जुहोति यवागूं पचतीत्यग्निहोत्रयवागूपाकयोः। अत्र हि यवाग्वा होमा
र्थत्वेन तत्पाकः प्रयोजनवशेन पूर्वमनुष्ठीयते। स चायं पाठक्रमाद्बलवान्॥

॥अर्थक्रमं लक्षयति यत्रेत्यादिना प्रयोजनवशेन प्रयोजनानुप
पत्त्या तद्धि व्युत्क्रमेऽनुपपद्यमानं क्रमे प्रमाणमिति भावः तत्रोदाहरणमाह यथाग्निहोत्रमिति अग्निहोत्रयवागूपाकयोरित्यत्र प्रयोजनवशेन क्रम
निर्णय इत्यनुषङ्गः अत्र हीति अत्र प्रकृते यवागूहोमयोर्मध्य इति वार्थः तत्पाकः पूर्वमनुष्ठीयत इत्यन्वयः होमादिति शेषः यवागूः तच्छब्दार्थः यवा
गूपाकस्य पाठक्रमेण पश्चात्करणे पाकसंस्कृतायाः यवाग्वा होमरूपप्रयोजनस्य यवाग्वाग्निहोत्रं जुहोतीति वचनसिद्धस्यानिष्पत्तेः पाकस्य च यवागू
त्पादकत्वेऽपि तस्या अनुपयुक्तायाः प्रयोजनत्वानुपपत्तेस्तदन्यथानुपपत्त्या पूर्वं पाकः पश्चाद्धोमानुष्ठीयत इति भावः अर्थक्रमस्य पाठक्रमाद्बलीयस्त्वे

जै० मी० ३३

स्वाद्वग्निमिति यवागूपाकस्य यथापाठमनुष्ठाने दृष्टार्थत्वं स्यादिति विपक्षे बाधकमाह यथापाठमिति क्रमप्रयोजनबाधस्तु दर्शितोऽयवागूपाकस्येत्यारभ्या
स्मादिति भावः दृष्टमेव किंचित्संभवत्प्राप्तिकं भवेदित्यत आह नहीत्यादिना नहि भक्षणमन्तरेण किंचिद्दृष्टप्रयोजनमुपलभ्यते तेन च न प्रकृतयवाग्वा अर
र्थ्यानात्प्रमाणाभावाच्चेति भावः पाठक्रमं लक्षयति पदार्थेति तस्माच्चेति पाठक्रमाच्चेत्यर्थः पाठक्रमात्पदार्थः क्रममुपपादयतीति येनेत्यादिना वाक्यानी
ति पदस्याप्युपलक्षणम् पदार्थप्रत्ययस्य क्वाप्युपयोग इत्यत आह यथाप्रत्ययं चेति पाठक्रमं विभजते स च पाठो द्विविध इति मंत्रपाठक्रममुदाहरति

यथापाठं ह्यनुष्ठाने क्रमप्रयोजनबाधेऽदृष्टार्थत्वं स्यात्। नहि होमानन्तरं क्रियमाणस्य पाकस्य किंचिद्दृष्टं प्रयोजनमस्ति। पदार्थबोधकवाक्यानां यः क्रमः स पाठक्रमः। तस्माच्च पदार्थानां क्रम आश्रीयते येन हि क्रमेण वाक्यानि पठितानि तेनैव क्रमेणाधीतान्यर्थप्रत्ययं जनयन्ति। यथाप्रत्ययं च पदार्थानामनुष्ठानम्। स च पाठो द्विविधः। मंत्रपाठो ब्राह्मणपाठश्चेति। तत्राग्नेयाग्नीषोमीययोस्तत्तद्वाक्यानां याज्यानुवाक्यानां पाठाद्यः क्रम आश्रीयते स मंत्रपाठात्। स चायं मंत्रपाठो ब्राह्मणपाठाद्बलीयान्। अनुष्ठाने ब्राह्मणवाक्यापेक्षया मंत्रपाठस्यान्तरंगत्वात्। ब्राह्मणवाक्यं हि प्रयोगाद्बहिरेवेदं कर्तव्यमिति अवबोध्य कृतार्थम्। मंत्राः पुनः प्रयोगकाले व्याप्रियन्ते। अनुष्ठानक्रमस्मरणक्रमाधीनत्वात्॥

॥ तत्रेत्यादिना तत्र मंत्रपाठब्राह्मणपाठयोर्मध्य इत्यर्थः किंच अग्नीषोमीययागस्येति
रीयब्राह्मणे पंचमप्रपाठके द्वितीयानुवाके समाम्नातः ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छदिति आग्नेययागस्तु षष्ठप्रपाठके तृती
यानुवाके आम्नातः यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवतीति तत्रानुष्ठानस्य ब्राह्मणोक्तविध्यधीनत्वादग्नीषोमीयस्य प्रथ ३३
ममनुष्ठानमित्याशंक्य मंत्रकाण्डे पूर्वं पठिता आग्नेयमंत्राः तथाहि होत्रकाण्डे ॥

आज्यभागमंत्रानुवाकादुत्तरस्मिन्ननुवाके प्रथमममग्निर्मूर्द्धेत्यादिके आग्नेय्यौ याज्यानुवाक्ये आम्नाते ततः प्रजापतेनत्वदेतानीत्यादिके प्राजापत्ये
ततोग्नीषोमासवेदसेत्यादिके अग्नीषोमीये आध्वर्यवकांडेप्यग्नयेजुष्टं निर्वपाम्यग्नीषोमाभ्यामित्याग्नेयः पूर्वमाम्नातः याजमानकांडेप्यग्नेरहं देव
यज्ययान्नादो भूयासमित्याग्नेयस्य पश्चादग्नीषोमयोरहं देवयज्यया वृत्रहा भूयासमित्याम्नायते मंत्रक्रमः प्रबलः मंत्रैः स्मृत्वा पश्चादनुष्ठेयत्वाद्ब्राह्म
णान्यप्राप्तपदार्थे विधिनापि चरितार्थं अतोनुष्ठानस्मरणार्थेवोत्पन्नान्मंत्रान् बाधितुं नालमिति मंत्रक्रमेणाग्नेयस्यैव प्रथममनुष्ठानमिति समाधानम
भिप्रेत्य वा मंत्रपाठस्य ब्राह्मणपाठाद्बलीयस्त्वमाह सचायमित्यादिना किंच पाठयोस्तु मंत्रब्राह्मणगतयोर्मंत्रपाठो बलीयान् नतु ब्राह्मणपाठः तस्या
त्यजिविनियोगविधिगतत्वेन प्रथमोपस्थितत्वेपि पाठस्य स्मारकक्रमविधेयैव क्रमनियामकत्वोक्तेर्मंत्रसत्वे च तस्यैव स्मारकतया विधानोपयुक्त
स्यासमर्थस्य च विधेः स्मारकत्वाभावान्मंत्रपाठक्रम एव बलीयान् तेन च याज्यानुवाक्यादिमंत्रपाठक्रमादाग्नेयस्य प्रथमानुष्ठानं पश्चाच्चोपांशु
याजोत्तरमग्नीषोमीयस्य नतु ब्राह्मणपाठक्रमादग्नीषोमीयस्य प्रथमं पश्चादुपांशुयाजोत्तरमाग्नेयस्येत्यभिप्रेत्य मंत्रपाठस्य ब्राह्मणपाठाद्ब
लीयस्त्वमाह स चायमित्यादिना याज्यानुवाक्यानामिति यजेति प्रैषानंतरमृग्या ब्राह्मणा समुच्चार्यते सा याज्येत्युच्यते अनुब्रूहीति प्रैषानंतरमृ
ग्या तेनैव समुच्चार्यते सानुवाक्येत्युच्यत इत्यर्थः तस्य तद्बलीयस्त्वे हेतुमाह अनुष्ठान इत्यादिना मंत्रपाठस्य ब्राह्मणपाठादनुष्ठानेंतरंगत्वमुपपाद
यति ब्राह्मणवाक्यमित्यादिना स्मरणक्रमाधीनत्वादिति अनुष्ठेयपदार्थस्मरणक्रमाधीनत्वादित्यर्थः ॥ छ ॥ छ ॥ ॥

लौ० मी० ३४ त्क्रमस्येति अनुष्ठेयपदार्थस्मरणक्रमस्येत्यर्थः मंत्रक्रमाधीनत्वादिति अनुष्ठेयपदार्थस्मारकमंत्रक्रमाधीनत्वादित्यर्थः प्रयाजानामनुष्ठानक्रमः समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजतीति ब्राह्मणपाठक्रमात्स्वीक्रियते इत्याह प्रयाजानामित्यादिना ननु समिधोऽग्न आज्यस्य व्यंत्वित्यादिमंत्राणां प्रयाजक्रमस्मारकाणां सत्वेन कथं तेषां ब्राह्मणवाक्यक्रमात्क्रमः स्वीक्रियते तद्वाक्यानां विधानमात्रे चरितार्थत्वादित्याशयेनाशंकते यद्यपीति मंत्रपाठस्यान्यादृशत्वेन वा मंत्राणां देवतामात्रस्मारकत्वेन कर्मस्मारकत्वाभावाद्वा प्रयाजक्रमो ब्राह्मणपाठक्रमादेवेत्याशयेन परिहरति तथापीति तथा च येन क्रमेण ब्राह्मणवाक्यान्यधीतानि तेनैव क्रमेणार्थस्मरणं जनयंतीति युक्तं तेषां तेनैव क्रमेणानुष्ठानमिति भावः वस्तुतस्तु प्रयाजक्रमो न ब्राह्म

तत्क्रमस्य च मंत्रक्रमाधीनत्वात् अंतरंगो मंत्रपाठ इति प्रयाजानां समिधो यजति तनूनपातं यजति इत्येवं विधिपाठक्रमाद्यः क्रमः स ब्राह्मणपाठक्रमात्। यद्यपि ब्राह्मणवाक्यान्यर्थविधायकत्वाच्चार्थानि तथापि प्रयाजादीनां क्रमस्मारकान्तरस्याभावात्तान्येव क्रमस्मारकत्वेन स्वीक्रियंते। स्थानं नामोपस्थितिः। यस्मिन्हि देशे योऽनुष्ठीयते तेन पूर्वं तत्र पदार्थे कृते स एव प्रथममुपस्थितो भवतीति युक्तं तस्य प्रथममनुष्ठानम्। अत एव साद्यस्क्रे अग्नीषोमीयसवनीयानुबंध्यानां सवनीयदेशे सहानुष्ठाने कर्तव्ये आदौ सवनीयपशोरनुष्ठानमितरयोः पश्चात्तस्मिन्देशे आश्विनग्रहणानंतरं सवनीयस्यैव प्रथममुपस्थितेः॥

णपाठक्रमात्स्वीक्रियते समिधोऽग्न आज्यस्य व्यंत्वित्यादिभिः क्रमप्रकरणप्राप्तैर्मंत्रैर्देवतागुणत्वेन समर्प्यंत इति नवमतं तन्त्ररत्नविरोधप्रसंगात् अन्यथा मंत्राणामन्यादृशक्रमत्वेन तदनुपपत्त्यापत्तेः किंतु मंत्रपाठक्रमात्क्रम एव ब्राह्मणपाठक्रमात्क्रमस्तु यत्रार्थस्मारका मंत्रा न संति तत्र तेषामेव यथानुपूर्वीं विहितानां कर्मणां क्रमो ब्राह्मणपाठक्रमाद्भवति तत्र तेषामेव प्रयोगसमवेतार्थस्मारकत्वात् प्रयाजोदाहरणं तु कृत्वाचिंतया तत्र ब्राह्मणवाक्यानां प्रयोगसमवेतार्थस्मारकत्वाभावात् तथा चार्थवादपादे वार्तिकवचनम् प्रयाजादिवाक्यान्यर्थसमर्प्यचरितार्थानि स्वरूपसंस्पर्शे सत्यपि प्रयोज्य॥ ३४

तांनप्रतिपद्यंत इतिन स्यान्मंत्रक्रमादेव प्रयाजक्रमइतिसिद्धमितिध्येयम्॥ इदानीं स्थानं लक्षयति स्थानंनामोपस्थितिरितिप्रकृतौ नानादेशानां पदार्थानां विकृतौ चोदकवचनादेकस्मिन्देशेऽनुष्ठाने कर्तव्ये यस्य देशेऽनुष्ठीयंतेन स्य प्रथममनुष्ठानमितरयोस्तु पश्चादिति यः क्रमः सस्थानक्रमः तेन चोपस्थिति विशेषेण यो नु ष्ठानक्रमः स एव स्थानक्रमइत्युच्यत इतिभावः उपस्थितिव्यनक्ति यस्येत्यादिना यस्येति ज्योतिष्टोमादिप्रकृतेः साद्यस्क्रादिविकृतौ चोदकप्राप्तस्यसवनीयादेरित्यर्थः यइति अग्नीषोमीयानुबन्ध्यादिरित्यर्थः तत्पूर्वतन इतितस्मात्सवनीयादेः पूर्वतन आश्विनग्रहणादेः पदार्थे कृते सतीत्यर्थः एवेति सवनीयादिरेवेत्यर्थः प्रथममितिअग्नीषोमीयानुबन्ध्यापेक्षया प्रथममित्यर्थः तस्येति सवनीयादेरेवेत्यर्थः अतएवेति प्रथमोपस्थितत्वप्रथमानुष्ठानस्योक्तत्वादेव

तथाहि ज्योतिष्टोमेत्रयः पशुयागाः अग्नीषोमीयः सवनीय आनुबंध्यश्चेति तेचभिन्नदेशाः अग्नीषोमीय औपवसथ्येन्हि सवनीयः सुत्याकाल आनुबंध्यस्त्वंते। साद्यस्क्रोनाम सोमयागविशेषः सचाव्यक्तत्वाज्ज्योतिष्टोमविकारः। अतस्तत्रयोपि पशुयागाः साद्यस्क्रे चोदकप्राप्ताः। तेषां तत्रसाहित्यं श्रुतंसह पशूनालभत इति। तच्च साहित्यं सवनीयदेशेन स्य प्रधानप्रत्यासत्तेः स्थानातिक्रमणसाम्याच्च। सवनीयदेशेह्यनुष्ठानेऽग्नीषोमीयानुबंध्ययोः स्वस्वस्थानातिक्रमोभवति॥

॥ वेत्यर्थः॥ इतरयोरितिअग्नीषोमीयानुबन्ध्ययोरित्यर्थः तस्मिन्देश इतित्रयाणामपि पशूनां विकृतौ प्राप्तसवनीयदेश इत्यर्थः आश्विनग्रहणानंतरमित्यत्र सवनीयस्यैव विकृतौ प्रधानप्रत्यासत्तिबलाच्चोदकप्राप्ततत्वेनोपस्थितियोग्यत्वादिति शेषः प्रथममितिअग्नीषोमीयानुबन्ध्यापेक्षयाप्रथममित्यर्थः विकृतावाश्विनग्रहणानंतरमेव सवनीयस्थानप्रदर्शनाय प्रथमं प्रकृतौ तत्स्थानं प्रदर्शयति तथाहीत्यादिना औपवसथ्येऽह्नीत्युक्तार्थ एव अंतइति अवभृथादूर्ध्वकाल इत्यर्थः अव्यक्तत्वादिति स्वार्थचोदितदेवनारहितत्वादित्यर्थः तदुक्तं न्यायप्रकाशे अव्यक्तत्वंच स्वार्थचोदितदेवताराहित्यमिति अतइतिज्योतिष्टोमविकारत्वादित्यर्थः तत्रेति सा

सवनीयस्येत्यर्थः प्रधानेतियथाप्रकृतिभूतेज्योतिष्टोमेसुत्याकालिकःसवनीयःप्रधानप्रत्यासन्नस्तथैवतद्विकृतिविशेषेसाद्यस्क्रेपितत्कालिकः।सप्र
धानप्रत्यासन्नएवेतिभावःसवनीयदेशेसाहित्येत्रयाणांस्वस्वस्थानातिक्रमसाम्यंहे त्वंतरमाहस्थानेतितद्देवस्वस्वस्थानातिक्रमसाम्यप्रदर्शयतिसवनी
यदेशइत्यारभ्यतथाचेतिप्राकृतनेनग्रंथेनस्वस्वस्थानातिक्रमोभवतीतियथाप्रकृतौतथैवविकृतावपिचोदकप्राप्तस्याग्नीषोमीयस्योपवसथ्याहोरूप
स्वस्वस्थानमात्रस्यातिक्रमोभवत्यानुबन्ध्यस्यचस्वांतस्थानमात्रस्यातिक्रमोभवतीत्यर्थःसवनीयस्यतुसुत्याकालरूपस्वस्थानस्यनातिक्रमोभवतीत्य
त्रलाघवमितिभावःत्रयाणामितिस्वस्वस्थानातिक्रमइतिअग्नीषोमीयस्यदेशऔपवसथ्येह्निसर्वेषामनुष्ठानेग्नीषोमीयस्यसवनीयप्रधानसोम

स्वस्वस्थानातिक्रममात्रंभवतिप्रधानप्रत्यासत्तिलाभश्च। अग्नीषोमीयदेशेत्वनुष्ठानेसवनीयस्यस्वस्थानातिक्रममात्रंअनुबंध्यस्यतुस्व
स्थानातिक्रमःसवनीयस्यानातिक्रमश्चस्यात्।एवमनुबंध्यदेशेऽग्नीषोमीयस्यद्व्यहव्यः स्थानातिक्रमः।तथासवनदेशेसर्वेषामनु
कर्तव्येसवनीयआश्विनग्रहणानंतरंहिसयस्यप्रथममनुष्ठानंसवनीयदेशः।अग्नीषोमीयदेशेनुबंध्यदेशेवानुष्ठानेत्रयाणाम
पिमध्येद्वयोर्द्वयोःस्वस्वस्थानातिक्रमः।तथाचप्रकृतावाश्विनग्रहंकृत्वात्रिवृतायूपंपरिवीयसवनीयंपशुमुपाकरोतीत्याश्विनग्र
हणानंतरंसवनीयोविहितइतिसाद्यस्क्रेप्याश्विनग्रहणेकृतेसवनीयएवोपस्थितोभवत्यतोयुक्तम् तस्यस्थानात्प्रथममनुष्ठानमि
॥तरयोस्तुपश्चादित्युक्तम्॥६॥

प्रत्यासत्तिबलात्साहित्यविधिप्राप्तसुत्याकालरूपसवनीयस्थानरूपस्वस्थानातिक्रमोभवतिआनुबन्ध्यस्य
तुतादृशसवनीयस्थानरूपस्वस्थानातिक्रमःस्वीयांतस्थानातिक्रमश्चसवनीयस्यतुसुत्याकालरूपस्वस्थानमात्रातिक्रमोभवतीतित्रयाणांस्वस्व
स्थानातिक्रमःआनुबन्ध्यस्यदेशेतुतेषामनुष्ठानेग्नीषोमीयस्योपवसथ्याहोरूपस्वस्वस्थानस्यातिक्रमस्तादृशसवनीयस्थानरूपस्वस्थानस्या
तिक्रमश्चभवतिआनुबन्ध्यस्यतुनिरुक्तसवनीयस्थानरूपस्वस्थानस्यातिक्रमःसवनीयस्यतु॥ श्री॥ ॥श्रीग ॥ श्रा ॥

स्वस्थानमात्रस्यातिक्रमश्च भवतीति त्रयाणां स्वस्वस्थानस्यातिक्रमइत्यर्थः तथा चेति उक्तयुक्त्या सवनीयदेशे त्रयाणामनुष्ठानेकर्तव्ये चेत्यर्थः वैकृतस
वनीयस्थाननिर्णयोपायतया प्राकृतं सवनीयस्थानं श्रुत्या प्रदर्शयति प्रकृताविप्यादिना त्रिवृता त्रिगुणितरज्ज्वा परिवीयपरिवेष्टनं कृत्वा आश्विनसो
मग्रहः तद्ग्रहणानंतरं ज्योतिष्टोमे सवनीयो विहित इतिभावः इति यतः प्रकृतावाश्विनग्रहणानंतरं स विहितोऽतो हेतोरित्यर्थः आश्विनग्रहणइति
अत्राप्याश्विनग्रहणानंतरमेव तस्य चोदकप्राप्तत्वेन तदनंतरमेव तदुपस्थितिरितिभावः तस्येति सवनीयस्येत्यर्थः स्थानादिति उपस्थितेरित्यर्थः अनयो
रिति अग्नीषोमीयानुबन्ध्ययोरित्यर्थः ननु तयोः पश्चादनुष्ठानेपि कस्य प्रथममनुष्ठानं कस्य पश्चादित्यनिर्णये प्रयोगविसेपापत्तेरित्यत आह उक्तमिति
पंचमाध्यायस्य प्रथमे पादे इति शेषः तत्र हि स्थानात्सवनीयस्य प्राथम्ये निश्चिते स्थानभ्रष्टयोस्तयोरग्नीषोमीयस्य प्रथममनुष्ठानमानुबन्ध्यस्य
पश्चादित्युक्तमित्यर्थः उक्तं हि न्यायमालाविस्तरे साद्यस्क्रो नामकः कश्चित्सोमयागः तत्र श्रूयते सह पशूनालभत इति प्रकृतावग्नीषोमीयपशुरौपव
सथ्येदिने आलभ्यते सवनीयपशुः सुत्यादिने प्रातःसवन आश्विनग्रहादूर्ध्वमालभ्यते आनुबन्ध्यः पशुरवभृथादूर्ध्वमालभ्यते इह तु त्रयोपि पशवः
सहालब्धव्याः सोयं सहालंभः सुत्यादिने आश्विनग्रहादूर्ध्वं सवनीयस्थाने भवतीत्येतदवश्यमभ्युपेतव्यं तथा सति प्रधानसोमप्रत्यासत्तिलाभादि
ति सवनीयो हि स्वस्थान एव वर्तते आश्विनग्रहसामीप्यस्य सवनीयस्थानत्वात् आश्विने गृहीते सति सवनीय एव बुद्धिस्थो भवति प्रकृतौ तदा
नंतर्यस्य क्लृप्तत्वात् ततः सवनीयस्य प्राथम्ये स्थानान्निश्चिते सति स्थानभ्रष्टयोरग्नीषोमीयानुबन्ध्ययोः प्रकृताविव पूर्वोत्तरभावो द्रष्टव्य इ
ति यद्वा उक्तमिति आदौ सवनीयपशोरनुष्ठानमितरयोः पश्चादित्यत्र पूर्वत्रोक्तमित्यर्थः अथ मुख्यक्रमं लक्षयति ॥ श्री॥ श्री॥

प्रधानक्रमेणेतितेनैवक्रमेणेत्यत्रयदेतिशेषस्तदेत्यनुरोधात् यत्रस्थानेकेषांसांगानांप्रधानानांसहकर्तव्यतातत्रप्रयोगविधिनांगप्रधानयोःसाहित्यावगतावपिप्रधानानांतत्साहित्यानुरोधेनयावदनुष्ठानव्यवधानस्वीकारेपितदधिकव्यवधानेप्रमाणाभावात्प्रधानप्रत्यासत्त्यनुग्रहायमुख्यक्रमेणैवांगक्रमनियमः अतएवप्रवृत्तौ अंगनिरूपितप्रत्यासत्त्यनुग्रहोबीजंमुख्य क्रमेतुप्रधाननिरूपितप्रत्यासत्त्यनुग्रहोबीजमितितयोर्भेदइतिभावः प्रधानक्रमव्युत्क्रमेणांगानुष्ठानेबाधकमाहव्युत्क्रमेणेत्यादिना तत्रापीष्टापत्तिमाशंक्य प्रयोगविध्यवगततत्साहित्यबाधापत्तिरूपमनिष्टंबाधकमाहतच्चा

प्रधानक्रमेणयोंगानांक्रमःसमुख्यःक्रमः।येनहिक्रमेणप्रधानानिक्रियंतेतेनैवक्रमेणांगान्यनुष्ठीयंते।तदासर्वेषामंगानांस्वैःस्वैःप्रधानैस्तुल्यंव्यवधानंभवति।व्युत्क्रमेणानुष्ठानेकेषांचिदंगानांस्वैःप्रधानैरत्यंतमव्यवधानंकेषांचिदत्यंतव्यवधानंस्यात्तच्चायुक्तंप्रयोगविध्यवगत तत्साहित्यबाधापत्तेः। ।अतःप्रधानक्रमोपिअंगक्रमेहेतुः।तएवप्रयाजशेषेणादावाग्नेयहविषोऽभिघारणंपश्चादैंद्रस्यदध्नःआग्नेयैंद्रयागयोःपौर्वापर्यात्।एवंचद्वयोर्द्वयोरभिघारणयोःस्वस्वप्रधानेनतुल्यमेकांतरितंव्यवधानं।व्युत्क्रमेणाभिघारणेत्वाग्नेयहविरभिघारणाग्नेययागयोरत्यंतमव्यवधानं।ऐंद्रदध्यभिघारणैंद्रयागयोर्द्व्यंतरितंव्यवधानंतच्चायुक्तमित्युक्तमेव।सचमुख्यःक्रमःपाठक्रमाद्दुर्बलः॥

॥युक्तमितिकेषांचिदंगानांनैरत्यंतमव्यवधानंकेषांचिदत्यंतव्यवधानंचेत्यर्थःअतइतिप्रधानक्रमवैपरीत्येनांगक्रमेपूर्वोक्तसाहित्यबाधापत्तेरित्यर्थःअतएवेतिप्रधानक्रमस्यांगक्रमेहेतुत्वादेवेत्यर्थः प्रयाजशेषेणेत्यत्रघृतेनेतिशेषःअभिघारणमितिसरहृघृतेनाभिषेकइत्यर्थः एवंचेतिमुख्यक्रमेणहविरभिघारणरूपांगक्रमेचेत्यर्थःएकांतरितंव्यवधानमितिआग्नेयहविरभिघारणाग्नेययागयोरैन्द्रयागहविरभिघारणेनव्यवधानादैन्द्रयागहविरभिघारणैन्द्रयागयोश्चाग्नेययागेनव्यवधानादित्येकांतरितव्यवधानमित्यर्थःतथा 
चाघारावाग्नेयहविरभिघारणंततऐन्द्रस्यहविषोभि॥ श्री॥

घारणं तत आग्नेययागः ततश्चैन्द्रयाग इत्येवं क्रमो मुख्यक्रमात्सिद्धो भवतीति भावः यदि त्वादावैन्द्रहविषोभिघारणं तत आग्नेयहविषस्तत्क्रिय
ते ततस्तया ज्यानुवाक्याक्रमवशादाग्नेययागस्यानुष्ठानं तत ऐन्द्रयागस्यानुष्ठानमिति क्रमः स्वीक्रियते तदा कस्यचिदत्यन्तमव्यवधानं कस्यचिदत्यन्त
व्यवधानं च स्यात् तत्त्वायुक्तं प्रयोगविध्यवगततत्साहित्यबाधापत्तेरित्यभिप्रेत्याह व्युत्क्रमे पीत्यादिना उत्क्रमे चेति तच्चायुक्तं प्रयोगेत्यादेर्दूषणमुक्तमेवेत्य
र्थः इदानीं पाठक्रमान्मुख्यक्रमस्य दौर्बल्यमाह स चेति तत्र हेतुमाह मुख्यक्रमो हीति यतो मुख्यक्रमः प्रमाणान्तरसापेक्षया प्रधानक्रमस्य प्रतिपत्तिस्त
त्सापेक्षत्वेन विलंबितप्रतिपत्तिकोऽतः पाठक्रमाद्दुर्बल एवेत्यर्थः किं च निरपेक्षो यः स्वाध्यायपाठक्रमस्तन्मात्रसापेक्षत्वेन प्रतीतो न दुर्बलः पाठक्रमोऽतो ब
लवानिति पाठक्रमस्य ततो वैषम्यमाह पाठक्रमस्त्विति अत्रेदं बोध्यम् दर्शपूर्णमासयोरुपांशुयागोऽग्नीषोमीयश्चेत्येतदुभयं पौर्णमास्यामाम्नातं तत्रोपां

मुख्यक्रमो हि प्रमाणान्तरसापेक्षप्रधानक्रमप्रतिपत्तिसापेक्षतया विलंबितप्रतिपत्तिकः। पाठक्रमस्तु निरपेक्षस्वाध्यायपाठक्रममा
त्रसापेक्षतया न तथेति बलवान्। स चायं मुख्यक्रमः प्रवृत्तिक्रमाच्च बलवान्। प्रवृत्तिक्रमे हि द्वितीयादिपदार्थानां प्रथमानुष्ठि
तक्रमापेक्षा बहूनामंगानां प्रधानविप्रकर्षान्मुख्यक्रमे तु सन्निकर्षात्

शुयागस्याज्यं द्रव्यं आज्यस्य धर्मा उत्पवनं चतुर्गृहीतत्वादय अग्नीषोमीयस्य पुरोडाशो द्रव्यं तस्य धर्मा निर्वापावघातादयः तत्र चायं पूर्वपक्षः मुख्यौ
यागावुपांशुयागाग्नीषोमीयौ पूर्वोत्तरभाविनौ भवतः तथा च सति अंगक्रमस्य प्रधानक्रमेणैवाश्रयणीयत्वात्प्रथममाज्यधर्माणामेवानुष्ठानं ततो निर्वा
पादीनामिति तत्र सिद्धान्तः औषधधर्माः निर्वापादयः पूर्वमाम्नाताः आज्यधर्मास्तु पश्चात् तत्र मुख्यक्रमप्रयुक्तमाज्यधर्माणां प्राथम्यं बाधित्वा पाठक्रमा
नुरोधेनौषधधर्मा एव प्रथममनुष्ठेयाः पाठक्रमो हि वैदिकैः शब्दैः सह सा प्रतीयते मुख्यक्रमानुसारी तु क्रमः उपपत्त्या कल्पनीयः तस्मादग्नीषोमीय
पुरोडाशार्थौषधधर्माः प्रथममनुष्ठेया आज्यधर्मास्तु पश्चादिति प्रवृत्तिक्रमापेक्षया तु मुख्यक्रमस्य प्राबल्यमेवेत्याह प्रवृत्तीति तत्र हेतुमाह प्रवृ

तिक्रमेहीति अत्रेदंबोध्यम् दर्शपूर्णमासयोराग्नेययागस्यानुष्ठानंततः सान्नाय्ययागस्य सान्नाय्यधर्माश्चकेचिद्वत्सापाकरणदोहनादयः पूर्वमेवानुष्ठीयन्तेतत्रयदिप्रवृत्तिक्रममाश्रित्यसान्नाय्यधर्मा अवदानाभिघारणहविरासादनादयोपिसर्वेपूर्वमेवानुष्ठीयेरन्ततआग्नेयधर्मा अवदानादयस्तदनुष्ठानंचततः सान्नाय्ययागानुष्ठानंतदासान्नाय्यधर्माणांसर्वेषांस्वप्रधानेनसह द्वाभ्यामाग्नेयधर्मतदनुष्ठानाभ्यांविप्रकर्षःस्यात् यदातुसान्नाय्यधर्माणांकेषांचिद्वत्सापाकरणादीनांपूर्वमनुष्ठानेप्यन्येसर्वेवदानादयस्तद्धर्मामुख्यक्रममाश्रित्याग्नेयधर्मानुष्ठानानंतरमनुष्ठीयंतेतदासर्वेषामाग्नेयधर्मसान्नाय्यधर्माणामेकैकेनविजातीयेनव्यवधानंभवतिआग्नेयधर्माणांस्वप्रधानेनसहसान्नाय्यधर्मैर्व्यवधानात्सान्नाय्यधर्माणांचस्वप्रधानेनसहाग्नेयानुष्ठानेनव्य

सहप्रयुज्यमानेषुप्रधानेषुसन्निपातिनामंगानामावृत्त्यानुष्ठानेकर्तव्ये द्वितीयादिपदार्थानांप्रथमानुष्ठितपदार्थक्रमाद्यःक्रमःसप्रवृत्तिक्रमः। यथाप्राजापत्यपशुगेषु प्राजापत्यान्हि वैश्वदेवीकृत्वाप्राजापत्यैश्चरंतीतिवाक्येनतृतीयानिर्देशात्सेतिकर्तव्यताकाएककालत्वेन विहिता अतस्तेषांतदंगानांचोपाकरणनियोजनप्रभृतीनांसाहित्यंसंपाद्यम्। तच्चप्राजापत्यपशूनांसंप्रतिपन्नदेवताकत्वेनयुगपदनुष्ठानादुपपद्यते नदंगानांचोपाकरणादीनांयुगपदनुष्ठानंशक्यम्। अतस्तेषांसाहित्यमव्यवहितानुष्ठानात्संपाद्यम् तच्चैकस्योपाकरणंविधायापरस्योपाकरणंविधेयम्। एवंनियोजनादिकमपि॥ ऽवधानादितिनविप्रकर्षः तस्मान्मुख्यक्रमःप्रवृत्तिक्रमाद्बलवानिति इदानींप्रवृत्तिक्रमंलक्षयतिसहप्रयुज्येत्यादिनातत्रोदाहरणमाहयथेतिप्राजापत्यान्हि सेतिकर्तव्यताकाएककालत्वेनविहिताइत्यन्वयः अतइतितेषामेककालत्वेनविहितत्वादित्यर्थः तेषामितिप्राजापत्यानामित्यर्थः उपाकरणेत्यादिसूक्तार्थ एवबोध्यः तच्चेतिसाहित्यंचेत्यर्थः सम्प्रतिपन्नदेवताकत्वेनेत्यत्रसम्प्रतिपन्नदेवताकत्वेनेतिपाठः तत्कालत्वेश्वदेव्यनुष्ठानानंतरकालोदेवताचप्रजापतिस्तदंगानामितिप्राजापत्यांगानामित्यर्थः अशक्यमितिअनेकेषां॥ ६ ॥

पशूनां सुपाकरणं नियोजनं चैकस्मिन्काल एकेन कर्त्रा कर्तुमशक्यमित्यर्थः अत इति उपाकरणादीनां युगपदनुष्ठानादुपपत्तेरित्यर्थः तेषामिति उपाकरणा
दीनामित्यर्थः तच्चेति अव्यवधानेन साहित्यं चेत्यर्थः एवमेकस्य पशोर्नियोजनं विधाय परस्य पशोर्नियोजनं विधेयमित्यतिदिशति एवमिति प्राजापत्ये
ष्वेकस्य पदार्थस्य सर्वत्रानुष्ठेयत्वे यं पशुमारभ्यैकः पदार्थोऽनुष्ठितस्तमेव पशुमारभ्य द्वितीयादिः पदार्थोऽनुष्ठेय इत्याह तथा चेत्यादिना सोयमिति प्रवृ
त्तिक्रम इत्यर्थः आदिशब्देनार्थक्रमादयो गृह्यन्ते अत्रेदं बोध्यम् सप्तदश हि प्राजापत्या भवन्ति सप्तदश प्राजापत्यान्पशूनालभेतेति तन्न द्वयोस्तथैव श्रव
णात् तथा च प्राजापत्येषु तेषु यं कंचित्पशुमारभ्योपाकरणं सप्तदशसु पशुषु कृतं तमेव पशुमारभ्य नियोजनं कर्तव्यं एवं च तत्तत्पशूपाकरणानां तत्तत्पशु

तथा च प्राजापत्येषु कस्माच्चित्पशोरारभ्य एकं सर्वं सर्वत्रानुष्ठाय द्वितीयादिपदार्थः तेनैव क्रमेणानुष्ठेयः स प्रवृत्तिक्रमः। सोयं
श्रुत्यादिभ्यो दुर्बलः। तदेवं संक्षेपतो निरूपितः षड्विधक्रमनिरूपणेन प्रयोगविधिः। कर्मजन्यफलस्वाम्यबोधको विधिरधिका
रविधिः। कर्मजन्यफलस्वाम्यं कर्मजन्यफलभोक्तृत्वं। स च यजेत स्वर्गकाम इत्यादिरूपः। स्वर्गमुद्दिश्य यागं विदधताऽनेन स्वर्ग
कामस्य यागजन्यफलभोक्तृत्वं प्रतिपाद्यते। यस्याहिताग्नेरग्निर्गृहान्दहेत्सोऽग्नये क्षामवतेऽष्टाकपालं निर्वपेदित्यादिना
ग्निदाहादेर्निमित्ते कर्म विदधता निमित्तवतः कर्मजन्यपापक्षयरूपफलस्वाम्यं प्रतिपाद्यते॥ ॥ नियोजने त्वयं षोडशक्षणैर्व्यवधा

नं भवति तथा सति सप्तदश प्राजापत्यान्पशूनालभेतेत्युत्पत्तिवाक्ये वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्तीति प्रयोगवाक्ये च श्रुतसांगानां सप्तदश
पशुयागानां साहित्यमुपपद्यते अन्यथा तेष्वेकैकस्मिन् यथा वपाकरणानियोजनादिसर्वसंस्काराणां समापने प्रत्यक्षवचनावगतपशुसाहित्यं
बाधितं भवेदिति एवं निरूपितं षड्विधक्रमनिरूपणेन प्रयोगविधिमुपसंहरति तदेवमिति इदानीं क्रमप्राप्तमधिकारविधिं निरूपयति कर्मजन्येति
कर्मजन्यफलस्वाम्यपदं व्याचष्टे कर्मजन्यफलस्वाम्यमिति स चेति अधिकारविधिश्चेत्यर्थः अनेनेति यजेतेत्यनेन स्वर्ग ॥ ६ ॥ ६ ॥

दी॰ मि॰ ३८

कामइत्यादिवाक्येनेत्यर्थः तत्रोदाहरणांतरमाह यस्येति स्नामवइति स्नामवत्त्वगुणविशिष्टायेत्यर्थः निमित्तवत इति अग्निना गृहदाहादिरूपनिमित्तवतः पुरुषस्येत्यर्थः इत्यादिना कर्म विदधता विधिनेत्यन्वयः कर्मजन्येति अग्निदेवताककर्मजन्येत्यर्थः तत्रैवोदाहरणांतरमाह एवमितिशुचि विहितकालजीविन इति शौचविशिष्टत्वे सति विहितकालजीविन इत्यर्थः न चेति फलविधिबोधितचेत्यर्थः को ह्यधिकारो यद्धि शिष्टस्य पुंसः कर्मजन्यफलभोक्तृत्वरूपं फलस्वाम्यं विधिना बोध्यत इत्यत आह अधिकारश्चेति अत एवेति विधिवाक्येषु पुरुषविशेषणत्वेन श्रूयमाणस्याधिकारत्वादेवेत्यर्थः स्वाराज्यमुद्दिश्येत्यत्र राजसूयमितिशेषः राज्ञः सत इति क्षत्रियस्य सत इत्यर्थः तत्र हेतुमाह राजत्वस्येति श्रवणादिति राजा राजसूयेनेत्यत्र श्रवणादित्य

एवमहरहः संध्यामुपासीतेत्यादिना शुचिविहितकालजीविनः संध्योपासनजन्यप्रत्यवायपरिहाररूपफलस्वाम्यं चोद्यते। तच्च फलस्वाम्यं तस्यैव योधिकारविशिष्टः। अधिकारश्च यद्विधिवाक्येषु पुरुषविशेषणत्वेन श्रूयते। तथा काम्यकर्मणि फलकामना नैमित्तिके कर्मणि निमित्तनिश्चयः। नित्ये संध्योपासनादौ शुचिविहितकालजीवित्वम्। अत एवं राजा राजसूयेन स्वाराज्यकामो यजेतेत्यनेन विधिवाक्येन स्वाराज्यमुद्दिश्य विदधतापि न स्वाराज्यमात्रकामस्य तत्फलभोक्तृत्वं प्रतिपाद्यते। किंतु राज्ञः सतः स्वाराज्यकामस्यैव राजत्वस्यापि अधिकारिविशेषणत्वेन श्रवणात्॥

॥र्थः अत्र हि राजशब्देन क्षत्रिय एवोच्यते न तु राज्यसम्बन्धमात्रेण तदन्योपि तेन क्षत्रियस्यैव राजसूयेधिकारो न तु तदन्यस्य ब्राह्मणादेरित्यन्यत्र विस्तर इति भावः इदमत्र चिंत्यते दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति श्रूयते तत्र क्रियानिष्पादकत्वं कर्तृत्वं फलभोक्तृतया स्वामित्वमधिकारः तादृशोधिकारो यागकर्तुर्नास्ति कुतः फलभोगाभावात् तथा हि यजेतेत्यत्राख्यातेन भावनाभिधीयते तस्याश्च धात्वर्थो भाव्यः एकपदोपात्तत्वात् स्वर्गस्तु पदांतरोपात्तत्वाद्वाक्येन भाव्यतयान्वेतव्यः तच्च वाक्यमेकपदरू राम
पया श्रुत्या बाध्यते स्वर्गस्य भाव्यत्वाभावे सति गुणत्वमभ्युपेयं स्वर्गशब्दो नात्र सुखवाची किंतु सुखसाधनचंदनादिद्रव्यं ब्रूते लोके तथा व्यवहा ३८
रणात् तच्चेकामपि तु योग्यं तेन द्रव्येण विना यागानिष्पत्तेः तस्मादस्मिन्वाक्ये फलानभिधानेन तद्भोगाभावात्कर्तुर्योगे॥

कर्तृत्वमेव न त्वधिकार इत्यधिकारलक्षणं नारब्धव्यमिति प्राप्ते ब्रूमः यजेतेत्यत्र प्रत्ययस्य केवलमाख्यातरूपत्वमेवेति न च मंतव्यं किंतु लिङ्प्रत्ययत्वेन विधिरूपत्वमप्यस्ति तत्राख्यातत्वाकारेण भावनामाचष्टे विधित्वाकारेण पुरुषं प्रवर्तयति पुरुषश्च स्वाभिमतफलमंतरेण न प्रवर्तत इति तदपेक्षितं स्वर्गमेव भाव्यतया विधिरूपांशेन स्वर्गशब्दश्चोत्कृष्टे सुखे रूढः द्रव्ये तु लाक्षणिकः तस्मात्सुखस्य भाव्यत्वं विधिश्रुत्या सिद्धं धात्वर्थस्य तु भाव्यत्वमेकपदेन प्रतीयमानमपि प्रत्ययेन नावगम्यते किंतु प्रकृत्या तथा सति स्वर्गभाव्यत्वं भावनायां प्रत्यासन्नमेकेनैव विधिरूपेणाख्यातेनावगमात्कर्मयोगादपि स्वर्ग ---- स्यैव भाव्यत्वं तस्मात्फलभोगसंभवेन कर्तुरधिकारोस्तीत्यधिकारलक्षणमारब्धव्यमिति विधिवाक्येष्वश्रुतमपि किंचिदधिकारिविशेषणत्वेनान्यथानुपपत्त्या तत्क्रमाश्रयणेन व्यवहारोपपत्तिरित्याशयेनाह किंचित्त्विति तत्रोदाहरणमाह यथेति विधेन्यत्र विधिवाक्येष्वश्रुताप्यधिकारिविशेषणत्वेन तद्विशेषणमिति

क्वचित्तु पुरुषविशेषणत्वेनाश्रुतमप्यधिकारिविशेषणम्। यथाध्ययनविधिसिद्धाविद्याक्रतुविधीनामर्थज्ञानापेक्षणीयत्वेनाध्ययनविधिसिद्धार्थज्ञानवन्तं प्रत्येव प्रवृत्तेः। एवमग्निसाध्यकर्मसु आधानसिद्धाग्निमत्ताऽग्निसाध्यकर्मणामग्न्यपेक्षत्वेन तद्विधीनामाधानसिद्धाग्निमतं प्रत्येव प्रवृत्तेः ॥

शेषः तत्र हेतुमाह क्वचित्त्वित्यादिना तत्रैवोदाहरणांतरमाह एवमिति अग्निमतेत्यत्रापि पूर्ववदेव शेषो बोध्यः तत्रापि हेतुमाह अग्निसाध्येति तद्विधीनामिति अग्निसाध्यकर्मविधीनामित्यर्थः अनेन च निरुक्ताधिकारिविशेषणेन शूद्रस्य यागे नाधिकारो ध्वनितः तस्याध्ययनविधिसिद्धविद्याया अभावादाधानसिद्धाग्निमत्ताया अभावाच्च किंच अध्ययने ह्युपनीतस्यैवाधिकारात् उपनयनेपि चाष्टवर्षं ब्राह्मणमुपनयीतेत्यादिना त्रैवर्णिकस्यैवाधिकारविधानात् अग्न्याधानेपि वसंते ब्राह्मणोग्नीनादधीतेत्यादिना त्रैवर्णिकमात्रस्याधिकारविधानाच्च यद्यपि वर्षासु रथकारोग्नीनादधीतेत्यनेन रथकारस्य सौधन्वानापरनामकस्याग्न्याधानं विहितं योगाद्रूढेर्बलीयस्त्वात् तथापि नास्योत्तरकर्मस्वधिकारः तस्याध्ययनविधिसिद्धविद्याया अभावादित्यन्यत्र वि

लौं० इतिभावः ननुतत्र रथंकरोतीतिव्युत्पत्त्यात्रैवर्णिक एव रथकारो नतुशूद्रस्तत्राप्यधिकार इति चेन्न संकीर्णजातिविशेषे रथकारशब्दस्य रूढत्वात् तथाहि
मीं० वैश्यायांक्षत्रियादुत्पन्नो माहिष्यः शूद्रायांवैश्यादुत्पन्ना करणीति तस्यांकरण्यांमाहिष्यादुत्पन्नो रथकारः तथाचयाज्ञवल्क्यः माहिष्येण करण्यांतुरथ
३९ कारः प्रजायत इति तस्मान्नतादृशव्युत्पत्त्यात्रैवर्णिको रथकारशब्देन गृहीतुंशक्यत इति किंचकुत्रचिद्यागेपिकस्यचिच्छूद्रस्याधिकारो भवतिवास्तुमयं
रौद्रंचरुंनिर्वपेदिति प्रकृत्य एतयानिषादस्थपतिंयाजयेदितिश्रवणात् वास्तुशब्दः किंचित्प्रकृतिद्रव्यविशेषमाह एतस्यामिष्टावधिकारीनिषादस्थ
पतिशब्दवाच्यस्त्रैवर्णिक एवकुतः निषादानांस्थपतिरिति षष्ठीसमासस्यत्रैवर्णिके संभवात् तस्याध्यीतवेदत्वेन विद्यासंभवाच्चेतिप्राप्ते ब्रूमः नि

एवंसामर्थ्यमप्याख्यातानामर्थंब्रुवतांशक्तिः सहकारिणीतिन्यायात्समर्थंप्रत्येव विधिप्रवृत्तेः। तदेवंनिरूपितो विधिः। प्रयोग
समवेतार्थस्मारकामंत्राः। तेषांचतादृशार्थस्मारकत्वेनैवार्थवत्त्वम्। नतुतदुच्चारणमात्रादृष्टार्थम्। संभवतिदृष्टफलकत्वेऽदृष्टफ
लकल्पनाया अन्याय्यत्वात्। नचदृष्टस्यार्थस्मरणस्य प्रकारान्तरेणापिसंभवान्मंत्राम्नानंव्यर्थमितिवाच्यम्। मंत्रैरेवस्मर्तव्यमि
तिनियमविध्याश्रयणात्। नानासाधनसाध्यक्रियायामेकसाधनप्राप्तावप्राप्तस्यापरसाधनस्यप्रापको विधिर्नियमविधिः ॥१०॥

षादश्चासौस्थपतिश्चेति कर्मधारयसमासस्य मुख्यत्वान्नषष्ठीसमासेन त्रैवर्णिको निषादस्थपतिशब्दार्थः षष्ठीसमासेतु संकीर्णजातिविशेष
वाचिनानिषादशब्देन तत्सम्बन्ध उपलक्ष्येत नत्वयं कर्मधारये दोषोस्ति तस्मात्तात्कालिकाचार्योपदेशादिना विद्यांसंपाद्य धनिको निषादो रौद्रं
यागंकुर्यादिति राद्धान्तः अध्ययनविधिसिद्धविद्यादिवत्पुरुषसामर्थ्यमपि विधिवाक्येष्वश्रुतमप्यधिकारिविशेषणमित्याह एवमिति साम एम
र्थ्यमिति आज्यावेक्षणादिकंलौकिकंपुंसामर्थ्यमित्यर्थः वैदिकसामर्थ्यस्याध्ययनविधिसिद्धविद्यादेः पूर्वमेवोक्तत्वादित्यर्थः इदंचोक्तन्यायविनिग ३९
मकंसमुदाहरन् तत्र हेतुमाह आख्यातानामिति अनेनचविशेषणेनाधारेनधिकारो ध्वनितः॥

इदमत्र विचार्यते। अन्धः पंगुर्बधिरो मूको गवाश्वादयस्तिर्यंचइत्यादीनांचेतनत्वेन निरतिशयसुखरूपे स्वर्गे कामना संभवति अथोच्यते नकेषुचिदंगे
षुनेषां शक्तिर्नास्ति तथाहि अन्धो नाज्यमवेक्षितुं क्षमः पंगुर्विष्णुक्रमेष्वशक्तः बधिरो नाध्वर्युप्रोक्तं शृणोति तथा च क्लृप्तीर्वाचयतीति विहितस्यानुष्ठा
नेन सिध्येत् मूकोनुमन्त्रणादावसमर्थः तिर्यंचो बहुष्वसमर्था इति तन्न यथाशक्त्यंगानामनुष्ठेयत्वात् स्वर्गकामो यजेतेत्यनेन प्रधानवाक्येन सर्वाधिकारः प्रती
यते स चाज्यावेक्षणाद्यंगवाक्यानुसारेण न संकोचयितुं युक्तः किंतु प्रधानानुसारेणांगानुष्ठानमेव संकोचयितुं युक्तं तस्मादंधादेरप्यधिकार इति प्राप्ते ब्रूमः य
द्याज्यावेक्षणादयः पुरुषार्थतया विधीयेरंस्तदा तल्लोपेपि न क्रतोर्वैकल्यं इह तु क्रत्वंगतयैते विहिता इति तल्लोपे क्रतुरेव न निष्पद्येत तस्मादसमर्थस्य
नास्त्यधिकार इति सिद्धम्। किंच ज्योतिष्टोमे श्रूयते यद्युद्गातापच्छिद्येत अदक्षिणो यज्ञः संस्थाप्योऽथान्यस्याह॥तव्यस्तत्र तद्दद्याद्यत्पूर्वस्मिन्दास्यन्स्यात्
यदि प्रतिहर्तापच्छिद्येत सर्वस्वं दद्यादिति अस्यायमर्थः प्रातःसवने बहिष्पवमानेन स्तोष्यमाणा ऋत्विजः शालायाः बहिः प्रसर्पन्ति तदानीमेकस्य
पृष्ठतोऽन्य इत्येवं पिपीलिकावत्पंक्त्याकारेण गंतव्यं तत्र पुरतो गंतुः कच्छं गृहीत्वैव पृष्ठतोऽन्यो गच्छेत् एवं सति यदि प्रमादादुद्गाता गृहीतं कच्छं मुंचेत्तदा दक्षि
णामदत्वा प्रक्रांतो यज्ञः समापनीयः तं समाप्य पुनरपि स प्रयोक्तव्यः तस्मिन्प्रयोगे पूर्वं यद्दित्सितं द्रव्यं तद्दद्यात् यदा प्रतिहर्ता मुंचेत्तदा तस्मिन्नेव प्र
योगे सर्वस्वं दद्यादिति तत्र यद्युद्गातृप्रतिहर्तारौ युगपन्मुंचेतां तदानीमुक्तप्रायश्चित्तनिमित्तं विहन्यते एककर्तृको ह्यपच्छेदो निमित्तत्वेन श्रुतः अयं तूभ
यकर्तृकत्वान्नैकेन व्यपदेष्टुं शक्यते तस्माच्छ्रूयमाणस्य निमित्तस्य विहतत्वान्नास्ति प्रायश्चित्तमिति प्राप्ते ब्रूमः द्वयोर्ह्यत्रापच्छेदे न योरेकैकस्यैवैकैक
एव कर्तेति निमित्तस्य नास्ति विघातः कालमात्रैक्यादेकापच्छेदभ्रांतिः तस्मान्निमित्तविघाताभावादस्ति प्रायश्चित्तम्। किंच अदक्षिणत्वं सर्वस्वदक्षिण
त्वं चेति यत्प्रायश्चित्तद्वयं निमित्तभेदेन श्रुतं तन्निमित्तद्वयसन्निपाते समुच्चेतव्यं यद्य   दक्षिणत्वसर्वस्वदानयोरन्योन्यविरोधस्तर्हि प्रयोगभेदेन व्यव
स्थापनीयं अपच्छेदयुक्ते प्रथमप्रयोगे दक्षिणा न दातव्या उत्तरप्रयोगे सर्वस्वं दातव्यं सत्यपि प्रयोगभेदे कर्मण एकत्वात्समुच्चय इति प्राप्ते ब्रूमः न ह्यु
त्तरप्रयोगे पच्छेदो विद्यते न चासति निमित्ते प्रायश्चित्तं युक्तं तस्मान्न।

लौ० थमप्रयोग एव निमित्तद्वयवशात्प्रायश्चित्तद्वयप्राप्तं तत्त्वान्योन्यविरुद्धं विकल्प्यते किं च उद्गातृप्रतिहर्तृकर्तृकयोरपच्छेदयोर्यौगपद्ये समानबलत्वाद्
मी० नु प्रायश्चित्तयोर्विकल्पः यदा तु क्रमेणापच्छेदौ स्यातां तदानीमसंजातविरोधित्वेन पूर्वस्य प्रबलत्वाच्छ्रुतिलिंगादिवदुत्तरस्य प्रवृत्तिर्निरुध्यत इति चे
४० न्नैवं श्रुतिलिंगादावुत्तरस्य पूर्वसापेक्षत्वात्पूर्वेण निरोधे सत्युत्तरस्योत्पत्तिरेव नास्ति इह तु ज्ञानद्वयमन्योन्यनिरपेक्षं वाक्यद्वयादुत्पद्यत इत्युत्पत्तिप्रतिब
न्धो नास्ति उत्पद्यमानं चोत्तरज्ञानं स्वविरुद्धस्य पूर्वज्ञानस्य बाधेनैवोत्पद्यते ननु निरपेक्षत्वस्य समानत्वात्पूर्वज्ञानमेवोत्तरस्य बाधकमस्त्विति चेन्न पूर्व
ज्ञानोत्पत्तिदशायामविद्यमानस्योत्तरज्ञानस्य बाध्यत्वायोगात् उत्तरकाले तु स्वयमबाधितं पूर्वज्ञानं कथमुत्तरस्य बाधकं भवेत् न चान्यत्किंचिदुत्तरस्य बा
धकं पश्यामः तस्मादुत्तरकालीनापच्छेदनिमित्तप्रायश्चित्तमनुष्ठेयम् किं च यद्युद्गाता पश्चादपच्छिद्येत तदा तस्यापच्छेदस्य प्रबलत्वात्तन्निमित्तं प्राय
श्चित्तमनुष्ठेयं तच्च प्रायश्चित्तमीदृशं प्रथमप्रयोगं दक्षिणारहितमनुष्ठाय द्वितीयप्रयोगे पूर्वं दित्सिताद्दक्षिणादानमिति पूर्वं च गवां द्वादशाधिकं शतं दि
त्सितं तस्य ज्योतिष्टोमदक्षिणारूपेण विहितत्वात्तस्मादुत्तरप्रयोगे द्वादशशतं देयमिति प्राप्ते ब्रूमः प्रतिहर्तुः प्रथममपच्छेदे सति तन्निमित्तकं सर्वस्वदान
रूपं प्रायश्चित्तं प्रथम प्रयोगे प्राप्तं तेन च क्रतुस्वभावप्रयुक्तस्य द्वादशशतस्य बाधात्सर्वस्वं दित्सितं न चोद्गात्रपच्छेदेन पश्चाद्भाविना सर्वं दित्साबाध्यत इति
शंकनीयं बाधस्य दक्षिणान्तरस्यात्रानुक्तत्वात् यद्दित्सितं तदुत्तरप्रयोगे देयमित्येतावदेवात्रोच्यते दित्सितं च सर्वस्वमित्युक्तम् अत उत्तरकालीनोद्गात्रप
च्छेदनिमित्तेऽपि पुनः प्रयोगे पूर्वकालीनप्रतिहर्त्रपच्छेदप्रयुक्तं सर्वस्वमेव दातव्यमित्यादिकमर्थजातं निरूपणीयमभिप्रेत्य विधिनिरूपणमुपसंहरति तदे
वमिति तस्मिन्नतीते ग्रन्थ उक्तप्रकारेणेत्यर्थः ॥ यः सर्वकर्ता सकलात्मरूपश्चन्द्रार्कवह्नीक्षणकश्चिदात्मा सांबो हि सोमार्द्धविभूषणस्तं नौमि देवार्चित
पादपीठम् १ इदानीं मन्त्ररूपं वेदभागं निरूपयति प्रयोगेति तेषामिति मन्त्राणामित्यर्थः तादृशार्थेति प्रयोगसमवेतार्थेत्यर्थः अर्थवत्त्वमिति प्रयोजनवत्त्वमित्य
र्थः ननु मन्त्रोच्चारणस्यादृष्टार्थकत्वेनाप्युपपत्तेः कुतस्तेषां प्रयोगसमवेतार्थस्मारकत्वेनैव प्रयोजनवत्त्वमित्यत आह न त्विति तदुच्चारणमिति मन्त्रोच्चारण एम
मित्यर्थः तत्र हेतुमाह दृष्टफलकत्व इति तदुद्दिष्टस्य देवताद्यर्थस्मरणस्य ब्राह्मणवाक्यादिनापि संभवान्मन्त्रोच्चारणस्यादृष्टार्थकत्वानंगीकारे तत्समाम्नानस्य॥ ४०

वैयर्थ्यापत्तिरित्याशंक्य मंत्रैरेव सोऽर्थः स्मर्तव्य इति नियमविधिं भी कारान्त्रमंत्राम्नानस्य वैयर्थ्यमिति परिहरति न चेत्यादिना ननु किंलक्षणको नियमविधिर्यदाश्रयणादन्यस्यार्थस्मारकस्य व्यवच्छेदो लभ्यत इत्याशंक्य नियमविधिलक्षणमाह नानासाधनेति तत्र संमतिमाह यथाहुरिति तां व्याचष्टे अस्यार्थ इत्यादिना तत्रापि विधिरत्यंतमप्राप्ताविति प्रथमपादमपूर्वविधिपरं व्याचष्टे प्रमाणांतरेणेति प्रमाणांतरेणायदर्थत्वेनाप्राप्तस्य तदर्थत्वेन प्रापको यो विधिः सोऽपूर्वविधिरित्यर्थः तत्रोदाहरणमाह यथेति तस्यापूर्वविधित्वे हेतुमाह स्वर्गेति स्वर्गार्थकत्वेन प्रमाणांतरेणाप्राप्तस्य यागस्य तदर्थत्वेन यजेत स्वर्गकाम इत्यने

यथाहुः विधिरत्यंतमप्राप्तौ नियमः पाक्षिके सति। तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयत इति। अस्यार्थः। प्रमाणांतरेणाप्राप्तस्य प्रापको विधिरपूर्वविधिः । यथा यजेत स्वर्गकाम इत्यादिः। स्वर्गार्थकयागस्य प्रमाणांतरेणाप्राप्तस्यानेन विधानात्। पक्षेऽप्राप्तस्य प्रापको विधिर्नियमविधिः। यथा व्रीहीनवहंतीत्यादिः। कथमस्य पक्षेऽप्राप्तप्रापकत्वमिति चेदित्थम् अनेन ह्यवघातस्य वैतुष्यार्थत्वं न प्रतिपाद्यतेऽन्वयव्यतिरेकसिद्धत्वात्। किंतु नियमः। स चाप्राप्तांशपूरणम्। वैतुष्यस्य हि नानोपायसाध्यत्वाद्यदावघातं परित्यज्य उपायांतरं गृहीतुमारभेत तदाऽवघातस्याप्राप्तत्वेन तद्विधाननामकमप्राप्तांशपूरणमेवानेन विधिना क्रियते। अतश्च नियमविधावप्राप्तांशपूरणात्मको नियम एव वाक्यार्थः। पक्षेऽप्राप्तावघातस्य विधानमिति यावत्॥

॥न विधानाद्भवत्ययमपूर्वविधिरित्यर्थः नियमः पाक्षिके सतीति द्वितीयपादं प्रकृते संमतिरूपं व्याचष्टे पक्षेऽप्राप्तस्येति तत्रोदाहरणमाह यथेति ननु व्रीहीनवहंतीत्यस्यावघातविधेः कथं पक्षेऽप्राप्तस्यावघातस्य प्रापकत्वं स्वीक्रियते वैतुष्यार्थत्वेन प्रमाणांतरेणाप्राप्तस्य तस्य तदर्थत्वेनैव विधानोपपत्तेरित्याशंक्याने नहि विधिनावघातस्य वितुषतार्थत्वं न प्रतिपाद्यते तस्य तदर्थत्वेनान्वयव्यतिरेकसिद्धत्वात् अवघातादिसत्त्वे व्रीहीणां वैतुष्यं जायतेऽन
दसत्त्वे तदभाव इति सार्वजनीनमिति परिहरति कथमित्यादिना इत्थमिति॥

ना

लौ·भा· ४१

अनेनवक्ष्यमाणप्रकारेणेत्यर्थः ननु यवावघातादीनां सर्वेषामेवैतेषु ष्यार्थत्वमन्वयव्यतिरेकाभ्यां सिद्धं तद्वद्व्रीहीनवहन्तीत्यवघातविधेरन्वयव्यतिरेकसिद्धावघातप्रापकत्वेनवैयर्थ्यमेवापद्येतानुवादकत्वादित्याशंक्य नेति किं त्वितिनास्य विधेरनुवादकत्वेनवैयर्थ्यं संभवति नियमविधायकत्वेनाप्युपपत्तेरिति परिहरति नियम इति व्रीहीणां वैतुष्यमवघातेनैव संपादनीयमिति नियमः प्रतिपाद्यत इत्यर्थः ननु तादृशनियमप्रतिपादनेपि कीदृशो वाक्यार्थो भवतीत्यत आह स चेति स एवाप्राप्तांशपूरणरूपो नियमोत्रवाक्यार्थ इत्यर्थः ननु कथमत्राप्राप्तांशो लभ्यते यस्य पूरणेनास्य विधेः सार्थक्य

उभयोश्च युगपत्प्राप्तावितरव्यावृत्तिपरो विधिः परिसंख्याविधिः। यथा पंच पंचनखा भक्ष्या इति। इदं हि वाक्यं न पंचनखभक्षणपरं तस्य रागतः प्राप्तत्वात्। नापि नियमपरं पंचनखापंचनखभक्षणस्य युगपत्प्राप्तेः पक्षे प्राप्त्यभावात्। अत इदमपंचनखभक्षणनिवृत्तिपरमिति भवति परिसंख्याविधिः। सा च द्विविधा। श्रौती लाक्षणिकी चेति। तत्रात्र ह्येवावपन्तीति श्रौती परिसंख्या एवकारेणापवमानातिरिक्तस्तोत्रव्यावृत्तेरभिधानात्। पंच पंचनखा भक्ष्या इति तु लाक्षणिकी। इतरनिवृत्तिवाचकपदाभावात्। अत एवैषा त्रिदोषग्रस्ता। दोषत्रयं च श्रुतहानिरश्रुतकल्पना प्राप्तबाधश्चेति। तदुक्तं। श्रुतार्थस्य परित्यागादश्रुतार्थप्रकल्पनम्। प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदूषणा इति श्रुतस्य पंचनखभक्षणस्य हानात् अश्रुतापंचनखभक्षणनिवृत्तेः कल्पनात्प्राप्तस्य चाऽपंचनखभक्षणस्य बाधनादिति। अस्मिंश्च दोषत्रये दोषद्वयं शब्दनिष्ठम्। प्राप्तबाधस्त्वर्थनिष्ठ इति दिक्॥

मित्यतोत्राप्राप्तांशपूरणरूपमेव वाक्यार्थमुपपादयति वैतुष्येत्यादिना उपपादितमप्राप्तांशपूरणरूपं वाक्यार्थमुपसंहरति अतश्चेति अस्य विधेरप्राप्तांशपूरणरूपनियमप्रतिपादकत्वाच्चेत्यर्थः पर्यवसितार्थमाह पक्ष इति यावदिति पर्यवसन्नमित्यर्थः तत्र चेत्याद्युत्तरार्द्धं परिसंख्याविधिपरं व्याचष्टे उभयोश्चेति तत्रोदाहरणमाह यथेति अस्यात्यन्तमप्राप्तविधित्वरूपमपूर्वविधित्वमाशंक्य निराचष्टे इदं हीति तत्र हेतुमाह तस्येति पंचनखभक्षणस्येत्यर्थः अस्य वाक्यस्य नियमविधि॥

राम· ४१

त्वमपि निराचष्टे नापीति तत्रापि हेतुमाह पंचनखेति अत इति विधिद्वयासंभवादित्यर्थः इदमिति पंच पंचनखा भक्ष्या इति वाक्यमित्यर्थः अपंचनखभक्षणनिवृत्तिस्तु न केनापि प्राप्तातश्च न हि धायकत्वेन नास्य वाक्यस्यानुवादकत्वमपि तथा च सैवात्र वाक्यार्थ इति भावः सा च परिसंख्या द्विविधेत्याह सा चेति तत्राद्यामुदाहरति तत्रेति द्वयोः परिसंख्ययोर्मध्य इत्यर्थः अत्रेति प्रकृत इत्यर्थः अवयंतीति अवजानंतीत्यर्थः गायंतीति यावत् श्रौत्याः परिसंख्यायास्तत्त्वे हेतुमाह एवकारेणेति द्वितीयामुदाहरति पंचेति पंच पंचनखा भक्ष्या इति पंच पंचनखा भक्ष्या ब्रह्मक्षत्रेण राघव शशकः शल्लकी गोधा खड्गी कूर्मो यश्च पंचम इत्यादि वचनोदाहृता बोध्याः अस्या अपि तत्त्वे हेतुमाह इतरनिवृत्तीति अत एवेति इतरनिवृत्तिवाचकपदाभावादेवेत्यर्थः एषु निलाक्षणिकीत्व

येषां तु प्रयोगसमवेतार्थस्मारकत्वं न संभवति तदुच्चारणस्यानन्यगत्याऽदृष्टार्थकत्वं कल्प्यते इति नानर्थक्यमिति। नामधेयानां च विधेयार्थपरिच्छेदकतयाऽर्थवत्त्वम्। तथा हि उद्भिदा यजेत पशुकाम इत्यत्रोद्भिच्छब्दो यागनामधेयं तेन च विधेयार्थपरिच्छेदः क्रियते। तथा हि अनेन वाक्येनाप्राप्तत्वात् फलोद्देशेन यागो विधीयते। यागसामान्यस्याविधेयत्वात् यागविशेष एव विधीयते। तत्र कोऽसौ यागविशेष इत्यपेक्षायामुद्भिच्छब्दादुद्भिद्रूपो याग इति विज्ञायते उद्भिदा यागेन पशुं भावयेदित्यत्र सामानाधिकरण्येन नामधेयान्वयात्॥

र्थः दोषत्रयं प्रदर्श्य निर्दोषत्रयं चेति तत्र श्रुतहानौ हेतुमाह श्रुतस्येति अश्रुतकल्पनायां हेतुमाह अश्रुतेति प्राप्तस्य बाधेऽपि हेतुमाह प्राप्तस्येति रागतः प्राप्तस्येत्यर्थः अस्य दोषत्रयस्य व्यवस्थया वृत्तित्वमाह अस्मिंश्चेति दोषत्रयमध्य इत्यर्थः ननु कथं सर्वेषां मंत्राणां प्रयोगसमवेतार्थस्मारकत्वेनैवार्थवत्त्वमुपपद्यते हुंफडादिमंत्राणां प्रयोगसमवेतार्थस्मारकत्वासंभवादित्याशंक्याह येषामित्यादिना तदुच्चारणस्येति हुंफडादिमंत्रोच्चारणस्येत्यर्थः अनन्यगत्याऽदृष्टार्थत्वमित्यत्राऽदृष्टार्थत्वमिति पदच्छेदः इति नानर्थक्यमिति अतो हेतोर्हुंफडादिमंत्राणां नानर्थक्यमित्यर्थः मंत्रभागस्य यथाऽर्थप्रयोजनवत्त्वमुपपाद्येदानीं क्रमप्राप्तं नामधेयानां सार्थक्यमुपपादयति नामधेयानामिति ॥ ७ ॥ ८ ॥ ६ ॥

तिविधेयार्थपरिच्छेदकतयेति विजातीयव्यावर्तकत्वेन विधेयार्थनिश्चायकतयेत्यर्थः विधेयार्थस्यैव समर्थकतये नियावत् एतदेवं प्रदर्शयति त
थाहीत्यादिना तेनेति उद्भिच्छब्देनेत्यर्थः उद्भिच्छब्दस्य विधेयार्थपरिच्छेदकतया नामधेयत्वप्रदर्शनाय भूमिकामारचयति तथाहीत्यादिना अनेनेति
॥ उद्भिदा यजेत पशुकाम इत्यनेनेत्यर्थः फलोद्देशेनेति पशुरूपफलोद्देशेनेत्यर्थः यागेति साधनत्वेन लक्षणामन्तरेण फलत्वेन लक्षणानुपपत्तेरत्र यागसा
मान्यं विधीयते न तस्य यागविशेष एव विधीयत इत्यर्थः तत्रेति यागविशेषस्य विधेयत्व इत्यर्थः क इति कोसौ यागविशेष इति यागविशेषापेक्षायामित्य
र्थः उद्भिच्छब्दादुद्भिद्रूपो याग इति विज्ञायत इति उद्भिच्छब्दात्पुनरुद्भिन्नामको यो यागः स एवात्र यागविशेष इति विज्ञायत इत्यर्थः एवं च सिद्धमुद्भिच्छब्दस्य धा
त्वर्थसामानाधिकरण्येनान्वयं फलितमाह उद्भिदेति न तूद्भिच्छब्दस्य नीलमुत्पलमिव नीलपदस्योत्पलपदसामानाधिकरण्यवद्यतिसामानाधिकरण्यं भ
वेत्किं नामधेयत्वेनेति चेन्न वैषम्यात् तथा हि तत्र हि नीलपदस्यार्थो नीलगुण उत्पलपदार्थादुत्पलरूपद्रव्यादतिरिक्तो भवति लक्षणया तु नीलपदस्य
तादृशद्रव्यपरत्वेनोत्पलपदसामानाधिकरण्यमुपपद्यते उद्भिच्छब्दस्य तु यज्यवगतयागविशेषान्नातिरिक्तोर्थोस्ति तस्यैव तत्र विशेषत्वसमर्पकत्वात् तत
श्चार्थान्तरवाचकत्वाभावेनोद्भिच्छब्दस्य नीलशब्दस्योत्पलशब्दसामानाधिकरण्यवद्यतिसामानाधिकरण्यमुपपद्यते किं तर्हि वैश्वदेव्यामिक्षेत्य
त्रामिक्षापदस्य वैश्वदेवीशब्दसामानाधिकरण्यवत् वैश्वदेवीशब्दस्य हि देवतातद्धितत्वात् तस्य च सास्य देवतेति सर्वनामार्थस्मरणात् सर्वना
म्नां चोपस्थितविशेषवाचित्वेन विशेषपरत्वं तत्र कोसौ वैश्वदेवीशब्दोपात्तो विशेष इत्यपेक्षायां आमिक्षापदसंनिधानादामिक्षारूपो विशेष इत्यव
गम्यते यथाहुः आमिक्षां देवतायुक्तां वदन्त्येवैष तद्धितः आमिक्षापदसान्निध्यादस्यैव विषयार्पणमिति तस्माद्यथा वैश्वदेवीशब्दोपात्तविशेषसम
र्पकत्वेनामिक्षापदस्य वैश्वदेवीशब्देन सामानाधिकरण्यमेवं सामान्यस्याविधेयत्वाद्यज्यवगतयागविशेषसमर्पकत्वेनैवोद्भिच्छब्दस्य यजि
सामानाधिकरण्यमित्युक्तप्रकारेणैव नामधेयानामन्वयः साधुरिति तथा चोक्तं तद्धानत्वाद्यागविशेषसिद्धेरिति निमित्तचतुष्टयाद्भवतीत्याह ॥
॥ ॥ ॥

नामधेयत्वं चेति निमित्तचतुष्टयं निर्दिशति मत्वर्थेत्यादिना तत्राद्यनिमित्तविषयमुदाहरति तत्रोद्भिदा यजेतेति तत्रेति चतुर्षु मध्य इत्यर्थः अत्र मत्वर्थलक्ष
णापत्तिप्रदर्शनाय तावद्वाक्यभेदमापादयति न तावदिति अस्मिन्पक्षे उद्भिद्यते भूमिरनेनेति व्युत्पत्त्या खनित्रवाच्यसावुद्भिच्छब्दो भवेत्तथा चोद्भिदा यजेत प
शुकाम इत्यनेन वाक्येन यागेन पशुं भावयेद्यागं च खनित्रेण भावयेदिति फलं प्रति यागविधानं यागं प्रति च गुणविधानं क्रियेत तच्च न युज्यत इत्यर्थः तत्र हे
तुमाह वाक्येति आवृत्तिरूपवाक्यभेदापत्तेरित्यर्थः नन्वनेन वाक्येन खनित्ररूपो गुण एव विधीयते दध्ना जुहोतीत्यनेन गुणविधिना समानत्वात् न चात्र प
शुफलकः कश्चिद्यागो विधीयत इति वाच्यम् पशूनां गुणफलत्वात् यथा गोदोहनेन पशुकामस्येत्यत्र पशवो गोदोहनगुणस्य फलं तथेह खनित्रगुणस्य फल

नामधेयत्वं च निमित्तचतुष्टयात्। मत्वर्थलक्षणाभयाद्वाक्यभेदभयात्तत्प्रख्यशास्त्रात्तद्व्यपदेशादिति। तत्रोद्भिदा यजेत पशुकाम इ
त्यत्रोद्भिच्छब्दस्य यागनामधेयत्वं मत्वर्थलक्षणाभयात्। तथा हि न तावदनेन वाक्येन फलं प्रति यागविधानम् तं प्रति च गुणविधानं
युज्यते वाक्यभेदापत्तेः। उद्भिच्छब्दस्य गुणसमर्पकत्वे च यागस्याप्राप्तत्वात् गुणविशिष्टकर्मविधानं वाच्यम्। उद्भिद्वता यागेन प
शुं भावयेदिति विशिष्टविधौ मत्वर्थलक्षणेत्युक्तमेव॥ ॥मस्तु यदि चमसेनापः प्रणयनीति विहितं प्रकृतमपां प्रणयनमाश्रित्य गोदोहनं विधीयते तेन
तथात्रापि ज्योतिष्टोमेन यजेतेति विहितं प्रकृतं ज्योतिष्टोममाश्रित्य खनित्रं विधीयतां तस्माद्गुणविधिरित्याशंक्य पशुकामो यजेतेत्यस्य पदद्वयस्यायमर्थः
पशुरूपं फलं यागेन कुर्यादिति तत्र केन यागेनेत्यपेक्षायां उद्भिदेति तृतीयान्तं पदं यागनामत्वेनान्वेति उद्भिद्यते पशुफलमनेन यागेनेति निरुक्त्या नामत्व
मुद्भिच्छब्दस्योपपद्यते न चैवमपि गुणविधिनामधेयत्वयोः शब्दनिर्वचनसाम्यात्तन्निर्णय इति वाच्यम् सामानाधिकरण्यस्यानिर्णायकत्वात् तथा हि
उद्भिन्नामकेन यागेन पशुरूपं फलं कुर्यादित्युक्ते सामानाधिकरण्यं लभ्यते गुणविधित्वे तु खनित्रेण साध्यो यो यागस्तेन तादृशफलं कुर्यादित्यै
वैयधिकरण्यं स्यात् तच्चायुक्तम् किं च नानेन वाक्येन ज्योतिष्टोमे खनित्ररूपो गुणो विधातुं॥

लौ० मी० ४३

शक्यं तेन तस्य सोमेन यजेतेत्युत्पत्तिशिष्टसोमरूपगुणावरुद्धत्वात् किंच यद्यस्योद्भिच्छब्दस्य खनित्ररूपगुणसमर्पकत्वं स्वीक्रियेत तदा यत्र तेन गुणः समर्पणीयस्तादृशकर्मणोऽप्राप्तत्वात्तेन वाक्येन खनित्ररूपगुणविशिष्टकर्मविधानमेव वक्तव्यमन्यथा वाक्यभेदप्रसंगात् ततश्चोद्भिच्छब्दार्थरूपखनित्रवता यागेनेति सामानाधिकरण्येनान्वयो भविष्यति तथा च मत्वर्थलक्षणापत्तिरिति परिहरति उद्भिच्छब्दस्येत्यादिना उक्तमेवेति सोमेन यजेतेति विध्यर्थनिरूपणप्रस्ताव इति शेषः इदानीं द्वितीयं वाक्यभेदप्रसंगरूपं नामधेयत्वस्य निमित्तमुदाहरणद्वारा प्रदर्शयति चित्रया यजेतेति वाक्यभेदसंबोपपादयति तथाहीत्यादिना अत्रेति चित्रया यजेत पशुकाम इत्यस्मिन्वाक्य इत्यर्थः गुणविशिष्टेति चित्राशब्दार्थभूतचित्रवर्णककिंचिद्गुणविशिष्टेत्यर्थः अत्र विशिष्टविधानासंभवे हेतुमाह दधीत्यादिना तत्संसृष्टं प्राजापत्यमितीति तैर्दध्यादिभिर्द्रव्यैर्युक्तं प्रजापतिदेवताकं कर्मेत्यर्थः तद्विशिष्टेति निरुक्त

चित्रया यजेत पशुकाम इत्यत्र चित्राशब्दस्य कर्मनामधेयत्वं वाक्यभेदभयात्। तथा हि न तावदत्र गुणविशिष्टयागविधानं संभवति। दधि मधु पयो घृतं धाना उदकं तंडुलाः तत्संसृष्टं प्राजापत्यमित्यनेन गुणस्य विहितत्वात् तद्विशिष्टयागविध्यनुपपत्तेः। यागस्य फलसंबंधे गुणसंबंधे च विधीयमाने वाक्यभेदः॥

गुणविशिष्टेत्यर्थः दधीत्यादिप्रकृतवाक्यस्यैतत्कर्मणोत्पत्तिवाक्यत्वादस्य कर्मण उत्पत्तिशिष्टदध्यादिगुणावरुद्धत्वान्न तत्र गुणांतरं विधातुं शक्यत इति भावः अत्र दध्यादिवाक्ये दध्यादीनि षडेव द्रव्याणि श्रुतान्याम्नातानि उदकपदं तु प्रमादादायातं श्रुतितात्पर्यज्ञैर्माधवाचार्यैस्तथैवास्य वाक्यस्य व्याख्यातत्वात् तथा च तद्वचनं दध्यादीनि विचित्राणि देयद्रव्याणि षडाम्नातानीति नन्वत्र वाक्येनोत्पत्तिवाक्यसिद्धस्वरूपस्य यागस्य पशुरूपफलसम्बन्धो विचित्रद्रव्यरूपगुणसम्बन्धश्च विधीयते तेन तत्र न कर्मनामधेयत्वं चित्राशब्दस्येत्याशंक्याह यागस्येति तथा च यागेन पशुं भावयेद्यागं च तादृशगुणेन भावयेदिति यागस्य गुणफलोभयसम्बन्धे विधीयमाने सत्यावृत्तिलक्षणो वाक्यभेदो दुर्वार इति भावः उपपादितं वाक्यभेदप्रसंगमुपसंहरति॥ श्री०॥

राम ४३

तस्मादिति सिद्धे चित्राशब्दस्य कर्मनामधेयत्वे वाक्यं योजयति तथा चेति सामानाधिकरण्येनेति यजिधात्वर्थयागसामानाधिकरण्येन नामधेयस्यान्वया
च्चित्रानामकेन यागेन पशुं भावयेदित्याकारकान्वनिरुक्तवाक्यभेदापत्तिरित्यर्थः अनेकद्रव्यत्वेनेति दध्यादिविचित्रानेकद्रव्यसाध्यत्वेनेत्यर्थः ननु चित्रा
शब्दाच्चित्रत्वस्त्रीत्वयोः प्रतिपत्तेः स्त्रीत्वस्य च स्वभावतः प्राणिधर्मत्वात्प्रकृते दध्यादिद्रव्यके कर्मणि निवेशासंभवात् नानेन वाक्येन प्रकृते कर्मणि ता
दृशगुणविधानं क्रियते किंतु प्राणिद्रव्यके कर्मणि अनारभ्याधीतानां चागानां प्रकृतिमात्रे प्रवेशांगीकारात् चित्रावाक्यस्याप्यनारभ्याधीतत्वात्सर्वपशुया
गप्रकृतिभूते प्राणिद्रव्यके ग्नीषोमीये कर्मणि तेन गुणो विधीयते तथा चाग्नीषोमीयं पशुमालभेतेति विहितपशुयागमत्र वाक्ये यजेतेति पदेनानूद्यतत्रचि

तस्माच्चित्राशब्दः कर्मनामधेयम्। तथा च चित्रायागेन पशुं भावयेदिति सामानाधिकरण्येनान्वयात् न वाक्यभेदः। प्रकृते ष्टेर
नेकद्रव्यत्वेन चित्रा शब्दवाच्यत्वोपपत्तिः। अग्निहोत्रं जुहोतीत्यत्राग्निहोत्रशब्दस्य कर्मनामधेयत्वं तत्प्रख्यशास्त्रात्। तस्य गुणस्य
प्रख्यापकस्य प्रापकस्य शास्त्रस्य विद्यमानत्वात् अग्निहोत्रशब्दः कर्मनाधेयमिति यावत्। नन्वयं गुणविधिरेव कुतो नेति चे
त्। यद्यग्नौ होत्रमस्मिन्निति सप्तमीसमासमाश्रित्य होमाधारत्वेनाग्निरूपो गुणो विधेयस्तदा यदाहवनीये जुहो
त्यनेनैवाग्नेः प्राप्तत्वात्तद्विधानानर्थक्यम्। अग्नये होत्रमिति चतुर्थीसमासमाश्रित्य अग्निदेवतारूपगुणोऽनेन विधीयत इति चेन्न।

त्रापदेन चित्रत्वस्त्रीत्वरूपौ गुणौ विधीयेते इति चेन्न चित्रत्वेन स्त्रीत्वेन च तं भावयेदिति द्वयोर्गुणयोर्विधाने वाक्यभेदप्रसंगात् प्राप्ते कर्मण्यनेकगुणवि
धाने वाक्यभेदप्रसंगस्य सर्वसंमतत्वात् तथा चोक्तम् प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः अप्राप्ते तु विधीयेरन् बहवोऽप्येकयत्नत इति चेन्न गौरवल
क्षणवाक्यभेदप्रसंगात् किंच दध्यादिवाक्यं प्रकृतेमस्य चित्रानामकस्य यागस्योत्पत्तिवचनं भवति यागस्वरूपभूतयोर्दध्यादिद्रव्यप्रजापतिदेव
तयोरत्रोपदिश्यमानत्वात् उत्पन्नस्य च तस्य यागस्य चित्रया यजेत पशुकाम इत्येतत्फलवाक्यमनया गस्य फलसंबन्धबोधनात् एवं च सति प्र

लौ० कृतार्थो लभ्येत अग्नीषोमीयपश्वनुवादेन तादृशगुणविधाने तु प्रकृतहानप्रकृतप्रक्रियेप्रसज्येयातां लिङ्प्रत्ययस्य चानुवादकत्वांगीकारान्मुख्यो वि
मि० ध्यर्थो बाध्येत तस्माच्चित्रापदं नामधेयमेव न गुणविधिरिति ध्येयम् इदानीं तत्प्रख्यशास्त्ररूपात्तृतीयनिमित्तान्नामधेयत्वमग्निहोत्रशब्दस्य प्रदर्शयति अ
४५ ग्निहोत्रमिति तत्प्रख्यं चान्यशास्त्रमिति निर्दिष्टतत्प्रख्यशा स्त्रस्वरूपं तस्य फलितार्थमाह तस्येत्यादिना नन्वग्निहोत्रं जुहोतीत्यत्राग्निरूपस्य गुणस्यैव विधिने
नामधेयत्वमग्निहोत्रशब्दस्य स्वीकर्तव्यमित्याशंकते नन्वयमिति यद्यत्र सप्तमीसमासमाश्रित्य होमाधारत्वेनाग्निरूपस्य गुणस्य विधानं स्वीक्रियते तेन दानद्या
धारत्वेनाग्निरूपस्य गुणस्य वाक्यान्तरेण प्राप्तत्वात्तत्त्वेन तद्विधानस्यानर्थक्यमापद्येतेत्याह यद्यग्नाविन्यादिना चतुर्थीसमासमाश्रित्याग्निर्देवतारूप
स्य गुणस्य विधानमाशंकते चतुर्थीत्यादिना नात्र देवतारूपेणाग्निरूपस्य गुणस्य विधानमुपपद्यत इति समाधत्ते नेति तत्र हेतुमाह न देवताया इति अग्नि

न देवतायाः शास्त्रान्तरेण प्राप्तत्वात्। किं तच्छास्त्रान्तरमिति चेत्। यदग्नये च प्रजापतये च सायं जुहोतीति केचित्। अपरे त्वग्निर्ज्यो
तिर्ज्योतिरग्निः स्वाहेति मंत्रवर्ण एवाग्निरूपदेवताप्रापकः। नन्वग्नेर्मांत्रवर्णिकत्वे प्रजापतिदेवताया बाधः स्यात्। मंत्रवर्णस्य च
तुर्थीतो दुर्बलत्वात्। यथाहुः। नहि तेन चतुर्थ्या च मंत्रवर्णेन वा पुनः। देवताया विधिस्तत्र दुर्बलं तु परं परमिति चेन्न॥ ७॥ ॥

स्त्रं तच्छब्दार्थः देवतारूपेणाग्निप्रापकं शास्त्रं पृच्छति किमिति केषांचिन्मतानुसारेणोत्तरमाह यदग्नये चेति अत्राग्निर्ज्योतिरित्यादिमंत्रवर्णप्राप्तमग्निम
नूद्य तत्समुच्चितप्रजापतिमात्रविधाने लाघवं न तूभयसमुच्चितस्यैवात्र विधाने गौरवमिति न समुच्चितोभयविधानं यदग्नये च प्रजापतये च सा
यं जुहोतीत्यत्र स्वीकर्तव्यमित्यस्वरसबीजं केचिदित्यनेन सूचितम् अधुना सिद्धान्तमतेनोत्तरमाह अपरे त्विति किंच अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहे
ति सायं जुहोतीति विहितेनेमं त्रेण प्राप्तमग्निमनूद्य तत्समुच्चितस्य प्रजापतेर्यदग्नये च प्रजापतये च सायं जुहोतीत्यत्र सायंकालेऽग्निहोत्रे राम
देवतात्वं विधीयते सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातर्जुहोतीति विहितेन च मंत्रेण प्राप्तसूर्यमनूद्य तत्तत्समुच्चितस्य च तस्य यत्सूर्या ४४

जापतयेचप्रातर्जुहोतीत्यत्रप्रातःकालेऽग्निहोत्रदेवतात्वंविधीयतेतेनाग्नेर्मान्त्रवर्णिकत्वेप्रजापतिविधेरेकेनैववाक्येनसिद्धेर्यदग्नयेचप्रजापतयेचसायंजु
होतियत्सूर्यायचप्रजापतयेचप्रातर्जुहोतीत्यत्रवाक्यद्वयंव्यर्थमितिनिरस्तंसायंहोमेऽग्निसमुच्चितस्यप्रजापतेर्विधानंप्रातर्होमेसूर्यसमुच्चितस्यचतस्यै
केनवाक्येनकर्तुमशक्यत्वादित्यलंविस्तरेणाधिकंतुन्यायप्रकाशेद्रष्टव्यमन्नन्वग्नेर्मान्त्रवर्णिकत्वेप्रजापतिनातस्यबाधःस्यात्प्रजापतेश्चतुर्थ्यादेवतारूपे
णप्राप्तत्वेनप्रबलत्वात् अग्नेस्तुमंत्रवर्णप्राप्तत्वेनदुर्बलत्वाच्चनचसास्यदेवतेतितद्धितप्रत्ययस्यदेवतात्वेस्मरणवच्चतुर्थीनदेवतात्वंस्मर्यतेसंप्रदानेचतु
र्थीतिसंप्रदानमात्रेनस्याःस्मरणात् तस्मात्प्रजापतिनाकथमग्नेर्बाधःस्यादितिवाच्यमुत्सृज्यमानद्रव्योद्देश्यत्वेसतिप्रतिग्रहीतृत्वस्यसंप्रदानपदार्थत्वेनत्यज्यमा
नद्रव्योद्देश्यत्वरूपस्यदेवतात्वस्यसंप्रदानस्वरूपांतर्गतत्वात्ततश्चचतुर्थीतःसंप्रदानैकदेशतयादेवतात्वप्रत्ययोभवत्येव मंत्रवर्णात्तुनदेवतात्वप्र
प्रतीतिरस्तिकिंत्वधिष्ठानत्वमेवततः प्रतीयतेतस्मान्मंत्रवर्णश्चतुर्थीतोदुर्बलएवतथाचप्रबल प्रमाणबोधितप्रजापतिदेवतायादुर्बलप्रमाणबोधिता
ग्नेर्बाधोदुर्वारएवेत्याशयेनाशंकतेनन्विति तत्रसंमतिमाहयथाहुरिति तत्रेतितद्धितादिषुत्रिषुमध्यइत्यर्थः परमिति तद्धितापेक्षयाचतुर्थ्यादौर्बल्यं
चतुर्थ्यपेक्षयाचमंत्रवर्णस्यदौर्बल्यंभवतीतिपरंपरंदुर्बलंबोध्यमित्यर्थः ततःपरमितिपाठेतुततस्ततःपरंदुर्बलंप्रमाणमिति वीप्सापरत्वेनव्या
ख्येयम् यदिचप्रजापतयेजुहोतीतिकेवलप्रजापतिविधानंस्यात्तदातुभवेदपिप्रजापतिनाग्नेर्बाधः परंतुनतथाविधानंक्रियतइतिपरिहरति ॥

यदग्नये चेत्यादिना प्रजापतेरित्यत्र विधानमित्यस्यानुषंगः एवं चेति मंत्रवर्णप्राप्तमग्निमनूद्य तत्समुच्चितस्य प्रजापतेर्विधाने चेत्यर्थः न बाध इति तत्प्रजापतिनाग्नेर्बाध इत्यर्थः तत्र हेतुमाह केवलेति न तु यदग्नये च प्रजापतये चेत्यस्मिन्वाक्ये होमानुवादेन समुच्चितस्यैवोभयस्य विधानं क्रियत इति कथनस्यैव क्रियत इत्याशंक्य तयोः समुच्चितयोर्विधानापेक्षया मंत्रवर्णतः प्राप्तमग्निमनूद्य लाघवेन तत्समुच्चितप्रजापतेर्विधानमेवोचितमिति परिहरति न चेत्यादिना तत्प्रख्यशास्त्रान्नामधेयत्वे तूदाहरणांतरमाह एवमिति समिदादिशब्दा इत्यत्रादिपदेन तनूनपातादयः शब्दा गृह्यंते इडा

यदग्नये च प्रजापतये च सायं जुहोतीत्यत्र न केवलं प्रजापतिविधानम्। किंतु मंत्रवर्णप्राप्तमग्निमनूद्य तत्समुच्चितप्रजापतेः ॥ एवं च न बाधः केवलप्रजापतिविधानाभावात्। न चात्र समुच्चितोभयविधानमेव कथं नेति वाच्यम्। समुच्चितोभयविधानापेक्षयाऽन्यतः प्राप्तमग्निमनूद्य तत्समुच्चितप्रजापतिमात्रविधाने लाघवात्। एवं च प्रयाजेषु समिदादिदेवतानां समिधः समिधो अग्न आज्यस्य व्यंत्वित्यादिमंत्रवर्णेभ्यः प्राप्तत्वात्। समिधो यजतीत्यादिषु समिदादिशब्दास्तत्प्रख्यशास्त्रात्कर्मनामधेयाः। श्येनेनाभिचरन्यजेतेत्यत्र श्येनशब्दस्य कर्मनामधेयत्वं तद्व्यपदेशात्। तद्व्यपदेशादुपमानात्तदन्यथानुपपत्तेरितियावत्। तथाहि यद्विधेयं तस्य स्तुतिर्भवति। यद्यत्र श्येनो विधेयः स्यात् तदार्थवादेस्तस्यैव स्तुतिः कार्या। यथा वै श्येनो निपत्यादत्ते एवमयं द्विषंतं भ्रातृव्यं निपत्यादत्त इत्यनेनार्थवादेन श्येनः स्तोतुं न शक्यः। श्येनोपमानेनार्थांतरस्तुतिः क्रियमाणत्वात्।

तीं चतुर्थं निमित्तं तद्व्यपदेशरूपेण श्येनशब्दस्य कर्मनामधेयत्वं प्रदर्शयति श्येनेनेति कर्मनामधेयत्वमिति नन्वत्र श्येनशब्दस्य कर्मनामधेयत्वं न भवति किंतु सोमयागे नित्यं सोमद्रव्यबाधित्वात्सस्यानेपसिद्धद्रव्यरूपो गुणः काम्यो विधीयते तथा सति श्येनशब्दस्य पक्षिणि लोकप्रसिद्धा रूढिः स्यादु- श्ये॰
पपन्ना भवतीत्याशंक्य श्येनशब्दस्य कर्मनामधेयत्वे हेतुमाह तद्व्यपदेशादिति तद्व्यपदेशशब्दं व्याचष्टे श्येनेनेति श्येनेनेत्यर्थः तदिति उपमानोपमेयभावस्य ॥ ४५

दितत्वादेवार्थवादवाक्यश्येनोपमानेनविधेयस्तुतेः श्येननामककर्मविशेषं विनानुपपत्तेर्नात्र पक्षिद्रव्यरूपो गुणो विधातुं शक्यत इति भावः तदन्यथानु
पपत्तिमेवोपपादयति नथाहीत्यादिना तदिति विधेयस्य स्तुतेः कर्तव्यत्वादित्यर्थः अत्रेति श्येनेनाभिचरन्यजेतेत्यत्रेत्यर्थः श्येन इति श्येननामकपक्षिवि
शेष इत्यर्थः तस्यैवेति श्येननामकपक्षिविशेषस्यैवेत्यर्थः यथेति यथा श्येनः पक्षिविशेषो निपत्य मत्स्यादीन्जंतूनादत्ते एवं मयं श्येननामको यागो
द्विषंतं भ्रातृव्यं शत्रुं निपत्यादत्त इत्यर्थः अप मभिचरन्निश्येनेनेति वाक्यशेषः अत्रेति अत्र प्रकृते ऽनेन श्येनार्थवादेन श्येनः पक्षिविशेष एव स्तोतुं न शक्य
ते इत्यर्थः तत्र हेतुमाह श्येनेति ननु श्येनार्थवादोपमानेन श्येन एव पक्षिविशेषः कथं न स्तोतुं शक्यः स्यादित्यत आह नश्येनोपमानत्वे नेति तदशाकान्वे हेतु

न च श्येनोपमानत्वेन स एव स्तोतुं शक्यते। उपमानोपमेयभावस्य भिन्ननिष्ठत्वात्। यदा तु श्येनसंज्ञको यागो विधीयते तदार्थवादेन
श्येनोपमानेन तस्य स्तुतिः कर्तुं शक्यत इति श्येनशब्दः कर्मनामधेयम्। तद्व्यपदेशादिति। उत्पत्तिशिष्टगुणबलीयस्त्वमपि प
चमं नामधेयनिमित्तमिति केचित्। यथा वैश्वदेवेन यजेतेत्यादावत्रोत्पत्तिशिष्टाग्न्यादीनां बलीयस्त्वाद्वैश्वदेवशब्दस्य विश्वेदेव
देवताविधायकत्वं न संभवतीति कर्मनामधेयत्वम्॥

माह उपमानेति यदा त्व श्येनसंज्ञकस्य यागस्य विधेयत्वं स्वीक्रियते तदानार्थवादोपमानेन तस्य श्येनसंज्ञकस्य यागस्य स्तुतिः कर्तुं शक्याभ
वत्येवेत्याह यदेत्यादिना फलितमुपसंहरति इतीति एवमुक्तेन प्रकारेणेत्यर्थः अत्र कर्मनामधेयत्वे चोत्पत्तिशिष्टगुणबलीयस्त्वं पंचममपि निमित्तं भवती
ति केषांचिन्मतमाह उत्पत्तिशिष्टेति तत्रोदाहरणमाह यथेति अत्रेति अस्मिन्वाक्ये वैश्वदेवशब्दस्य विश्वेदेवदेवताविधायकत्वं न संभवत्युत्पत्तिशिष्टाग्न्यादी
नां बलीयस्त्वादित्यन्वयः फलितार्थमुपसंहरति इतीति तस्येति शेषः अत्रेदं बोध्यम् चातुर्मास्यस्य चत्वारि पर्वाणि वैश्वदेवो वरुणप्रघासः शाकमेधः शु
नासीरीयश्चेति तेषु प्रथमे पर्वण्यष्टौ यागा विहिता आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुं सावित्रं द्वादशकपालं सारस्वतं चरुं पौष्णं चरुं मारुतं सप्तकपालं

लौ॰ पालमिति। तेषामष्टानां यागानां सन्निधाविदमाम्नायते वैश्वदेवेन यजेतेति अत्र चाग्नेयादीन्यागानन्यजेतेत्यनूद्य वैश्वदेवशब्देन देवतारूपो गुणस्तेषु वि
मी॰ धीयते यद्यपि वैश्वदेव्यामामिक्षायां विश्वेदेवाः प्राप्तास्तथाप्याग्नेयादिषु सप्तसु यागेष्वप्राप्तत्वाद्विधीयन्ते तेष्वप्यग्न्यादिदेवताः सन्तीति चेन्न हि गत्यभावा
४६ त्तेषु देवताविकल्पस्य तन्नामधेयत्वे तु नाममात्रस्याविधेयत्वाद्द्रव्यदेवतयोरभावेन यागस्यात्र स्वरूपासंभवात् श्रूयमाणो विधिरनर्थकः स्यात्तस्माद्गुणवि
धिरिति पूर्वपक्षः उत्पत्तिवाक्यैर्विहितानाऽऽग्नेयादीनष्टौ यागानन्यजेतेत्यनूद्याष्टानां संघे वैश्वदेवशब्दो नामत्वेनोपवर्ण्यते न च विधित्वाभावेपि नामापदेश
स्य वैयर्थ्यमिति वाच्यम् प्राचीनप्रवणे वैश्वदेवेन यजेतेत्यादिषु वैश्वदेवशब्देनैकेनैवाष्टानां संघस्य व्यवहर्त्तव्यत्वेनार्थवत्त्वोपपत्तेः नामप्रवृत्तिनिमित्त

वस्तुतस्तु तत्प्रख्यशास्त्रादेवास्य कर्मनामधेयत्वं प्रकृतयागे विश्वेदेवरूपगुणसंप्रतिपन्नशास्त्रस्यार्थवादरूपस्यैव सत्त्वात्। यद्विश्वेदेवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वम्। पुरुषस्य निवर्तकं वाक्यं निषेधः। निषेधवाक्यानामनर्थहेतुक्रियानिवृत्तिजनकत्वेनैवार्थवत्त्वात्। तथा हि। यथा विधिः प्रवर्तनां प्रतिपादयन्स्वप्रवर्तकत्वनिर्वाहार्थं विधेयस्य यागादेरिष्टसाधनत्वमाक्षिपन् पुरुषं तत्र प्रवर्तयति तथा न कलञ्जं भक्षयेदित्यादिनिषेधोपि निवर्तनां प्रतिपादयन्स्वनिवर्तकत्वनिर्वाहार्थं निषेध्यस्य कलञ्जभक्षणस्यानिष्टसाधनत्वमाक्षिपन्पुरुषं ततो निवर्तयति॥

(भूता निरुक्तिस्तु द्विधा आमिक्षायागे विश्वेषां देवानामिज्यमानत्व
यात्तत्सहचरितानां सर्वेषां छत्रिन्यायेन वैश्वदेवत्वमिति विश्वेदेवा अष्टानां कर्तार इति वा तेषां वैश्वदेवत्वं तथा च ब्राह्मणं यद्विश्वेदेवाः समयजन्त
तद्वैश्वदेवस्य वैश्वदेवत्वमिति देवताविकल्पस्तु समानबलत्वाभावान्न युज्यते अग्न्यादय उत्पत्तिशिष्टत्वात्प्रबला विश्वेदेवा उत्पन्नशिष्टत्वाद्दुर्बलाः
तस्माद्वैश्वदेवशब्दः कर्मनामधेयमिति सिद्धान्तः वस्तुगतिमाश्रित्य तत्प्रख्यशास्त्रादेव वैश्वदेवशब्दस्य कर्मनामधेयत्वमाह वस्तुतस्त्विति प्रकृतयाग एम॰
इति वैश्वदेवनामकेऽष्टानामाग्नेयादीनां संघात्मके प्रकृतयाग इत्यर्थः विश्वेदेवेति प्रकृतयागे विश्वेदेवरूपगुणः संप्रतिपन्नः संप्राप्तो यस्मात्॥ ४६

तादृशशास्त्रस्येत्यर्थः तत्रगुणप्रापकंशास्त्रमुदाहरतियद्विश्वेदेवाइतिअस्यशास्त्रस्यकर्तृरूपेणप्रवृत्तेयागेविश्वेदेवरूपगुणप्रापकत्वमितिभावःना
मधेयस्यप्रयोजनंतुसर्वत्रव्यवहारएवनह्येतरेणनामधेयमृत्विग्वरणादिष्वनेनाहंयजइत्याख्यानोपायोलघुःकश्चिदस्तितस्माद्विश्वदेवादिशब्दा
नांकर्मनामधेयत्वमेवेतिसिद्धम् तदेवंमन्त्रार्थलक्षणादिनिमित्तचतुष्टयनिरूपणेननामधेयस्यविधेयार्थपरिच्छेदकतयार्थवत्त्वंनिरूपितमधुनानिषेध
वाक्यानामर्थवत्त्वनिरूपणायनिषेधवाक्यंलक्षयतिपुरुषनिवर्तकमितिनिषेधकेतिनकलंजंभक्षयेदित्यादिनिषेधकवाक्यानामनर्थहेतुभूतायाःकलं
जभक्षणादिक्रियायाःसकाशात्पुरुषस्यनिवृत्तिजनकत्वेनैवार्थवत्त्वंनकिंचित्कर्तव्यताप्रतिपादकतेतिभावःयथाविधिवाक्यानांस्वप्रवर्तकत्वा
न्यथानुपपत्त्याविधेयार्थस्यस्वर्गादिरूपेष्टसाधनत्वप्रत्यायनेनतत्रविधेयार्थेपुरुषप्रवृत्तिजनकत्वंतथानिषेधानामपिस्वनिवर्तकत्वान्यथानुपपत्त्या
निषेध्यस्यपुरुषानिष्टसाधनत्वप्रत्यायनेनततःकलंजभक्षणादेःपुरुषनिवृत्तिजनकत्वमितिदृष्टान्तदार्ष्टान्तिकाभ्यांनिषेधवाक्यानामनर्थहेतुक्रि
यायाःपुरुषनिवृत्तिजनकत्वेनैवार्थवत्त्वमुपपादयतितथाहीत्यादिनाननुनिषेधवाक्यानांनिवर्तनाप्रतिपादकत्वंसंभवतिनभक्षयेन्नहितवाइत्येव
मादावव्यवधानेनतत्रार्थस्याभावस्यधात्वर्थेनान्वयेसतिधात्वर्थवर्जनकर्तव्यतायाएवसर्वत्रवाक्यार्थत्वेनप्रतीयमानत्वात्तथाचयथायजेतेत्यादौयागःकर्त
व्यतावाक्यार्थोभवतितथानकलंजंभक्षयेद्ब्राह्मणोनहन्तव्यइत्यादावपितत्तद्धात्वर्थवर्जनकर्तव्यतैववाक्यार्थोननिवर्तनेत्याशयेनाशंकते ॥८६॥

लौ० मी० ४७ नन्वितिनञर्थस्याभावस्य धात्वर्थेनाव्यवधानेनान्वयेपि धात्वर्थस्य प्रत्ययार्थभावनोपसर्ज्जनत्वेनोपस्थितत्वान्न नञर्थेनान्वयः संभवति अन्यत्रोप
सर्जनत्वेनान्वितस्यान्यत्रोपसर्जनत्वेनान्वयायोगादिति परिहरति उच्यत इत्यादिना अत्रेति नकलंजंभक्षयेदित्यादावित्यर्थः अव्यवधानेपीत्यत्र धात्व
र्थस्य नञर्थेनेत्यनुषंगः तस्येति धात्वर्थस्येत्यर्थः अन्योपसर्ज्जनत्वेनोपस्थितस्याप्यन्यत्रोपसर्ज्जनत्वेनान्वये को दोष इत्यत आह नहीति नन्वबाधकं
दोषमाह अन्यथेति अन्यविशेषणत्वेनोपस्थितस्याप्यन्यत्र विशेषणत्वेनान्वयस्वीकारे पुरुषोपसर्जनत्वेनोपस्थितस्य राज्ञोपि क्रियोपसर्जनत्वेनान्वया
पत्तेरित्यर्थः धात्वर्थस्य नञर्थेनान्वयासंभवात्कलंजादिपदार्थस्यापि कारकोपसर्जनत्वेनोपस्थितस्य तत्रान्वयासंभवाच्च परिशेषात्प्रत्ययार्थस्यैव नञ

ननु निषेधवाक्यस्य कथं निवर्त्तनाप्रतिपादकत्वमिति चेदुच्यते। न तावदत्र धात्वर्थस्य नञर्थेनान्वयः। अव्यवधानेपि तस्य प्रत्यया
र्थभावनोपसर्जनत्वेनोपस्थितेः। न ह्यन्योपसर्ज्जनत्वेनोपस्थितमन्यत्रान्वेति। अन्यथा राजपुरुषमानयेत्यादावपि राज्ञः
क्रियान्वयापत्तेः। अतः प्रत्ययार्थस्यैव नञर्थेनान्वयः। तत्रापि नाख्यातत्वांशवाच्यार्थभावनायास्तस्या लिङंशवाच्यप्रवर्तनोपसर्जनत्वेनो
पस्थितेः। किंतु लिङंशवाच्यशब्दभावनायास्तस्याः सर्वापेक्षया प्रधानत्वात्। नञश्चैव स्वभावो यत्स्वसमभिव्याहृतपदार्थविरोधिबो
धकत्वम्॥

र्थेनान्वयो भवतीत्याह अत इति किंच प्रत्ययार्थोपि द्विविधो भवत्याख्यातत्वांशवाच्यार्थभावना लिङंशवाच्या शब्दभावना चेति तयोर्मध्ये
पिनाख्यातत्वांशवाच्यभूताया अर्थभावनाया नञर्थेन्वयः संभवतीत्याह तत्रापीति नन्वहेतुमाह तस्या इति प्रवर्तनोपसर्जनत्वेनेति शब्दभावनावि
शेषणत्वेनेत्यर्थः लिङंशवाच्यो नाम लिङोंशो लिङ्त्वरूपो धर्मस्तद्वाच्येत्यर्थो बोध्यः एवमग्रेपि ननु नकलंजंभक्षयेदित्यादौ कलंजादिपदार्थस्य धा राम
त्वर्थस्य च नञर्थेनान्वयो भवेत्येव निरस्तः प्रत्ययार्थस्याप्यर्थभावनारूपस्य नञर्थेनान्वयानंगीकारे प्रत्ययार्थत्वाविशेषाच्छब्दभावनाया अपि तेनान्व ४७
यासंभवेनानन्वितशब्दस्याप्रामाण्यम्।

पत्तिरित्याशंकापरिहरति किंत्विति तत्र हेतुमाह तस्या इति प्रत्ययार्थत्वं न नञर्थेनान्वये प्रयोजकं किंतु सर्वापेक्षया मुख्यत्वेनानुपस्थितत्वं तच्च शब्द
भावनायां बाधितमिति भावः एवं शब्दभावनारूपस्य प्रत्ययार्थस्य प्रवर्तनाविशेषस्य नञर्थेनान्वये सिद्धे नञः प्रत्ययार्थभूतप्रवर्तनाविरोधिनिवर्तनाबो
धकत्वप्रदर्शनाय प्रथमं तत्स्वभावं प्रदर्शयति नञश्चैष स्वभाव इति अत्र स्वसमभिव्याहृतपदार्थविरोधिबोधकत्वं स्वान्वितपदार्थविरोधिबोधकत्वं बोध्यं ते
न कलंजादिपदार्थानामपि विरोधिबोधकत्वं नञा दुर्वारं स्यात्तेषामप्येकत्र सहपाठरूपनञ्समभिव्याहारस्य सत्त्वादिति निरस्तं तेषां नञन्वितपदार्थत्वाभा
वस्य दर्शितत्वेन नञस्तद्विरोधिबोधकत्वासंभवात् नञः स्वसमभिव्याहृतपदार्थविरोधिबोधकत्वं दृष्टान्तेन स्पष्टयति यथेत्यादिना घटसत्त्वविरोधीतिना
स्तीत्युक्ते कस्यासत्त्वमस्तीति सत्त्वशब्दान्वयिना नञात्र बोध्यत इति सत्त्वनिरूपकाकांक्षायाः सत्त्वाद्घटनिरूपितसत्त्वविरोधीत्यर्थः इदानीं नञ स्वभाव

यथा घटो नास्तीत्यादौ अस्तीति शब्दसमभिव्याहृतो नञ् घटसत्त्वविरोधिघटासत्त्वं गमयति तद्वदिह लिङ्समभिव्याहृतो नञ् लिङ-
र्थप्रवर्तनाविरोधिनीं निवर्तनामेव बोधयति। तदिह विधिवाक्यश्रवणेऽयं मां प्रवर्तयतीति प्रतीतेः। तस्मान्निषेधवाक्यस्थले नि
वर्तनैव वाक्यार्थः। यदा तु प्रत्ययार्थस्य तत्रान्वये बाधकं तदा धात्वर्थस्यैव तत्रान्वयः॥

प्रदर्शनस्य फलं दर्शयति तद्वदिति तद्वदित्यन्वयः तत्पदं दर्शितस्वभावं नञित्यर्थः इहेति न कलंजं भक्षयेत् ब्राह्मणो न हन्तव्य इत्यादौ वाक्य इत्यर्थः ननु
लिङः प्रवर्तनाप्रतिपादकत्वे सिद्धे तत्संबद्धनञस्तदर्थप्रवर्तनाविरोधिनिवर्तनाप्रतिपादकत्वं सेत्स्यति तदेव कुत इत्याशंक्य तत्र हेतुमाह विधीति प्रतीते
रिति प्रवर्तनाप्रतीतेरित्यर्थः यद्वा यजेत स्वर्गकाम इति विधिवाक्यश्रवणेऽयं मां प्रवर्तयतीति प्रवर्तनाप्रतीतिवन्न कलंजं भक्षयेदित्यादि निषेधवा
क्यश्रवणेप्ययं मां निवर्तयतीति निवर्तनाप्रतीतेरित्यध्याहारेण विधीत्यादि हेतुवाक्यं दृष्टान्तदार्ष्टान्तिकविधया योजनीयम् एवं सिद्धं निवर्तनारूपं निषेध
वाक्यार्थमुपसंहरति तस्मादिति न कलंजं भक्षयेदित्यत्र कलंजकर्मकभक्षणानुकूलपुरुषप्रवृत्तिजनकप्रवर्तनाने ॥ श्री॥ श्री॥ ६ ॥

तिलिङ्गर्थे प्रवर्तनाविरोधिनिवर्तनैव वाक्यार्थः एवमन्यत्रापि निषेधवाक्येषु सर्वत्र निवर्तनाया एव वाक्यार्थत्वे विधिनिषेधयोर्भिन्नार्थत्वमप्युपपन्नं भ
वति हननादिवर्जनकर्तव्यता वाक्यार्थत्वपक्षे तु कर्तव्यताया एवोभयत्र प्रतिपाद्यत्वात्तयोरेकार्थत्वं स्यात्तच्चानयुक्तं यथाहुः अन्तरं यादृशं लोके ब्रह्म
हत्याश्वमेधयोः दृश्यते तादृगेव हि विधानप्रतिषेधयोरिति तस्मान्निवर्तनैव प्रतिषेधेषु वाक्यार्थ इति सिद्धम् यदि तु प्रत्ययार्थस्य नञर्थेनान्वये किंचिद्बा
धकं वर्तते तदा तु धात्वर्थस्यैव नञर्थेनान्वयो भवतीत्याह यदा त्वित्यादिना तत्र बाधकं विभजते तच्चेति प्रत्ययार्थस्य नञर्थेनान्वये वर्तमानं सदित्यर्थः तत्रा
द्यमिति तयोरुक्तयोर्द्वयोर्मध्ये आद्यं बाधकमित्यर्थः तस्य व्रतमितीति तस्य स्नातकस्य ब्रह्मचारिविशेषस्य व्रतं प्रजापतिदेवताकमादित्यानीक्षणसंक
ल्पादिकं किंचिदनुष्ठेयमित्यर्थः एतद्वाक्यपाठादिति नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचनेत्येतद्वाक्यपाठादित्यर्थः तथाचेति तस्य व्रतमिति स्नातक

तच्च बाधकं द्विविधम्। तस्य व्रतमित्युपक्रमो विकल्पप्रसक्तिश्च। तत्राद्यं नेक्षेतोद्यन्तमादित्यमित्यादौ तस्य व्रतमित्युपक्रमस्यैव तद्वा
क्यपाठात्। तथा चात्र पर्युदासाश्रयणं। तथाहि व्रतशब्दस्य कर्तव्यार्थे रूढत्वात्तस्य व्रतमित्यत्र स्नातकस्य व्रतानां कर्तव्यत्वेनो

स्यानुष्ठेयस्योपक्रमस्य नेक्षेतोद्यन्तमित्यादिवाक्यपाठेऽप्यस्मिन्वाक्ये पर्युदास एव समाश्रीयत इत्यर्थः किंच नेक्षेतोद्यन्तमादित्यमित्यत्र पक्रमात्॥
नञ्पदमभिधावृत्त्या प्रतिषेधं ब्रूते न तु पर्युदासं लक्षणापत्तेः प्रतिषेधस्य च प्राप्तिपूर्वकत्वाद्वैदिकस्य प्रतिषेधस्य वैदिक्येव प्राप्तिस्तु प्रत्यासन्ना भवेत्।
तथा च सति यत्र क्रतावादित्येक्षणं विहितं तत्रायं प्रतिषेध उद्यास्तमयोद्देशेन प्रवर्तते एवं च सति नात्र फलं कल्पनीयं स्यात् पर्युदासमाश्रित्य
पुरुषार्थत्वाङ्गीकारेऽप्यधिकारसिद्धये फलस्य कल्पनीयत्वमापद्येत तस्मादत्र क्रत्वर्थः प्रतिषेध इत्याशंक्य तस्य व्रतमित्युपक्रमस्य नेक्षेतोद्यन्तमि
त्याद्याम्नानत्वाद्व्रतशब्दस्य च कर्तव्यरूपार्थे रूढत्वादत्र किंचिदनुष्ठेयमेव प्रतिभाति तच्च पर्युदासाश्रयणे सत्येवोपपद्यते किंचोपक्रमवाक्ये प्र 
तिज्ञातस्यैवार्थस्यात्रापि वक्तव्यत्वात् उपक्रमवाक्येन स्नातकानुष्ठेयव्रतानामेव प्रतिज्ञानत्वात् कानि तानि व्रतानीत्यपेक्षा॥ श्री॥ श्री॥ 

यांस्नानकव्रनप्रदर्शनाय्यास्यवाक्यस्यावतारात्स्तत्रकर्तव्यएवकश्चिदर्थोवक्तव्यः सचपर्युदासपक्षे लभ्यतेनिषेधपक्षेतुदुर्लभएवेत्यभिप्रायेणपर्युदास
पक्षमुपपादयतिनिथाहीत्यादिनानेक्षेतोद्यंतमित्यादेःकर्तव्यरूपस्याप्रतिपादनीयत्वेबाधकमाह अन्यथेति पूर्वोत्तरेति नस्यप्रत्नतमितिपूर्ववाक्यानेक्ष
तोद्यंतमित्याद्युत्तरवाक्यंचतयोरेकवाक्यत्वबाध्येनेत्यर्थः ननुनेक्षेतोद्यंतमित्यादेर्भवतुकर्तव्यरूपार्थस्यैवप्रतिपादनंततोपिकिंस्यादित्यत आहतथा
चेति तथाचनेक्षेतोद्यंतमित्यादेःकर्तव्यरूपार्थस्यप्रतिपादनीयत्वेचनञर्थेनप्रत्ययार्थान्वयावकाशोभवतीत्यर्थः ननुनेक्षेतोद्यंतमादित्यमित्यत्रनञ
र्थेनप्रत्ययार्थस्यान्वयेकोदोषइत्याशंकायांतत्रहेतुमाह कर्तव्येतिनञर्थेनप्रत्ययार्थस्यनञान्वयेततःकर्तव्यार्थानवबोधापत्तेरित्यर्थः ननुप्रत्ययान्वितस्य
नञःकर्तव्यार्थावबोधकत्वानंगीकारेकोवार्थस्तेनावबोध्यतइत्यत आह विध्यर्थेतिताहशनञतिप्रत्ययान्वितेननञेत्यर्थः ताहशनिवर्तनैवकर्तव्यरूपो

किंतत्कर्तव्यमित्याकांक्षायांनेक्षेतोद्यंतमित्यादिनाकर्तव्यार्थएवप्रतिपादनीयः।अन्यथापूर्वोत्तरवाक्ययोरेक
वाक्यत्वंनस्यात्।तथाचनञर्थेनप्रत्ययार्थान्वयः।कर्तव्यार्थानवबोधात्।विध्यर्थप्रवर्तनाविरोधिनिव
र्तनायाएवताहशनञाबोधनात्।तस्याश्चकर्तव्यार्थत्वाभावात्॥ १॥ श्री॥ ॥श्री॥ श्री॥

र्थोभवतुकोदोषइतिमंदाभिप्रायमाशंक्याहतस्याश्चेतिनिरुक्तनिवर्तनायाश्चेत्यर्थः किंचैवंनञःप्रत्ययेनान्वयासंभवेप्रत्ययार्थस्वतारितोनञ्धातुनासहसं
बध्यतेधातुनानञःसम्बन्धेचननस्यनिषेधकत्वंसंभवतिविधायकसंबद्धस्यैवनञोनिषेधकत्वात् निषेधकत्वस्यविधायकत्वप्रतिपक्षत्वात् नामधातु
र्थयोगेतुनञोननिषेधकत्वमुक्तंतयोरविधायकत्वात् यथाहुः नामधात्वर्थयोगेतुनैवनञ्प्रतिषेधकः वदत्यब्राह्मणाधर्मावन्यमात्रविरोधिनौ वितितस्मा
न्नेक्षेतेत्यत्रनञोधातुनायोगान्नञाधात्वर्थेक्षणविरोधीकश्चनार्थःप्रतिपाद्यते यद्यपिनञोऽभावएवशक्तिः तथाचेक्षणस्याभावएवनञःशक्यार्थोलाघवात्तथा
नतुनहिरोधीतस्मादभावघटितत्वेनगौरवापत्तेःतदन्यतद्विरुद्धतदभावेषुनञितिस्मरणंतुप्रतीत्यभिप्रायेणशक्त्यभिप्रायं तथापिनेक्षेतेत्यत्रप्रत्ययस्यनञास

लौ॰
मी॰
४९

मृत्येन च तेन नञा वक्रश्चिदर्थो विधेयः स्वीकर्तव्यः नत्र नञा क्रत्वर्थो विधातुं शक्यते तेन नञा तदभावबोधनात् नापि तदभावो विधातुं शक्यते अभावस्याविधेय
त्वात् तस्मात्पर्युदासाश्रयणेन धात्वर्थेक्षणविरोधी कश्चनात्र विधानयोग्योर्थो नञा लक्षणया प्रतिपाद्यते स च विधानयोग्यः पदार्थोऽनीक्षणसंकल्प एव
तस्येक्षणविरोधित्वात्कर्तव्यत्वसंभवाच्च तत्र अस एव संकल्पोत्रानुष्ठेयत्वेन विधीयत इत्यभिप्रायेण पर्युदासस्यावश्यकत्वात्प्रसज्यादवत्तारितस्य नञो
धातुसंबंधेन तदर्थविरोध्यनीक्षणसंकल्पप्रतिपादकत्वमुपसंहरति तस्मादिति लक्षणयेति स्वसमभिव्याहृतपदार्थाभाव एव नञः स्वशक्यार्थो भवति त
थाच स्वसंबध्यमानधात्वर्थाभावं शक्त्या प्रतिपादयन् नञ् तदभावसंबन्धिनं तदर्थविरोधिनं लक्षणया प्रतिपादयत्येव तदभावतद्विरोधिनोः सम्बन्धस्य संभ

तस्मान्नेक्षेतेत्यत्र नञा धात्वर्थविरोध्यनीक्षणसंकल्प एव लक्षणया प्रतिपाद्यते तस्य कर्तव्यत्वसंभवात्। आदित्यविषयकानीक्षणसं
कल्पेन भावयेदिति वाक्यार्थः। तत्र भाव्याकांक्षायां एतावतैनसा वियुक्तो भवतीति वाक्यशेषावगतः पापक्षयो भाव्यत्वेनान्वेति।
एवं च पूर्वोत्तरयोरेकवाक्यत्वं निर्वहत्येव न चात्र धात्वर्थविरोधिनः पदार्थान्तरस्यापि संभवात्कथमनीक्षणसंकल्पस्यैव भावना
न्वय इति वाच्यम्। तस्य कर्तव्यताभावेन प्रकृते भावनान्वयायोग्यत्वात्॥

वा तदृश्यते हि तेजोभावनमसोः सम्बन्धः तथा चोद्यन्तमस्तयं
तं चादित्यं नेक्षिष्य इत्येवंरूपः संकल्पोत्रानुष्ठेयत्वेन विधीयमानो नञा लक्षणया प्रतिपाद्यत इति भावः तस्येति अनीक्षणसंकल्पस्येत्यर्थः पर्युदा
सपक्षे नेक्षेतोद्यन्तमादित्यमित्यस्य वाक्यस्यार्थं प्रदर्शयति आदित्येति यत्तु पर्युदासपक्षे फलस्यात्र कल्पनीयत्वमापादितं तदपि न वाक्यशेषावग
तस्य पापक्षयस्यैवात्र फलत्वसंभवादित्याशयेनात्र भाव्यान्वयं प्रदर्शयति तत्रेति अनीक्षणसंकल्पभावनाया इत्यर्थः एनसा वियुक्तो भव
तीति पापेन विरहितो भवतीत्यर्थः किंच नेक्षेतोद्यन्तमादित्यमित्यत्रानीक्षणसंकल्परूपस्यानुष्ठेयस्य प्रतिपादनेन तस्य व्रतमिति स्नातकव्रतोपक्र एम
मवाक्यस्य नेक्षेतेत्याद्युत्तरवाक्यैनैकवाक्यत्वमुपपन्नं भवति पूर्वं प्रतिज्ञातस्यैवोत्तरप्रतिपादनादित्याह एवमिति ननु धात्वर्थेक्षणविरोधिनो बहवः ४९

पदार्थाऽनुष्ठेयाः संनिनन्नस्य कथमत्रवाक्येऽनीक्षणसंकल्पस्यैव भावनायां करणत्वेनान्वयः स्वीक्रियत इत्याशंक्य परिहरति नचेत्यादिना यद्यपि प
दार्थान्तराणामपटेन चक्षुषोपिधानादिरूपाणां धात्वर्थेक्षणविरोधित्वं भवति तथापि कायिकवाचिकव्यापारविशेषाणां मन्त्रा प्रतीयमानेनात्मानसव्यापारस्य चाप्र
तिषेधात्संकल्प एव मानसव्यापारविशेषोऽत्र परिशिष्यत इत्यभिप्रेत्य तत्र हेतुमाह तस्येति परादिना चक्षुषोऽपिधानादिरूपस्य पदार्थान्तरस्य कर्तव्यताभा
वेन कर्तव्यत्वेन विवक्षासंभवेन सर्वक्रियाऽविनाभूतस्यैव धात्वर्थेक्षणविरोधिपदार्थान्तरस्यानेक्षणेनेत्यादौ प्रकृतेभावनान्वययोग्यत्वमुपपद्यते न तथा च
धात्वर्थेक्षणविरोध्यनीक्षणसंकल्पस्यैवात्र भावनान्वययोग्यता संभवति तस्य सर्वक्रियाऽविनाभूतत्वान्न तु नादृशपदार्थान्तरस्य तस्य सर्वक्रियाऽवि

द्वितीयं यजतिषु ये यजामहं करोति नानुयाजेष्वित्यादावत्र विकल्पप्रसक्तौ च पर्युदासाश्रयणात्। तथा हि यद्यत्र वाक्ये नञर्थे
प्रत्ययार्थान्वयः स्यात्तदानुयाजेषु येयजामह इति मन्त्रस्य प्रतिषेधः स्यात्। अनुयाजेषु ये यजामहे न कुर्यादिति। स च प्रा
प्तिपूर्वक एव प्राप्तस्यैव प्रतिषेधात्। प्राप्तिश्च यजतिषु ये यजामहं करोतीति शास्त्रादेव वाच्या। शास्त्रप्राप्तस्य च प्रतिषेधे विकल्प
एव न तु बाधः। प्राप्तिमूलरागस्यैव तन्मूलशास्त्रस्य शास्त्रान्तरेण बाधायोगात्। न च पदे जुहोतीति विशेषशास्त्रेण आहवनीयजु
होतीति शास्त्रस्येवानुयाजेष्वित्यनेन यजतिषु ये यजामहं करोतीत्यस्य बाधः स्यादिति वाच्यम्॥ ६॥ ॥ नाभूतत्वात्संभवादिति भा

वः प्रत्ययार्थस्य नञर्थेनान्वये विकल्पप्रसक्तिरूपस्य बाधकस्य प्रतिषेधविघटनेन पर्युदासगमकत्वप्रदर्शनाय तद्विषयमुदाहरति द्वितीयमिति
अत्र पर्युदासाश्रयणाय विकल्पप्रसक्तिमेवोपपादयति तथा हीत्यादिना स चेति निषेधश्चेत्यर्थः तत्र हेतुमाह प्राप्तस्यैवेति शास्त्रादेवेति ब्राह्मण
हननादेरिव रागतः प्राप्त्यसंभवात्तस्य शास्त्रादेव प्राप्तिर्वाच्येत्यर्थः उपपादितं विकल्पप्रसक्तिमुपसंहरति शास्त्रप्राप्तस्येति ननु यथा रागतो ह
ननादौ प्रवृत्तपुरुषं हननादिप्राप्तिमूलभूतरागस्य बाधेन न तो न हन्तव्य इत्यादिशास्त्रं निवर्तयति तथा यजतिषु ये यजामहे ॥ श्री॥ ॥

लौ० मी० ५०

करोतीति शास्त्रादनुयाजेष्वप्यनुष्ठानकाले यजतित्वाविशेषादेव ये यजामह इति मंत्रस्य समुच्चारणे प्रवृत्तं पुरुषं तत्प्राप्तिमूलभूतस्य प्रदर्शितशास्त्र
स्य यजतिसामान्ये ये यजामह इति मन्त्रप्रापकस्यानुयाजेषु बाधेन तत्तेनानुयाजेषु ये यजामहं करोतीति शास्त्रं निवर्तयत्येवेति कथं न शास्त्रप्राप्तस्य बाधः
स्यादित्यत आह प्राप्तीति शास्त्रेण बाध इति शेषः तन्मूलशास्त्रादिति ये यजामह इति मंत्रप्राप्तिमूलशास्त्राद्यजतिषु ये यजामहं करोतीत्येवंरूपाच्छास्त्रान्त
रेण नानुयाजेषु ये यजामहं करोतीत्येवंरूपेण प्रदर्शितमंत्रप्राप्तिमूलभूतस्य प्रदर्शितशास्त्रस्य बाधायोगादित्यर्थः दृष्टान्तस्तत्र व्यतिरेकी बोध्यः त
थाच यथा हननादिप्राप्तिमूलरागस्य भ्रांतिनिमित्तकस्य शास्त्रेण बाधो भवति न तथा मंत्रप्राप्तिमूलशास्त्रस्य शास्त्रान्तरेण मंत्रप्राप्तिमूलशास्त्रस्य बाधो
न युक्तो निषेधशास्त्रस्य निषेध्यप्राप्तिसापेक्षत्वेन तत्प्रापकस्याबाधकत्वादित्यनुपदे स्पष्टीभविष्यतीति मूल इति भावः यद्वा तन्मूलशास्त्रादिति पंचमी
षष्ठ्यर्थे बोध्यते नानुषंगविभक्तिविपरिणामयोर्न श्रमः कर्तव्यः स्यात् केचित्तु तन्मूलशास्त्रादिति बाधमूलशास्त्राद्बाधकरूपात्प्राप्तिमूलरा
गस्य यथा बाधस्तथा शास्त्रान्तरेण प्राप्तिमूलशास्त्रस्य बाधायोगादिति व्याचक्षते ननु यथा पदाधिकरणकहोमविधायकविशेषशास्त्रेण
हवनीयाधिकरणकहोमविधायकस्य सामान्यशास्त्रस्य बाधः क्रियते तथाऽनुयाजेषु ये यजामह मंत्रप्रतिषेधकरूपविशेषशास्त्रेण यागसामान्य
तन्मंत्रविधायकरूपस्य सामान्यशास्त्रस्य बाधः कथं न क्रियत इत्याशंकापरिहरति न चेत्यादिना न च वाच्यमित्यत्र हेतुमाह ॥ श्री ॥ श्री ॥ ५०

परस्परेतिशास्त्रयोरेकविषये बाध्यबाधकभावे परस्परनिरपेक्षत्वं हेतुः पदशास्त्रस्य पदाधिकरणकहोमरूपस्वार्थविधानार्थमाहवनीयशास्त्रानि
रपेक्षत्वात् अनुयाजेषु येयजामहमंत्रप्रतिषेधकशास्त्रस्य तत्रप्रतिषेध्यमंत्रप्रसक्त्यर्थं यजतिसामान्येताहृशमंत्रविधायकसामान्यशास्त्रसापेक्षत्वाच्चेति
दृष्टांतदार्ष्टांतिकयोर्वैषम्यं प्रदर्शयति पदशास्त्रस्येत्यादिना तथा च प्रतिषेधशास्त्रस्य विशेषविषयत्वेन प्रबलत्वे ऽपि विधिशास्त्रसापेक्षोपजीव्यत्वेन प्रब
ति लत्वमस्तीति न प्रतिषेधशास्त्रेण विधिशास्त्रस्यात्यंतबाधो युक्त इति विहितप्रतिषिद्धत्वाद्विकल्पः स्यात् स च न युक्त इत्युपरिष्टात्स्पष्टीभविष्यतीति भावः बाधा
योगमुपसंहरति तस्मादिति मंत्रविधायकशास्त्रस्य तत्प्रतिषेधकशास्त्रेणाबाधायोगात्तद्विहितस्यापि तेन प्रतिषेधे विकल्प एव स्यात् न बाध इत्यर्थः ननु त

परस्परनिरपेक्षयोरेव शास्त्रयोर्बाध्यबाधकभावात्। पदशास्त्रस्य हि स्वार्थविधानार्थमाहवनीयशास्त्रानपेक्षणान्निरपेक्षत्वम्
।प्रकृते तु निषेधशास्त्रस्य निषेध्यप्रसक्त्यर्थं यजतिषु येयजामह इत्यस्यापेक्षणान्न निरपेक्षत्वम्। तस्माच्छास्त्रविहितस्य शा
स्त्रांतरेण प्रतिषेधे विकल्प एव। स च न युक्तः। विकल्पे शास्त्रस्य पाक्षिकाप्रामाण्यसंपातात्। न ह्यनुयाजेषु येयजामह इ
त्यस्यानुष्ठानेनानुयाजेष्वित्यस्य प्रामाण्यं संभवति। व्रीहियागानुष्ठाने यवशास्त्रस्येव द्विरदृष्टकल्पना च स्यात्। विधिप्रति
षेधयोरपि पुरुषार्थत्वात्॥ ॥ ननु विकल्प एव तेन किं हीयत इत्यत आह स चेति विकल्पस्यायुक्तत्वे हेतुमाह विकल्प इति ननु विकल्पस्वी
कारे कथं पक्षे शास्त्रस्याप्रामाण्यमापद्यत इत्यत आह न हीति यथा व्रीहिभिर्यागानुष्ठानसमये यवशास्त्रस्य न प्रामाण्यं भवति तथा विधायकशास्त्रानुसा
रेण येयजामह इति मंत्रस्यानुयाजेषूच्चारणानुष्ठानसमये न तत्प्रतिषेधकशास्त्रस्य प्रामाण्यं संभवतीत्यर्थः किंच विकल्पपक्षे द्विर्द्विरदृष्टकल्पना
प्रसंगो ऽपि स्यात् विधिशास्त्राद्ध्येवमवगम्यते यदनुयाजेषु येयजामह इति मंत्रस्य करणे कश्चनोपकारो भवतीति प्रतिषेधशास्त्रादपि न तत्र तदकर
णात्कश्चनोपकारो भवति दर्शपूर्णमासयोरनृतवदनाकरणादिजन्योपकारवदित्यवगम्यते तच्चोपकारद्वयमदृष्टरूपमिति ॥ ६ ॥ ॥

द्विरदृष्टकल्पनाप्रसंगइत्याह द्विरदृष्टकल्पनाचेति तत्रहेतुमाह विधीतिपुरुषार्थत्वादितिविधानवत्प्रतिषेधस्याप्यदृष्टपुरुषार्थसंपादकत्वा दित्यर्थः तस्मान्नानुयाजेष्विष्यादौ प्रतिषेधस्वीकारे विकल्पादिदोषापत्तेर्नात्रप्रतिषेधः समाश्रीयते किंतु नञो नामसंबन्धमाश्रित्य पर्युदासस्यैवाश्रयणं क्रियत इत्युपसंहरति अतइति एवंचनानुयाजेषु येयजामहंकरोतीत्यस्यवाक्यस्यार्थमाह इत्थंचेति अनेन पूर्वोक्तप्रकारेणेत्यर्थः अत्र पर्युदासस्य तात्पर्यविषयत्वेन केरोतेरवतारितस्य नञो नुयाजशब्देन संबन्धसिद्धौ चेति यावत् तत्र हेतुमाह नत्र इति अनुयाजव्यतिरिक्तेनुयाजाभावस्य सत्त्वाच्छक्यसम्बन्धसंभवेन लक्षणोपपत्तिरितिभावः अत्र प्रतिषेधपक्षं परित्यज्य पर्युदासपक्षस्वीकारस्य फलमाह एवंचेति ननु नानुयाजेषु येयजामहंकरोतीत्यत्र येयजा

अतो नात्र प्रतिषेधस्याश्रयणम् किंतु नञोनुयाजसंबंधमाश्रित्य पर्युदासस्यैवेत्थं चानुयाजव्यतिरिक्तेषु यजतिषु येयजामहमिति मंत्रं कुर्यादिति वाक्यार्थबोधः। नञोनुयाजव्यतिरिक्तलाक्षणिकत्वात्। एवं च न विकल्पः। अत्र च वाक्ये येयजामहमिति न विधीयते यजतिषु येयजामहे इत्यनेनैव च प्राप्तत्वात्। किंतु सामान्यशास्त्रप्राप्तयेयजामह इत्यनुवादेन तस्यानुयाजव्यतिरिक्तविषयत्वं विधीयते। यद्यजतिषु येयजामहं करोतीति तदनुयाजव्यतिरिक्तेष्वेवेति। नन्वेवं सामान्यशास्त्रप्राप्तस्य विशेषसंकोचनरूपादुपसंहारात्पर्युदासस्य भेदो न स्यादिति चेन्न। उपसंहारो हि तन्मात्रसंकोचार्थः॥

॥ महइतिमंत्रविधौ तस्यानुयाजव्यतिरिक्तविषयत्वविधौ च वाक्यभेदः स्यादित्यत आह अत्र चेति सामान्यशास्त्रेति यजतिषु येयजामहंकरोतीति यजिसामान्येन द्विधायकशास्त्रप्राप्तमेव येयजामह इति मंत्रमनूद्य नानुयाजेषु येयजामहंकरोतीत्यत्र तस्यानुयाजव्यतिरिक्तविषयता विधीयत इत्यर्थः तथा च यजतिष्वित्यादिसामान्यशास्त्रस्य विशेषापेक्षिणो नानुयाजेष्वित्यादि विशेषशास्त्रेणानुयाजव्यतिरिक्तविषयसमर्पणादनुयाजव्यतिरिक्तयागेषु येयजामह इति मंत्रः कर्तव्यतया प्राप्तः अनुयाजेषु तु तस्य कर्तव्यत्वेनाप्राप्तत्वादप्रतिषिद्धत्वाच्च नात्र विकल्पप्रसंगोपि संभवति लक्षणयानुयाजव्य

विषयसमर्पणाच्चन नानुयाजेष्विन्यादिवाक्यस्याप्रामाण्यमपि भवति तस्मात्पर्युदासाश्रयणे बाधकाभावात्स एव स्वीकर्तव्य इति भावः ननु पर्युदा
साश्रयणापक्षे यजतिषु ये यजामहं करोतीति सामान्यशास्त्रेण यागमात्रे प्राप्तस्य ये यजामह इति मंत्रस्य नानुयाजेषु ये यजामहं करोतीति विशेषशास्त्रेणानु
याजव्यतिरिक्तविषये यागविशेषे संकोचनात्पर्युदासस्योपसंहारादभेदापत्तिः स्यात् सामान्ये प्राप्तस्य विशेषे संकोचस्यैवोपसंहारपदार्थत्वात् यथा
पुरोडाशं चतुर्द्धा करोतीति पुरोडाशसामान्ये प्राप्तस्य चतुर्द्धाकरणस्याऽऽग्नेयं चतुर्द्धा करोतीत्याग्नेयविशेषे संकोच इत्याशंकते नन्वेवमिति पुरोडाशं च

यथा पुरोडाशं चतुर्द्धा करोतीति सामान्यप्राप्तं चतुर्द्धाकरणम्। आग्नेयं चतुर्द्धा करोतीति विशेषादाग्नेयपुरोडाशमात्रे संकोच्यते। पर्युदा
सस्तु तदन्यमात्रसंकोचार्थ इति ततो भेदात्। कुत्रचित् विकल्पप्रसक्तावप्यनन्यगत्या प्रतिषेधाश्रयणम्। यथा नातिरात्रे षोडशिनं गृ
ह्णातीति शास्त्रप्राप्तषोडशिग्रहणस्य निषेधाद्विकल्पप्रसक्तावपि न पर्युदासाश्रयणम्। असंभवात्। तथा हि यद्यत्र षोडशिपदा
र्थेन नञोऽन्वयस्तदातिरात्रे षोडशिव्यतिरिक्तं गृह्णातीति वाक्यार्थबोधः स्यात्स च न संभवति। अतिरात्रे षोडशिनं गृह्णातीति प्रत्य
क्षविधिविरोधात्। यदि चातिरात्रेण पदार्थेनान्वयस्तदानतिरात्रव्यतिरिक्ते षोडशिनं गृह्णातीति वाक्यार्थबोधः स्यात्सोऽपि न संभवति तद्विधि
॥विरोधात्।

तुर्द्धा करोतीत्यनेन न पुरोडाशसामान्ये प्राप्तस्य चतुर्द्धाकरणस्याऽऽग्नेयं चतुर्द्धा करोतीत्यनेन च पुरोडाशविशेषमात्रे संकोचः क्रियते प्रकृते तु
यजतिष्विन्यादिना यजतिसामान्ये प्राप्तस्य ये यजामह इति मंत्रस्य नानुयाजेष्विन्यादिना यजतिविशेषादनुयाजरूपादन्यमात्रे यजतिविशेषे संकोच इत्युप
संहारात्पर्युदासस्य भेदः स्पष्ट एवेति परिहरति नेत्यादिना तन्मात्रसंकोचार्थ इत्यर्थः सामान्यप्राप्तस्य विशेषमात्रसंकोचार्थ इत्यर्थः तत्रोदाहरणमाह यथे
ति तदन्यमात्रसंकोचार्थ इति सामान्यप्राप्तस्य विशेषादन्यमात्रसंकोचार्थ इत्यर्थः इति ततो भेदादिति एवमुक्तप्रकारेणोपसंहारात्पर्युदासस्य भेदान्न त

योरभेदापत्तिरित्यर्थः अपरे तूपसंहारो नाम सामान्ये
नः प्राप्तस्य विशेषे संकोचनरूपो वि॥

धेर्व्यापारविशेषः पर्य्युदासस्तु पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञित्यभियुक्तोक्ताप्रत्ययातिरिक्तेन नाम्ना धातुना च नञः संबंधरूपः तस्मादनयोस्ताव
त्स्वरूपतः स्पष्ट एव भेद इति तेन तयोरभेदापत्तिरित्याहुः किंच यत्र तु पर्य्युदासस्याश्रयितुं न शक्यते तत्र विकल्पप्रसक्तावपि निषेध एव आश्रीयत इत्याह कुत्र
चिदिति अनन्यगत्येति प्रतिषेधादन्यगतिविशेषस्य पर्य्युदासस्यासंभवेनेत्यर्थः तत्रोदाहरणमाह यथेति नातिरात्र इत्यादिवाक्ये प्रतिषेध एवाश्रीयते न तु प
र्युदासः अत्र चातिरात्र इत्यादिशास्त्रेण प्राप्तस्य षोडशिनामकपात्रविशेषग्रहणस्य प्रतिषेधाद्विकल्पप्रसंगेपि पर्युदासाश्रयणासंभवादित्याह अत्रहीत्यादि
ना अत्र पर्य्युदासाश्रयणासंभवमुपपादयति तथाहीत्यादिना अत्रेति नातिरात्रे षोडशिनं गृह्णातीत्यत्रेत्यर्थः षोडशिपदार्थेन नञर्थान्वय इति अतिरात्रे न षोड

अतोऽत्रानन्यगत्या शास्त्रप्राप्तषोडशिग्रहणस्यैव निषेधः। न च विकल्पप्रसक्तिस्तस्याप्यपेक्षणीयत्वात्। इयांस्तु विशेषो यद्विकल्पा
देकप्रतिषेधेपि प्रतिषिध्यमानस्यानर्थहेतुत्वम्। विधिनिषेधोभयस्यापि क्रत्वर्थत्वात्। यत्र तु न विकल्पः प्राप्तिश्च रागात् एव प्रतिषेध
श्च पुरुषार्थः तत्र प्रतिषिध्यमानस्यानर्थहेतुत्वम्। यथा न कलंजं भक्षयेदित्यादौ कलंजभक्षणादेस्तत्र भक्षणनिषेधस्यैव पुरुषार्थ
त्वात्। न च तत्र दीक्षितो न ददाति न जुहोतीत्यादौ शास्त्रप्राप्तदानहोमादीनां निषेधाद्विकल्पापत्तिरिति वाच्यम् ॥ ७ ॥ ६ ॥

शिनं गृह्णातीत्यन्वय इत्यर्थः एतदन्वयप्रसंगे वाक्यार्थमाह तदेतिरता दृशवाक्यार्थो संभवे हेतुमाह अतिरात्रे षोडशिनमिति अत्र पर्य्युदासोपपत्तयेऽन्व
यान्तरमाह यद्वीति अन्वय इति नञर्थस्येति शेषः निरुक्तान्वयानुरोधेन वा क्यार्थबोधासंभवेपि हेतुमाह तद्विधिविरोधादिति अतिरात्रे षोडशिनं गृह्णाती
त्यतिरात्रयागे षोडशिग्रहणविधायकप्रत्यक्षविधिविरोधादित्यर्थः उपपादितमुपसंहरति अत इति उक्तदोषप्रसंगादस्मिन्वाक्ये प्रतिषेधादन्यप्रत्ययसं
भवेन प्रतिषेध एव स्वीक्रियत इत्यर्थः अत्र प्रतिषेधे सिद्धान्तितेविकल्पप्रसंगमाशंक्येष्टापत्त्या परिहरति न चेत्यादिना अत्रेदं बोध्यम् यत्र न स्यदृत्तमित्याद्यु
पक्रमो नास्ति विकल्पाप्रसक्तिश्च न तत्र प्रतिषेधो भवति यथा न कलंजं भक्षयेदिति यत्र तु विकल्पप्रसंगेपि पर्य्युदासः॥ श्री॥ ॥ श्री॥ श्री॥

सोनाश्रयितुंशक्यतेनतत्रापिप्रतिषेधएवस्वीक्रियतेयथानातिरात्रेषोडशिनंगृह्णातीतिननुनातिरात्रेषोडशिनंगृह्णातीत्यत्रविकल्पप्रसंगेपियदिषोडशिग्र
त हणस्यप्रतिषेधएवस्वीक्रियतेतदाप्रतिषिध्यमानस्यानर्थहेतुत्वस्वीकारात्षोडशिग्रहणस्यापिकलंजभक्षणादिवत्प्रतिषिध्यमानत्वेनानर्थहेतुत्वादर्थव
त्त्वबाधापत्तिरित्याशंकामाह इयांस्त्वित्यादिनाप्रतिषिध्यमानयोरनर्थहेतुत्वेनेतरभावरूपोविशेषइत्यर्थः विकल्पादितियत्रप्रतिषेधस्याविकल्पापादकत्वं
तत्रैकस्यप्रतिषेधेपिनप्रतिषिध्यमानस्यानर्थहेतुत्वमित्यर्थः तत्रहेतुमाहविधीति रागतएवेत्येवकारेणषोडशिग्रहणादिवच्छास्त्रेणप्राप्तिः प्रतिषिध्य
तेअत्रनिषिध्यमानस्यानर्थहेतुत्वेहेतुमाह तत्रानिषोडशिग्रहणविधितत्प्रतिषेधयोरुभयोरपिक्रत्वर्थत्वात्तत्रप्रतिषेध्यमानस्यनानर्थहेतुत्वं अत्र
तुकलंजभक्षणादिप्रतिषेधस्यैवपुरुषार्थत्वंनतुतदनुष्ठानस्येतिप्रतिषिध्यमानस्यकलंजभक्षणब्राह्मणहननादेरनर्थहेतुत्वमेवेतिभावः ननुपथा

स्वतः पुरुषार्थभूतदानहोमादीनांनिषेधस्यपुरुषार्थत्वाभावेपिनिषिध्यमानस्यानर्थहेतुत्वात् यथाऋतौस्वस्त्रीगमनादेस्त
न्निषेधस्यक्रत्वर्थत्वेनतस्यक्रतुवैगुण्यसंपादकत्वात्॥

॥शास्त्रप्राप्तस्यषोडशिग्रहणस्यप्रतिषेधेविकल्पः स्वीकृतः तथाशास्त्रप्राप्त
दानादीनामपिप्रतिषेधेविकल्पापत्तिः स्यादितिदृष्टांताभिप्रायेणातिप्रसंगमाशंक्यपरिहरतिनचेत्यादिनास्वतइति स्वतः पुरुषार्थभूतदानहोमादीनां
पुरुषार्थत्वेनैवशास्त्रप्राप्तिः क्रत्वर्थत्वेनैवचप्रतिषेधइतिषोडशिग्रहणविधितत्प्रतिषेधवत्तेषांविधिप्रतिषेधयोरुभयोस्तुल्यार्थत्वाभावेनन
विकल्पापत्तिः किंचरागतः प्राप्तस्यपुरुषार्थत्वेनप्रतिषेधेप्रतिषिध्यमानस्यकलंजभक्षणादिवदनर्थहेतुत्वस्वीकारेऽत्रदानहोमादेः प्रतिषिध्यमान
स्याप्यनर्थहेतुत्वंसंभवतिनस्यरागतः प्राप्तत्वाभावात्कलंजभक्षणादिप्रतिषेधवत्तत्प्रतिषेधस्यपुरुषार्थत्वाभावाच्चेतिभावः अत्रेदंबोध्यम् ॥
जोतिष्टोमेऽभ्युपेतेदीक्षितोनददातिनजुहोतिनपचतीतितत्रयद्दानादिकंपुरुषार्थंयच्चक्रत्वर्थंतत्राप्युपदिष्टमतिदिष्टंचतत्सर्वंप्र निषिध्यते कुतः नददाती
त्यादिवचनस्यसामान्यरूपत्वादित्यग्निहोत्रदानादिरूपस्यापिप्रतिषेधेसत्युपदेशोव्यर्थः स्यादितितन्नतोतिदिष्टंपुमर्थंचेत्येतदुभयमेवक्र॥ ६ ॥

लो·भि· त्वर्थत्वेनोपदिष्टं दानादिकमनुष्ठेयमिति मध्यमः पक्षः नित्याग्निहोत्रदानादिकं पुरुषार्थत्वेन यत्प्रत्यक्षश्रुतावुपदिष्टं ज्योतिष्टोमकालेपि प्राप्तं यत्त्वातिदिष्टं
५३ दानादिकं तयोरुभयोर्मध्ये प्रत्यक्षोपदिष्टं निषेधस्योपदिष्टमेव सन्निहितमिति पुमर्थस्यैवात्र निषेधः न च नित्याग्निहोत्रदानादौ विधिनिषेधयोः प्रवृ
त्त्या विकल्पः शङ्क्यः भिन्नविषयत्वात् क्रत्वर्थो निषेधः क्रतुकाले तदनुष्ठानं वारयति पुरुषार्थस्तु विधिः कालान्तरे तदनुष्ठापयति तस्मात्पुमर्थस्य निषेध इति
ननु यत्र रागतः प्राप्तस्य प्रतिषेधः पुरुषार्थो भवति तत्र प्रतिषिध्यमानस्यानर्थहेतुत्वं यथा कलञ्जभक्षणादेः ऋतौ स्वस्त्रीगमनप्रतिषेधस्य तु पुरुषार्थत्वाभा
वात्तत्र निषिध्यमानस्य स्वस्त्रीगमनस्य कथमनर्थहेतुत्वमित्यत आह निषेधस्येति यद्वा निषेधस्येत्यादि पूर्वमेवान्वेति तत्र प्रसिद्ध्यर्थं तु यथा क्रतौ नित्या
दिकमेव भवति तथा च स्वतः पुरुषार्थत्वादेरयमर्थः स्वत इति क्रत्वङ्गत्वोपाधिमन्तरेण केवलं स्वरूपत एव पुमर्थभूतानां दानादीनां निषेधस्य पुरुषार्थत्वा
भावेपि क्रत्वर्थत्वसंभवान्निषिध्यमानस्य दानादेः क्रतुवैगुण्यसंपादकत्वेनानर्थहेतुत्वमिति योजना तथा च तेषामनुष्ठानस्य स्वतः पुरुषार्थत्वेपि क्रत्वनु
ष्ठानकाले पुरुषार्थत्वात्तत्र तेषामनुष्ठानस्य भवत्यनर्थहेतुत्वमिति भावः तस्येति ऋतौ स्वस्त्रीगमनादेरित्यर्थः ऋतौ स्त्रीगमनादेः कलञ्जभक्षणा
दिवदनर्थरूपनरकादिदुःखाहेतुत्वेपि क्रतुवैगुण्यसंपादकत्वेनानर्थहेतुत्वसंभवाद्भवत्यत्रापि निषिध्यमानस्यानर्थहेतुत्वमिति भावः तस्मान्नि
षेधकवाक्यानामनर्थहेतुक्रियानिवृत्तिजनकत्वेनैव पुरुषार्थानुबन्धित्वमिति सिद्धम् इदानीं सर्वार्थवादसाधारण्येनार्थवादरूपवेदभागस्य लक्षणमाह ५३

प्राशंस्त्येति ननुवायुर्वैक्षेपिष्ठा देवतेत्यादेरर्थवादवाक्यात्प्राशस्त्यादेरप्रतीयमानत्वान्न तस्य प्राशस्त्यादिपरत्वं तत्रासंभवि लक्षणमिदमित्यत आह तस्येति· तस्यार्थवादस्य लक्षणया प्राशस्त्यनिंदान्यतरप्रतिपादकत्वसंभवेन नेदं लक्षणमसंभवीत्यर्थः अर्थवादस्य तया फलवदर्थपर्यवसानमेवोपपादयति तथाहीत्यादिना अर्थवादवाक्यं कर्तृप्राशस्त्यनिंदितत्वे हे प्रतिपादयतीत्यन्वयः नन्वर्थवादस्य स्वार्थमात्रपरत्वे कथमानर्थक्यप्रसंगो वायुर्वै क्षेपि

प्राशस्त्यनिंदान्यतरपरं वाक्यमर्थवादः। तस्य च लक्षणया प्रयोजनवदर्थपर्यवसानम्। तथाह्यर्थवादवाक्यं हि स्वार्थप्रतिपादने प्रयोजनाभावाद्विधेयनिषेध्ययोः प्राशस्त्यनिंदितत्वे लक्षणया प्रतिपादयति। स्वार्थमात्रपरत्वे आनर्थक्यप्रसंगात्। आम्नायस्य हि क्रियार्थत्वात्। न चेष्टापत्तिः स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिना सकलवेदाध्ययनं कर्तव्यमिति बोधयता सर्ववेदस्य प्रयोजनवदर्थपर्यवसायित्वं सूचयतोपात्तत्वेनानर्थक्यानुपपत्तेः। स हि विधः। विधिशेषो निषेधश्चेति॥ ६॥ ॥

ष्ठेत्यादेरर्थवादवाक्यात्क्षिप्रगामि वायुदेवतारूपार्थस्य प्रतीयमानत्वादित्यत आह आम्नायस्येति समस्तवेदस्य क्रियाप्रतिपादकत्वस्वीकारेणास्य सिद्धार्थप्रतिपादकस्य स्वार्थमात्रपरत्वे सार्थक्यमुपपद्यत इति भावः अर्थवादवाक्यानामनर्थकत्वस्येष्टत्वमाशंक्य परिहरति न चेत्यादिना अर्थवादं विभजते स हि विध इति विधिशेष इत्यादि सोऽपि चतुर्विधः प्रशंसानिंदापरकृतिपुराकल्पभेदात्॥ श्री॥ श्री॥ श्री॥ श्री॥ श्री॥

तत्रप्रशंसार्थवादोहिशोभतेस्यमुखंयएवंवेदेत्यादिर्वायुर्वैक्षेपिष्ठेत्यादिर्मूलोदाहृतश्चनिंदार्थवादस्तुअसन्नेवाएतद्यद्दुष्टंदोमंत्रअसद्धिस्जंतेयोब
र्हिषिरजतंददातीत्यादिः सोरोदीत्यादिर्मूलोदाहृतश्चभवति परेणेदंमहत्तापुरुषेणाकर्मेकृतमितिप्रतिपादकोर्थवादः परकृतिरित्युच्यते यथा अग्निर्वा अकामय
तेत्यादिः परवत्कृकाख्यादिप्रतिपादकोर्थवादः पुराकल्पइत्युच्यते यथातमग्न्यग्नद्दियाधियात्वावध्यासुदित्यादिरिति विधेयार्थप्राशस्त्येतिवायुः क्षिप्रगामि
त्वाद्देवताप्रशस्तार्देवताभवत्यतस्तद्देवत्यंकर्मप्रशस्तमितिविधेयकर्मदेवतागतप्राशस्त्यप्रतिपादनद्वाराविध्येकवाक्यत्वेनार्थवत्त्वमित्यर्थः निषेध्येति निषे
ध्येतिनिषेध्यरजतनिंदाप्रतिपादन द्वारारजतनिषेधप्राशस्त्यपरत्वेननिषेधैकवाक्यत्वादर्थवत्त्वमित्यर्थः एवमग्निर्वाअकामयतेत्यादेरप्यग्निदे

तत्रवायव्यंश्वेतमालभेतभूतिकामइत्यादिविधिशेषस्यवायुर्वैक्षेपिष्ठादेवतेत्यादेर्विधेयार्थप्राशस्त्यबोधकतयार्थत्वम् ॥बर्हिषि
रजतंनदेयमित्यादिनिषेधशेषस्यसोरोदीद्यद्रोदीत्तद्रुद्रस्यरुद्रत्वमित्यादेर्निषेधस्यनिंदितत्वबोधकतयार्थवत्त्वम् नचप्राश
स्त्यादिबोधस्यनिष्प्रयोजनत्वेननार्थवादस्यार्थवत्त्वमितिवाच्यम् आलस्यादिवशादप्रवर्तमानस्यपुंसः प्रवृत्त्यादिजनकत्वेनत
द्बोधस्योपयोगात् सपुनस्त्रेधा॥ ॥वन्योयागः पूर्वकालेग्निकृतत्वात्प्रशस्तोतआधिकादिदानींतनैरप्यन्यैर्यजमानैरवश्यंकर्तव्यमितिवि
धेयकर्मगतप्राशस्त्यप्रतिपादनद्वाराविध्येकवाक्यत्वेनार्थवत्त्वंबोध्यम् एवमन्यत्रापितत्तद्विधेयकर्मप्राशस्त्यादिप्रतिपादनद्वारेणततद्विध्यादेकवाक्यत्वेना
र्थवत्त्वंविभावनीयम् क्वचिदर्थवादस्यसंदिग्धार्थनिर्णायकत्वेनप्रामाण्यंस्वीकृतंयथा अक्ताःशर्कराउपदध्यादितिविधावक्ताइतिपदेनद्रवद्रव्यसामान्यंप्रती
यतेतत्त्वद्रव्यंकिमितिसंदेहेतेजोवैघृतमित्यर्थवादरूपाद्वाक्यशेषात् घृतमितिनिश्चीयतइति ननुविधेयकर्मप्राशस्त्यादिबोधस्यसुखदुःखाभावान्यतरत्वि एम
लक्षणत्वेननार्थवादस्यतत्प्रति पादनेनार्थकत्वमुपपद्यतइत्याशंक्यपरिहरति नचेत्यादिनातद्बोधस्योपयोगादिति अर्थवादजन्यप्राशस्त्यादिबोध ५४
स्यविधेयकर्मानुष्ठानादावुपयोगादर्थवादस्यार्थवत्त्वमुपपद्यतइत्यर्थः॥

स पुनरर्थवादो गुणवादोऽनुवादो भूतार्थवादश्चेति त्रिधा भवतीति पुनरपि तत्त्रेधा विभजते स पुनस्त्रेधेति तस्य त्रिविधत्वे वृद्धसंमतिमुदाहरति तदुक्तमिति तद्धानादिति तयोर्हानं तद्धानं तस्मादिति विग्रहः प्रमाणांतरविरोधप्रमाणांतरावधारणयोर्हानादित्यर्थः समुदाहृतं वृद्धसंमतिं व्याचष्टे अस्यार्थ इत्यादिना इन्द्रो वृत्रायेति अस्य वृत्रं प्रतीन्द्रवज्रोद्यच्छनाभावावगाहिप्रमाणांतरस्यादर्शनात्तद्धाने प्रमाणांतरेण विरोधः नापि प्रमाणांतरावगतार्थप्रतिपादकत्वं वृत्रं प्रतीन्द्रवज्रोद्यच्छनप्रतिपादकप्रमाणांतरस्यादर्शनादिति भावः एवमुपपादितं विध्यर्थवादादिरूपस्य पंचविधवेदस्य साक्षात्परंपरया यागादिधर्मप्र-

तदुक्तम्। विरोधे गुणवादः स्यादनुवादोऽवधारिते। भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मत इति। अस्यार्थः। प्रमाणांतरविरोधे सत्यर्थवादो गुणवादः। यथाऽऽदित्यो यूप इत्यादिर्यूपेऽऽदित्याभेदस्य प्रत्यक्षबाधितत्वादादित्यवदुज्ज्वलत्वरूपगुणोऽनेन लक्षणया प्रतिपाद्यते। प्रमाणांतरावगतार्थबोधकोऽनुवादः। यथाऽग्निर्हिमस्य भेषजमित्यत्र हिमविरोधित्वस्याग्नेः प्रत्यक्षावगतत्वात्। प्रमाणांतरविरोधतत्प्राप्तिरहितार्थबोधको वादो भूतार्थवादः। यथेन्द्रो वृत्राय वज्रमुदयच्छदित्यादि। एवं च यजेत स्वर्गकाम इत्यादिनिखिलवेदस्य साक्षात्परंपरया वा यागादिधर्मप्रतिपादकत्वं सिद्धम्। सोऽयं धर्मो यदुद्दिश्य विहितस्तदुद्देशेन क्रियमाणस्तद्धेतुः। ईश्वरार्पणबुद्ध्या क्रियमाणस्तु निःश्रेयसहेतुः॥

१९ तिपादकत्वेनार्थवत्त्वमुपसंहरति एवं चेति उक्तेन प्रकारेणेत्यर्थः योऽयं यागादिरूपो धर्मो यत्स्वर्गादिफलमुद्दिश्य विहितः सोऽयं तादृशफलोद्देशेनानुष्ठीयमान एव तस्य फलस्य हेतुर्भवति परमेश्वरसमर्पणमनीषयानुष्ठीयमानस्तु चित्तशुद्धितत्त्वज्ञानप्राप्तिद्वारा परंपरया मोक्षहेतुरिति धर्मानुष्ठानस्य विविदिषाश्रुतिप्रामाण्यात्संयोगपृथक्त्वन्यायमाश्रित्य परमपुरुषार्थपर्यवसायित्वमुपक्षिपति सोऽयमित्यादि धर्मस्य परमेश्वरसमर्पणबुद्ध्यानुष्ठाने प्रमाणाभावमाशंक्य तत्र भगवद्वाक्यं प्रमाणयति

मी॰भा॰ न चेत्यादिना नन्वेतस्याः स्मृतेरप्रामाण्यमाशंक्य तत्र स्मृतिपादे स्थित अष्टकाः कर्तव्या इत्यादिस्मृतिवाक्यं न धर्मे प्रमाणं पौरुषेयवाक्यत्वे सति मूलप्रमाण
५५ रहितत्वाद्विप्रलम्भकवाक्यवत् अथ मूलप्रमाणवत्त्वाय वेदार्थ एव स्मृतिभिरुच्यत इति मन्येथाः तर्हि वेदेनैव तदर्थस्यावगतत्वादियं स्मृतिरनर्थिका स्या
त् तदानीमनुवादकत्वादप्रामाण्यमिति प्राप्ते ब्रूमः विमता स्मृतिर्वेदमूला वैदिकमन्वादिप्रणीतस्मृतित्वात् उपनयनाध्ययनादिस्मृतिवत् न च वैयर्थ्यं शं
कनीयं अस्मदादीनां प्रत्यक्षेषु परोक्षेषु नाना वेदेषु विप्रकीर्णस्यानुष्ठेयार्थस्यैकत्र संक्षिप्यमाणत्वात् तस्मादियं स्मृतिर्धर्मे प्रमाणमिति ननु किमनेन संग्रह
निरूपणेन विस्तृतभाष्यादिग्रन्थैरेव जैमिनीयन्यायार्थबोधसंभवादित्याशंक्य संग्रहनिरूपणे स्वप्रवृत्तिनिमित्तं प्रदर्शयति बालानामिति तेषां विस्तृतत्वे

न च तदर्पणबुद्ध्यानुष्ठाने प्रमाणाभावः। यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्। यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणमिति भ
गवद्गीतास्मृतेरेव प्रमाणत्वात्। स्मृतिचरणे तत्प्रामाण्यस्य श्रुतिमूलकत्वेन व्यवस्थापनादिति शिवम्। बालानां सुखबोधाय भास्करे
ण सुमेधसा। रचितोऽयं समासेन जैमिनीयार्थसंग्रहः १ इति श्रीमहोपाध्यायलौगाक्षिभास्करविरचितपूर्वमीमांसार्थसंग्रहनामकं
प्रकरणं समाप्तिमगात्॥

॥ न दुःखग्राह्यत्वान्नैते बालशब्दितपूर्वमीमांसासंस्कारशून्यानां जैमिनीयन्यायार्थबोधः संभवति अनेन तु तत्तद्विस्तृतशा
स्त्रप्रवेशद्वारा संभवत्येव स इति भावः टीकाविहीने तु कृता हि टीका पूर्वे तु तंत्रे खलु संग्रहोऽस्मिन् दुर्बोधशास्त्रे किमु मादृशानां दृष्ट्वापि दोषं न हसंति
धीराः १ यदाज्ञया बन्धविमोक्षणं विना स्वधर्मसेवा फलहेतुतां गता॥ प्रणौमि सोमं मृडमादिकारणं किमन्यदेवैर्जनफल्गुहेतुभिः २ मदीययत्नः
शिवपादसेवया गुरोः कटाक्षैकलवेन लब्धया ॥ प्रयुज्यमानः शिवपादपंकजे स्वयं तु भूयान्मृडतोषकारणम्॥ सुजनपदविनीतो दुर्जनाद्दूरनिष्ठो गु राम
रुवरशिवभक्तस्तेन लब्ध्वागमेऽस्मिन् श्रुतिमणिपदनिष्ठो भिक्षुरामेश्वराख्यः सुजननयनिवेशाय यत्नबन्धं चकार ४ गुणगणमणिसिंधुः शंभुपादैकभक्तो ५५
निगमशिरसि निष्ठो जातवैराग्यचित्तः श्रुतिनलिनविकासे भानुभावो य ईशस्तमिह महिमपूज्यं नौमि गो ॥

पंयतीन्द्रम् ५ तस्मादेवगुरुतराद्भीष्टलब्धंगोपालाश्रमपदंगीयमानं दैवात् येनोमाधवचरणाब्जसेविनात्रतंव
न्देमहिमगुरुंविशालबुद्धिं ६ याकाशीनिखिलगुरोर्ममेश्वरस्यप्राणांतेसकलशिवप्रदाप्रसिद्धा यत्राहंसकलसुरेशलब्ध
तत्वस्तत्रेयसुजनहितप्रदानिबद्धा ७ इतिश्रीमत्परमहंसपरिव्राजकाचार्यगोपालेन्द्रसरस्वतीश्रीपूज्यपादशिष्यश्री
सदाशिवेन्द्रसरस्वतीशिष्येणश्रीरामेश्वरेणशिवयोगिभिक्षुणाविरचितामीमांसार्थसंग्रहकौमुदीचरमवर्णध्वंसमगात्
संख्या २७५० श्लोक ॥

IGNCA RAR
ACC No. R 553

इस्तिहार दियाजाताहै ग्राहकलोगोंकोकि बम्बई कलकत्ता लखनऊ· और आगरा दिल्ली· मेरठ· इलाहाबाद· पूना· बनारस औरकई एक छापेकीपुस्तकें हमारेइहां मौजूदहैं जिनमहाशयोंकोलेनाहोयतो आधआनेकाटिकट भेजके संस्कृत औरभाषासुची पत्रमंगायलेवैं उसमे सबपुस्तकोंकानाम और दर लिखाहै॥ ॥ इसकार्यके संपादक बाबु कवलेश्वरसिंह बुकसेलर बनारस

Indira Gandhi National
Centre for the Arts